ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# अनिवार्यसंस्कृतम्

## ( काव्यम् )

## मध्यमा १

## (ધોરણ 11)

**प्रतिज्ञापत्रम्**

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्यम् :** ₹ 70.00

**गुजरातराज्यशालापाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति।
अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
डॉ. कमलेशकुमार चोकसी

**लेखनम्**
श्री कालीदासः ठाकरः(कन्वीनर)
श्री नैमिषः महेता
श्री जीगरः भट्टः

**समीक्षणम्**
श्री मनुप्रसादः जोशी
श्री हेमराजः भट्टः
श्री लाभशंकरः पंड्या
श्री जाह्नवी शुक्लः

**भाषाशुद्धिः**
श्री अमृतलालः भोगयता

**संयोजनम्**
डॉ. क्रिष्णा दवे
(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामकः- उत्पादनम्)

## प्रास्ताविकम्

प्राच्यगुरूकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयो अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **अनिवार्यसंस्कृतम् (काव्यम्) मध्यमा १(धो२ण 11)** इति विषयस्य नूतनाभ्यास-क्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डल द्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः
ता.06-07-2019

कार्यवाहकःप्रमुखः
गान्धीनगरम्

**प्रथमावृत्ति : 2019**
**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| 1. | यजुर्वन्दना | (पद्यम्) | 1 |
| 2. | गुरोरुपदेशः | (गद्यम्) | 6 |
| 3. | ऋतुवर्णनम् | (पद्यम्) | 12 |
| 4. | सत्यस्य महिमा | (नाट्यांशः) | 24 |
| 5. | एकाक्षरी भाषते | (गद्यम्) | 33 |
| 6. | द्वारपालस्य सेवानिष्ठा | (गद्यम्) | 37 |
| 7. | उत्तररामचरितम् | (नाट्यांशः) | 41 |
| 8. | वृक्षाः सत्पुरुषा इव | (पद्यम्) | 48 |
| 9. | अयं मे हस्तो भगवान् | (पद्यम्) | 55 |
| 10. | भारतवर्णनम् | (पद्यम्) | 64 |
| 11. | सेवकस्य सेवाधर्मः | (पद्यम्) | 69 |
| 12. | पम्पासरोवरः | (पद्यम्) | 75 |
| 13. | मतिर्दोलायते सत्यम् | (गद्यम्) | 81 |
| 14. | प्रसन्नराघवम् | (नाटकपरिचयः गद्यम्) | 85 |
| 15. | चौरस्यात्मसमर्पणम् | (पद्यम्) | 90 |
| 16. | भक्तस्य चातुर्यम् | (गद्यम्) | 93 |
| 17. | अन्योक्तयः | (पद्यम्) | 98 |
| 18. | न नीतिमार्गं परिलङ्घयन्ति | (पद्यम्) | 104 |
| 19. | सुभाषितानि | (पद्यम्) | 110 |
| 20. | नवधा भक्तिः | (गद्यपद्यात्मकः) | 120 |
| 21. | प्रश्नोत्तरपद्यानि | (गद्यपद्यात्मकः) | 125 |
| 22. | गुरुकुलम् | (पद्यम्) | 129 |
| 23. | हतो वृद्धः | (गद्यम्) | 134 |
| 24. | वृत्तनियमाः | | 138 |
| 25. | शास्त्रपरिचयः | | 144 |

# 1. यजुर्वन्दना

वेदाः ज्ञानविज्ञानग्रन्थाः सन्ति । ते च ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदनाम्ना लोके प्रसिद्धिं गताः सन्ति । एतेषु चतुर्षु वेदेषु सम्मिल्य प्रायः विंशतिसहस्रात्मकाः मन्त्राः सन्ति । एषु मन्त्रेषु मानवानां कृते सदैव उपयोगिनौ विधिनिषेधौ प्रधानतया प्रवर्तेते । अन्ये अपि बहवः विषयाः एतेषु वेदेषु निहिताः सन्ति । तद्यथा - प्रार्थना, देवादीनां स्तुतिः, पितृ-पुत्रादीनां कर्तव्यानि, पति-पत्न्योः पारस्परिकस्य व्यवहारस्य उपदेशः, सृष्ट्युत्पत्ति-जन्म-मृत्यु-पुण्यादीनां तात्त्विकविषयाणां प्रतिपादनम् इत्यादयः बहवो विषयाः सन्ति ।

अस्मिन् पाठे यजुर्वेदात् मन्त्राणाम् षट्कम् सङ्गृहीतमस्ति ।

प्रथमः मन्त्रः मेधायाः प्रार्थनापरकः अस्ति । देवगणाः पितरश्च यां मेधाम् उपासते तां मेधां भक्तः वाञ्छति । द्वितीये मन्त्रे अपि मेधायाः प्राप्त्यर्थं प्रार्थना विहिता अस्ति । तृतीये मन्त्रे प्राप्तस्य पदार्थस्य विविधान् देवान् उद्दिश्य स्वाहाविधिः विहितः अस्ति । अयं स्वाहाविधिः यज्ञकर्मरूपेण प्रसिद्धः वर्तते । ततः चतुर्थे मन्त्रे यज्ञेन आयुः प्राणं चक्षुः श्रोत्रम् इत्यादिकं मत्कृते परमः देवः कल्पताम् इति प्रार्थितमस्ति । एवमेव पञ्चमे षष्ठे च मन्त्रे विनीतः भक्तः स्वीयस्य पुरुषस्य अनन्तरं क्रमशः दोषपरिहाराय गुणप्ररोहाय च प्रार्थनां करोति ।

छात्राः पाठमिमं पठित्वा वेदोपदेशम् अवगत्य दैनंदिनकर्मणि वेदमन्त्राणाम् उपयोगं कृत्वा स्वीयं प्रार्थनाकर्म आचरन्तु इति काम्यते ॥

---

**(1) यां मेधां देवगणाः पितरश्चोपासते ।**

**तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ - यजुर्वेदः ३२.१४**

**पदच्छेदः** याम् (2.1) मेधाम् (2.1) देवगणाः (1.3) पितरः (1.3) च (अ.) उपासते (उप अस् लट् अन्य-पुरुष-बहुवचनम्) तया (3.1) माम् (2.1) अद्य (अ.) मेधया (3.1) अग्ने (सम्बोधनम्) मेधाविनम् (2.1) कुरु (कृ लोट् म. पु. ए. व.) स्वाहा (अ.) ॥

**अन्वयः** हे अग्ने! देवगणाः पितरः च यां मेधाम् उपासते । तया मेधया माम् अद्य मेधाविनं कुरु स्वाहा ॥

**पदार्थः** हे अग्ने! हे पावक देव ! देवगणाः - देवानां गणाः अर्थात् समूहः पितरः - दिवङ्गताः पूर्वजाः यां मेधाम् बुद्धिम् उपासते - कामयन्ते, तया मेधया बुद्ध्या माम् उपासकं भक्तम् अद्य मेधाविनं मेधावन्तं कुरु संपादय स्वाहा इति आहुतिप्रदाने ॥

**भावार्थः** हे अग्ने! देवगणाः पितरः च यां मेधांम् उपासते स्म, तया मेधया एव अहं मेधावी स्याम् इति भक्तः प्रार्थयते ॥

**(2) मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।**

**मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ - यजुर्वेदः ३२.१५**

**पदच्छेदः** मेधाम् (2.1) मे (4.1) वरुणः (1.1) ददातु (दा लोट अ. पु. ए. व.) मेधाम् (2.1) अग्निः (1.1) प्रजापतिः (1.1) मेधाम् (2.1) इन्द्रः (1.1) च (अ.) वायुः (1.1) च (अ.) मेधाम् (2.1) धाता (1.1) ददातु (दा लोट् अ. पु. ए. व.) मे (4.1) स्वाहा (अ.) ॥

**अन्वयः** वरुणः मे मेधां ददातु । अग्निः प्रजापतिः मेधां ददातु । इन्द्रः (च) वायुः च धाता च मे मेधां ददातु ॥

**पदार्थः** वरुणः एतन्नामकः देवः मे मह्यम् मेधाम् धारणावतीं बुद्धिं ददातु प्रयच्छतु । अग्निः एतन्नामकः देवः प्रजापतिः प्रजानां पालकः सन् मेधाम् बुद्धिं ददातु प्रयच्छतु । इन्द्रः - शक्रः, वायुः - पवनः, धाता - ब्रह्मा, च (एते त्रयः देवाः) मे मह्यं मेधां बुद्धिं ददातु - प्रयच्छतु ।।

**भावार्थः** - वरुणः अग्निः इन्द्रः वायुः धाता मह्यं मेधाम् अर्थात् धारणावतीं बुद्धिं प्रयच्छतु ।।

**(3) अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा मरुतामोजसे स्वाहेन्द्रस्येन्द्रियाय स्वाहा ।**
**पृथिवि मातर्मा मा हिंसीर्मो अहं त्वाम्।। - यजुर्वेदः १०.२३**

**पदच्छेदः** अग्नये (4.1) गृहपतये (4.1) स्वाहा (अ.) सोमाय (4.1) वनस्पतये (4.1) स्वाहा मरुताम् (6.3) ओजसे (4.1) स्वाहा (अ.) इन्द्रस्य (6.1) इन्द्रियाय (4.1) स्वाहा (अ) । पृथिवि (सम्बोधनम्) मातः (सम्बोधन) मा (2.1) मा (अ) हिंसीः (लङ् म. पु. ए. व.) मा (अ.) अहम् (1.1) त्वाम् (2.1) ॥

**अन्वयः** गृहपतये अग्नये स्वाहा । वनस्पतये सोमाय स्वाहा । मरुताम् ओजसे स्वाहा । इन्द्रस्य इन्द्रियाय स्वाहा । मातः पृथिवि मा मा हिंसीः । मा उ अहम् त्वाम् ॥

**पदार्थः** गृहपतये (गृहस्य पतिरूपकाय पालकाय वा) अग्नये (अग्निदेवाय) स्वाहा (आहुतिं ददामि) । वनस्पतये (वनस्पतिरूपाय) सोमाय स्वाहा । मरुताम् ओजसे (अध्यात्माय तेजसे) स्वाहा । इन्द्रस्य इन्द्रियाय (इन्द्रियशक्तये) स्वाहा । मातः पृथिवि । (हे जननि भूमे!) मा मा हिंसीः (मम हिंसां मा कुरु) । मा उ अहं त्वाम् (हिंसिषम्) (अहं च तव हिंसां मा कुर्याम्) ॥

**भावार्थः** गृहस्य पतिरूपकाय पालकाय वा अग्नये, वनस्पतिरूपाय सोमाय, मरुताम्, ओजसे, इन्द्रस्य इन्द्रियशक्तये अहं भक्तः आहुतिं ददामि । हे मातः पृथिवि । मम हिंसां मा कुरु, अहं च तव हिंसां मा कार्षम् (कुर्याम्) ।।

**(4) आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम् चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां वाग्यज्ञेन**
**कल्पतां मनो यज्ञेन कल्पताम् आत्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां ज्योतिर्यज्ञेन**
**कल्पतां स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ यजुर्वेदः १८.२९**

**पदच्छेदः** आयुः (1.1) यज्ञेन (3.1) कल्पताम् (कल्प् लोट् अ.पु.ए.व.) प्राणः (1.1) चक्षुः (1.1) श्रोत्रम् (1.1) वाक् (1.1) मनः (1.1) आत्मा (1.1) ब्रह्मा (1.1) ज्योतिः (1.1) स्वः (अ) पृष्ठम् (1.1) यज्ञः (1.1) यज्ञेन (3.1) कल्पताम् (कल्प् लोट् अ.पु.ए.व.) ॥

**अन्वयः** (मम) आयुः यज्ञेन कल्पताम् । प्राणः यज्ञेन कल्पताम् । चक्षुः यज्ञेन कल्पताम् । श्रोत्रम् यज्ञेन कल्पताम् । वाक् यज्ञेन कल्पताम् । मनः यज्ञेन कल्पताम् । आत्मा यज्ञेन कल्पताम् । ब्रह्मा यज्ञेन कल्पताम् । ज्योतिः यज्ञेन कल्पताम् । स्वः यज्ञेन कल्पताम् । पृष्ठम् यज्ञेन कल्पताम् । यज्ञः यज्ञेन कल्पताम् ।

**पदार्थः** आयुः (आयुष्यम्) यज्ञेन (यजनकर्मणा) कल्पताम् (लभ्यन्ताम्) । प्राणः (प्राणाः, जीवनं वा) चक्षुः (नेत्रम्) श्रोत्रम् (कर्णौ) वाक् (वाणी) मनः (चित्तम्) आत्मा (जीवात्मा) यज्ञेन (यज्ञभावनया) कल्पताम् (ईश्वरार्पितकर्मणि विनियुक्तानि भवन्तु) । (अथ च) ब्रह्मा यज्ञेन (यज्ञकर्मणा) कल्पताम् (सिद्धः भवतु) । ज्योतिः (ज्ञानरूपः प्रकाशः) स्वः (स्वर्गः, सुखविशेषः वा) पृष्ठम् (प्रतिष्ठा, परमसुखम्) यज्ञः (यज्ञरूपः विष्णुः) यज्ञेन कल्पताम् (लभ्यन्ताम्, उपलब्धं कारयन्तु, उपलब्धानि भवन्तु) ॥

**भावार्थः** आयुः, प्राणः (प्राणाः), चक्षुः, श्रोत्रम्, वाक्, मनः, आत्मा, यज्ञेन (यज्ञभावनया, यज्ञकर्मणा वा) कल्पताम् (ईश्वरार्पितकर्मणि विनियुक्तानि भवन्तु) । (अथ च) ब्रह्मा यज्ञेन (यज्ञकर्मणा) कल्पताम् (सिद्धः भवतु) । ज्योतिः, स्वः, पृष्ठम् अर्थात् प्रतिष्ठा, स्वयं यज्ञः (यज्ञरूपः विष्णुः) च यज्ञेन कल्पताम् (लभ्यन्ताम्, प्राप्ताः भवन्तु) ॥

**(5) यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु ।**

**शं नो भवतु भुवनस्य यस्पतिः ।। - यजुर्वेदः ३६.२**

**पदच्छेदः** - यत् (1.1) मे (6.1) छिद्रम् (1.1) चक्षुषः (6.1) हृदयस्य (6.1) मनसः (6.1) वा (अ.) अतितृण्णम् (अ) बृहस्पतिः (1.1) मे (6.1) तत् (1.1) दधातु (धा लोट् अ. पु.ए.व.) । शम् (अ.) नः (6.3) भवतु (भू लोट् अ. पु. ए. व.) भुवनस्य (6.1) यः (1.1) पतिः (1.1) ।।

**अन्वयः** - मे चक्षुषः यत् छिद्रम्, हृदयस्य मनसः वा (यत्) मे अतितृण्णम् (छिद्रम् अस्ति) तत् बृहस्पतिः दधातु । यः भुवनस्य पतिः (सः) नः शं भवतु ॥

**पदार्थः** मे (मम) चक्षुषः (नेत्रस्य) यत् छिद्रम् (या त्रुटिः न्यूनता, अपूर्णता वा), हृदयस्य मनः वा (यत्) मे (मदीयम्, मम वा) अतितृण्णम् (अत्यन्तं बृहत् छिद्रम् अस्ति) तत् बृहस्पतिः (बृहताम् आकाशादीनाम् पतिः स्वामी) दधातु (सन्धानेन पूरयतु) । यः भुवनस्य (लोकस्य) पतिः (स्वामी अस्ति सः) नः शं भवतु (शान्तिप्रदः भवतु) ॥

**भावार्थः** मम नेत्रस्य, हृदयस्य, मनसः वा यत् छिद्रम् अस्ति, तत् बृहस्पतिः नाम देवता सन्धानेन पूरयतु । यः भुवनस्य पतिः (अस्ति, सः) नः शं भवतु ॥

**(6) देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्तताम् ।**

**देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥ - यजुर्वेदः २५.१५**

**पदच्छेदः** देवानाम् (6.3) भद्रा (1.1) सुमतिः (1.1) ऋजूयताम् (ऋजु ना.धा. लोट् अ. पु. ए. व.) देवानाम् (6.3) रातिः (1.1) अभि (उपसर्गः) नः (2.3) निवर्तताम् (नि + वृत् लोट् अ.पु.ए.व.) देवानाम् (6.3) सख्यम् (1.1) उपसेदिम (उप + सद् लेट् उ. पु. ब. व.) वयम् (1.3) देवाः (1.3) नः (2.3) वायुः (2.1) प्रतिरन्तु (प्र + तृ लोट् अ. पु. ए. व.) जीवसे (अ.) ॥

**अन्वयः** देवानाम् भद्रा सुमतिः ऋजूयताम् । देवानाम् नः रातिः अभि निवर्तताम् । वयम् देवानाम् सख्यम् उपसेदिम । देवाः नः जीवसे आयुः प्रतिरन्तु ॥

**पदार्थः** - देवानाम् (दिव्यजनानाम्) भद्रा (कल्याणकारिणी) सुमितः (सुमनस्कता) ऋजूयताम् (ऋजूताम् सत्यतां प्राप्नोतु) । देवानाम् (देवतानाम्) रातिः (दानम्, उदारता वा) नः (अस्मान् प्रति) अभि निवर्तताम् (नितराम् बाहुल्येन भवतु) । वयम् देवानाम् (दिव्यपुरुषाणाम्) सख्यम् (मैत्रीम्) उपसेदिम (प्राप्नुयाम) । देवाः नः (अस्माकम्) आयुः जीवसे (जीवनधारणाय) प्रतिरन्तु (वर्धयन्तु) ॥

**भावार्थः** - देवानाम् भद्रा कल्याणकारिणी सुमतिः सत्यतां प्राप्नोतु । देवानां रातिः उदारता अस्मान् प्रति बाहुल्येन भवतु । वयं देवानां सख्यं प्राप्नुयाम देवा अस्माकम् आयुः वर्धयन्तु ॥

## टिप्पणी

**समासः** - देवगणाः (देवानां गणाः  ष. तत्पु), प्रजापतिः (प्रजाया पतिः  ष. तत्पु.), गृहपतिः (गृहस्य पतिः ष. तत्पु.), वनस्पतिः (वनस्य पतिः - ष. तत्पु.).

बृहस्पतिः (बृहतां पतिः - ष.तत्पु.)

## स्वाध्यायः

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) देवगणाः पितरश्च काम् उपासते ?

(क) धियम्  (ख) धनम्  (ग) मेधाम्  (ध) देवीम्

(2) धाता कः अस्ति ?

(क) इन्द्रः  (ख) अग्निः  (ग) वरुणः  (ध) ब्रह्मा

(3) वनस्पतिरूपाय कस्मै स्वाहा ?

(क) अग्नये  (ख) सोमाय  (ग) ओजसे  (घ) इन्द्राय

(4) हृदयस्य मनसः च छिद्रं कः पूरयतु ?

(क) इन्द्रः  (2) अग्निः  (3) बृहस्पतिः  (घ) वायुः

(5) वयं केषां सख्यं प्राप्नुयाम ?

(क) देवानाम्  (ख) ऋषीणाम्  (ग) मनुजानाम्  (घ) देवीनाम्

(6) अस्माकम् आयुः के वर्धयन्तु ?

(क) ऋषयः  (ख) देवाः  (ग) मातरः  (घ) नद्यः

**2. एकवाक्येन उत्तरं लिखत ।**

(1) वेदेषु प्रायः कति मन्त्राः सन्ति ?

(2) पाठस्य प्रथममन्त्रे कस्याः प्रार्थना कृता ?

(3) कः मां मेधाविनं कुर्यात् ?

(4) वरुणः अग्निः इन्द्रः च मे किम् ददातु ?

(5) गृहस्य पतिरूपः कः अस्ति ?

(6) भक्तः आयुः केन कल्पयति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) यथाधीतं मेधायाः स्वरूपं वर्णयत ।

(2) अग्नये गृहपतये स्वाहा। - इत्यस्य मन्त्रस्य भावार्थं लिखन्तु ।

(3) के के देवाः मां मेधाविनं कुर्वन्ति इति नामपुरःसरं लिखत ।

(4) मदीयं छिद्रं कुत्र कुत्र संभवति इति यथामन्त्रम् लिखत ।

(5) देवानां सुमतिं रातिं च स्वानुभवेन स्वीयैः शब्दैः लिखत ।

**4. संक्षेपतः परिचयं कारयत ।**

(1) पितरः ।

(2) प्रजापतिः ।

(3) बृहस्पतिः ।

(4) इन्द्रः ।

(5) देवः ।

**5. सन्धिविच्छेदं ( पदच्छेदं ) कुरुत ।**

(1) पितरश्चोपासते ।

(2) मेधामिन्द्रश्च ।

(3) स्वाहेन्द्रस्येन्द्रियाय ।

(4) वातितृण्णम् ।

(5) देवा न आयुः ।

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) मेधा ।

(2) स्वाहा ।

(3) यज्ञः ।

(4) सुमतिः ।

(5) रातिः ।

**शिक्षकप्रवृत्तिः**

- वेदमन्त्राणाम् सस्वरपाठं श्रावयन्तु ।

**छात्र प्रवृत्तिः**

- वेदमन्त्राणाम् स्मरणं कुर्वन्तु ।

●

# 2. गुरोरुपदेशः

वेदकालीनायाम् आर्षसंस्कृतौ 'गुरुशिष्यपरम्परायाः' विशिष्टं महत्त्वं वर्णितम् अस्ति । वेदानाम् अध्ययनम् अपि अनया एव परम्परया करणीयं भवति । वेदे उपनिषदि दर्शनशास्त्रे च स्थाने स्थाने अध्ययनविधिः वर्णितः अस्ति । विशेषतः मीमांसादर्शने आचार्याः विविधानां वेदवाक्यानां प्रामाणिकं सुचारु विवरणं प्रस्तुवन्ति।

'संस्कृतिः' इति पदम् एव १६ संस्काराणां स्मरणं कारयति । यज्ञोपवीतं धृत्वा ब्रह्मचर्याश्रमे बालकः विद्यानाम् अध्ययनार्थं गुरुकुले वसति । ततः अध्ययनं समाप्नोति तदा सः 'स्नातकः' भवति ।

अस्मिन् पाठे स्वीकृतः अंशः तैत्तिरीयोपनिषदि 'दीक्षान्तप्रवचनम्' अथवा 'विद्योत्पत्त्यर्थम् अनुष्ठेयानि कर्माणि' इति शीर्षकेण अपि प्रचलितः अस्ति । शाङ्करभाष्यस्य आधारं गृहीत्वा अत्र सरलभाषया उपदेशः प्रस्तुतः अस्ति ।

गुरुकुलाद् यदा वेदादिविद्याः अधीत्य निवर्तते तदानीं अन्तेवासिनः समावर्तनसंस्कारः भवति । स्वकुटुम्बं समाजं च प्रति स्वकीयं दायित्वं परिपालयितुं गच्छन्तं शिष्यम् आचार्यः कुलपतिः वा आदिशति उपदिशति च। सोऽयम् उपदेशः शिष्येण जीवनयात्रायां पाथेयरूपेण रक्षणीयः आचरणीयः च भवति ।

आचार्यः शिष्याय सद्विद्यायाः उत्पत्त्यै अनुष्ठेयानि सहजतया पालनीयानि कर्माणि उपदिशति । याः विद्याः अधीताः तासां शिष्यः स्वकीये सामाजिके जीवने अनुसरणम् अवश्यं कुर्यात् अथ च वेदेषु स्मृतिषु च कथितानां कर्मणां नित्यम् अनुष्ठानं कुर्यात् । इति अपेक्षापूर्त्यर्थममं पाठः।

---

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति ।**

**पदपाठः** - वेदम् (2.1) अनूच्य (अ) आचार्यः (1.1) अन्तेवासिनम् (2.1) अनुशास्ति (लट् 1.1)

**भावार्थः** वेदम् (श्रुत्यादयः विद्याः) अनूच्य (अनुवाद्य (अत्र अध्याप्य)) आचार्यः (स्वयम् आचरणं कुर्वाणः) अन्तेवासिनम् (गुरुकुलशिष्यम्) अनुशास्ति (आदिशति) । वेदेषु उक्तानि कर्तव्यानि पालनीयान् नियमान् च पाठयित्वा आचार्यः स्वयम् अपि तेषां वेदवाक्यानां पालनं कुर्वन् स्वस्य आचारद्वारा अपि गुरुकुले समीपस्थाय शिष्याय शिक्षां यच्छति । ग्रन्थग्रहणात् अनु पश्चात् शास्ति ग्रन्थे यद् अधीतं तस्य आचरणाय (शपथं/प्रतिज्ञां) ग्राहयति ।

(हे अन्तेवासिन्! शिष्य!)

**सत्यं वद ।**

**पदपाठः** सत्यम् (2.1) वद (लोट् 2.1)

**भावार्थः** सत्यम् (त्येन-तेन सहितम्/यावद् वस्तुतः ज्ञातं तथा-तथ्यम् इति सरलार्थः) वद (ब्रूहि) । यथाप्रमाणम् अवगतं तावत् तथा च वक्तव्यम् । सत्यवचनस्य व्रतस्य अनुष्ठानं कर्तव्यम् ।

**धर्मं चर ।**

**पदपाठः** धर्मम् (2.1) चर (लोट् 2.1)

**भावार्थः** धर्मम् (वेदादिषु उक्तम् शिष्टाचारादिकम् अनुष्ठेयम्) चर (जानीहि/आत्मसात् कुरु) यथा शास्त्रेषु पठितः धर्मः 'सत्यं वद, अहरहः सन्ध्याम् उपासीत' प्रतिदिनं सन्ध्या कर्तव्या इत्यादेः धर्मस्य सामान्यम् सहजतया अनुष्ठानं कर्तव्यम् ।

**स्वाध्यायान्मा प्रमदः ।**

**पदपाठः** (त्वम्) स्वाध्यायात् (5.1) मा (अ) प्रमदः (लुङ् 2.1)

**भावार्थः** (त्वया) अध्ययने प्रमादः आलस्यं न कर्तव्यम् ।

**सत्यान्न प्रमदितव्यम् ।**

**पदपाठः** (त्वया) सत्यात् (5.1) न (अ) प्रमदितव्यम् (1.1)

**भावार्थः** सत्यस्य पालने आलस्यं न कर्तव्यम् सत्यात् मार्गात् विचलनं न कर्तव्यम् । (भयेन अपेक्षया वा विस्मृत्य अपि असत्यं न वदनीयम् ।)

**धर्मान्न प्रमदितव्यम्।**

**पदपाठः** (त्वया) धर्मात् (5.1) न (अ) प्रमदितव्यम् (1.1)

**भावार्थः** धर्मस्य पालने अथवा नित्यकर्मानुष्ठाने प्रमादः न कर्तव्यः, अधर्माचरणं न कार्यम् ।

**कुशलान्न प्रमदितव्यम्।**

**पदपाठः** (त्वया) कुशलात् (5.1) न (अ) प्रमदितव्यम् (1.1)

**भावार्थः** आत्मरक्षणार्थकस्य कर्मणः विषये मन्दता न धारणीया । (शरीरमाद्यं खलु धर्मसाधनम्)

**भूत्यै न प्रमदितव्यम् ।**

**पदपाठः** (त्वया) भूत्यै (4.1 अत्र 5.1 अर्थे इति शाङ्करभाष्यटीका) न (अ) प्रमदितव्यम् (1.1)

**भावार्थः** अध्ययनस्य अध्यापनस्य च विषये प्रमादः न करणीयः, अर्थात् स्वाध्यायं प्रवचनं च नियमेन अवश्यं नित्यं करणीये एव ।)

**देवपितृकार्याभ्यां न प्रमदितव्यम् ।**

**पदपाठः** देवपितृकार्याभ्याम् (5.2) न (अ) प्रमदितव्यम् (1.1)

**भावार्थः** देवपूजा इति देवकार्यम् श्राद्धतर्पणादिकं च पितृकार्यम् इति एतयोः द्वयोः विषये आलस्यं न कर्तव्यम् ।

**मातृदेवो भव ।**

**पदपाठः** मातृदेवः (1.1) भव (लोट् 2.1)

**भावार्थः** माता देवः यस्य (कृते) सः तादृशः त्वं भूयाः - माता देववत् उपास्यः ।

**पितृदेवो भव ।**

**पदपाठः** पितृदेवः (1.1) भव (लोट् 2.1)

**भावार्थः** पिता देवः यस्य (कृते) सः तादृशः त्वं भूयाः - पिता देववत् उपास्यः ।

**आचार्यदेवो भव ।**

**पदपाठः** आचार्यदेवः (1.1) भव (लोट् 2.1)

**भावार्थः** आचार्य देवः यस्य (कृते) सः तादृशः त्वं भूयाः - आचार्यः देववत् उपास्यः ।

**अतिथिदेवो भव ।**

**पदपाठः** अतिथिदेवः (1.1) भव (लोट् 2.1)

**भावार्थः** अतिथिदेवः यस्य (कृते) सः तादृशः त्वं भूयाः अतिथिः देववत् उपास्यः ।

**यान्यनवद्यानि कर्माणि तानि सेवितव्यानि ।**

**पदपाठः** यानि (1.3) अनवद्यानि (1.3) कर्माणि (1.3) तानि (1.3) सेवितव्यानि (1.3) तेषाम् एव त्वया उपासनं सेवनं कर्तव्यम् ।

**भावार्थः** अन्यानि अपि यानि अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि भवेयुः ।

**नो इतराणि ।**

**पदपाठः** नो (अ) इतराणि (1.3)

**भावार्थः** इतरेषाम् अन्येषां निन्दितानाम् अशिष्टानां कर्मणां सेवनं न कर्तव्यम् ।

**यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि ।**

**पदपाठः** यानि (1.3) अस्माकम् (6.3) सुचरितानि (1.3) तानि (1.3) त्वया (3.1) उपास्यानि (1.3)

**भावार्थः** यानि अस्माकम् नः आचार्याणाम्, शोभनानि चरितानि वेदात् अविरुद्धानि; तेषाम् एव त्वया उपासनं सेवनं कर्तव्यम् ।

**नो इतराणि ।**

**पदपाठः** नो (अ) इतराणि (1.3)

**भावार्थः** इतरेषाम् अन्येषां दुश्चरितानाम् आचार्यकृतानामपि अशिष्टानां चरितानां सेवनं न कर्तव्यम् ।

**ये के चास्मच्छ्रेयांसो ब्राह्मणाः तेषां त्वयाऽऽसने न प्रश्वसितव्यम् ।**

**पदपाठः** ये (1.3) के (1.3) च (अ) अस्मत् (5.3) श्रेयांसः (1.3) ब्राह्मणाः (1.3) तेषाम् (6.3) त्वया (3.1) आसनेन (3.1) / आसने (7.1) न (अ) प्रश्वसितव्यम् (1.1)

**भावार्थः** ये केचन अस्मत्तः श्रेष्ठाः कल्याणकारकाः ब्रह्मविद्यायाः उपासकाः भवेयुः, तेभ्यः आसनदानादि द्वारा श्रमः दूरीकरणीयः अथवा गोष्ठीवार्तालापादीनाम् कृते (आसने न प्रश्वसितव्यम् आचार्याणाम् आसने उपविश्य त्वया विश्रामः न ग्रहणीयः अर्थात् केवलम् आचार्योक्तानाम् आज्ञानां पालनम् एव कर्तव्यम् ।

**श्रद्धया देयम् ।**

**पदपाठः** श्रद्धया (3.1) देयम् (1.1)

**भावार्थः** त्वया यदि किञ्चिद् कस्मैचित् दानं कर्तव्यं चेत् श्रद्धया एव कर्तव्यम् ।

**अश्रद्धयाऽदेयम्।**

**पदपाठः** अश्रद्धया (3.1) अदेयम् (1.1)

**भावार्थः** अश्रद्धया कदापि कस्मै अपि दानं न करणीयम्। (अन्यथा तत् 'असत्' इति उच्यते ।

**श्रिया देयम् ।**

**पदपाठः** श्रिया (3.1) देयम् (1.1)

**भावार्थः** यदि किञ्चिद् दानं कर्तव्यं चेत् विभूत्या - ऐश्वर्यानुसारम् एव कर्तव्यम् ।

**ह्रिया देयम् ।**

**पदपाठः** ह्रिया (3.1) देयम् (1.1)

**भावार्थः** यदि किञ्चिद् दानं कर्तव्यं चेत् लज्जया कर्तव्यम् । दानग्राहकं प्रति उपकारभावः धारणीयः ।

**भिया देयम्।**

**पदपाठः** भिया (3.1) देयम् (1.1)

**भावार्थः** किञ्चिद् दानं कर्तव्यं चेत् भिया कर्तव्यम् । परमात्मा सर्वं मानसं भावं श्रद्धां च जानाति इति प्रतिफलापेक्षा प्रत्युपकारापेक्षा न कर्तव्या किन्तु प्रभोः भीतिपूर्वकं दानं करणीयम्।

**संविदा देयम्।**

**पदपाठः** संविदा (3.1) देयम् (1.1)

**भावार्थः** किञ्चिद् दानं कर्तव्यं चेत् संविदा मैत्रीकरुणादिकार्येण एव कर्तव्यम्। (सात्त्विकदानविषये श्रीमद्भगद्गीतायाः 17.20 श्लोके सन्दर्भः ग्रहणीयः।)

**अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ।**

**पदपाठः** अथ (अ) यदि (अ) ते (6.1) कर्मविचिकित्सा (1.1) वा (अ) वृत्तविचिकित्सा (1.1) वा (अ) स्यात् (विधिर्लिङ् 1.1)

**भावार्थः** (हे अन्तेवासिन्) उपर्युक्तस्य आचरणस्य विषये वेदोक्तस्य स्मृत्युक्तस्य वा कर्मणः अनुष्ठानस्य विषये आचरणस्य विषये वा 'विचिकित्सा' अर्थात् संशयः उत्पन्नः भवति तर्हि किं करणीयम् इति अग्रे निर्देशं करोति आचार्यः ।

**ये तत्र ब्राह्मणाः सम्मर्शिनः ।**

**पदपाठः** ये (1.3) तत्र (अ) ब्राह्मणाः (1.3) सम्मर्शिनः (1.3)

**भावार्थः** तत्र देशे काले च 'युक्ताः' योग्याः विचारक्षमाः विद्योपासकाः;

**युक्ता आयुक्ताः ।**

**पदपाठः** युक्ताः (1.3) आयुक्ताः (अयुक्ताः इत्यस्य रूपान्तरम्) (1.3)

**भावार्थः** कर्मविषये आचरणविषये च अभियुक्ताः अपरैः प्रयुक्ताः योग्याः सम्मताः

**अलूक्षाः धर्मकामाः स्युः ।**

**पदपाठः** अलूक्षाः (1.3) धर्मकामाः (1.3) स्युः (विधिलिङ् 1.3)

**भावार्थः** अक्रूरमतयः अकठोराः मृदुस्वभावाः अदृष्टार्थिनः धर्मपालनस्वभावाः कामेन अहताः भवेयुः ।

**यथा ते तत्र वर्तेरन् । तथा तेषु वर्तेथाः ।**

**पदपाठः** यथा (अ) ते (1.3) तत्र (अ) वर्तेरन् (विधिर्लिङ् 1.3) तथा (अ) तेषु (7.3) वर्तेथाः (विधिलिङ् 2.1)

**भावार्थः** तादृशाः ब्रह्मज्ञानिनः येन प्रकारेण तस्मिन् (तव कृते सन्देहयुक्ते) कर्मणि वृत्ते वा आचरणं कुर्युः तथा त्वमपि वर्तनम् युक्तानाम् आचार्याणाम् अनुसरणं कुर्याः ।

**एष आदेशः । एष उपदेशः । एतदनुशासनम् ।**

**पदपाठः** एषः (1.1) आदेशः (1.1) एषः (1.1) उपदेशः (1.1) एतत् (1.1) अनुशासनम् (1.1)

**भावार्थः** अयम् आदेशः – विधिः/कर्तव्यम् अस्ति । पित्रादीनाम् अयम् उपदेशः अस्ति पुत्रादीनां कृते । एतद् एव वेदस्य अर्थरूपं साररूपं वा रहस्यम् अस्ति ।

**एवमुपासितव्यम् ।**

**पदपाठः** एवम् (अ) उपासितव्यम् (1.1)

**भावार्थः** तस्मात् कारणात् उक्तप्रकारेण उपासनायुक्तम् अनुष्ठानं करणीयम् ।

**एवमु चैतदुपास्यम्।**

**पदपाठः** एवम् (अ) उ (अ) च (अ) एतत् (1.1) उपास्यम् (1.1)

**भावार्थः** (हे शिष्य! त्वया) एवम् - अनया रीत्या, उ - निश्चयेन च - एवम् उपासनीयम् अर्थात् न उपासनीयम् इति न ।। (उपदेशस्य आदेशस्य च दृढीकरणार्थं द्वितीयवारं वचनम् अस्ति।)

## स्वाध्यायः

**1. बहुविकल्पप्रश्नाः ।**

(१) संस्कृतिः' इति पदं कति संस्काराणां स्मरणं कारयति?

(क) 4 (ख) 8 (ग) 16 (घ) 32

(2) अयं पाठांशः कुतः गृहीतः?

(क) तैत्तरीयोपनिषदः (ख) ऋग्वेदात् (ग) पुराणात् (घ) कठोपनिषदः

(3) के आचार्याः वेदवाक्यानां विवरणं प्रस्तुवन्ति?

(क) गुरुशिष्यपरम्परायाः (ख) स्नातकाः (ग) मीमांसादर्शनस्य (घ) एतेषु नैकमपि

(4) कस्य व्रतस्य अनुष्ठानं कर्तव्यम्?

(क) सत्यवचनस्य (ख) धर्मवचनस्य (ग) प्रमत्तवचनस्य (घ) अधर्मवचनस्य

(5) आचार्यः छात्रं कथं सम्बोधयति?

(क) हे विद्यार्थिन् (ख) हे छात्र (ग) हे अन्तेवासिन् (घ) हे आचार्य

(6) अश्रद्धया कृतं दानम् उच्यते;

(क) सात्त्विकम् (ख) राजसम् (ग) तामसम् (घ) 'असत्'

(७) 'अलूक्षाः' इत्यस्य कः अर्थः?

(क) मुक्ताः (ख) युक्ताः (ग) धर्मकामाः (घ) अक्रूरमतयः

**2. रिक्तस्थानं पूरणीयम् ।**

| **वाक्यम्** | **भावार्थः** |
|---|---|
| (1) मातृदेवः | (1) ................ |
| (2) पितृदेवः | (2) ................ |
| (3) आचार्यदेवः | (3) ................ |
| (4) अतिथिदेवः | (4) ................ |
| (5) श्रद्धया | (5) ................ |
| (6) अश्रद्धया | (6) ................ |

**3. एकैकवाक्यद्वारा उत्तराणि ( अतिलघूत्तराणि ) लेख्यानि ।**

(1) अनूच्य अर्थात् किम्?

(2) अन्तेवासिनं कः अनुशास्ति?

(3) किं चर?

(4) काभ्यां कार्याभ्यां न प्रमदितव्यम्?

(5) विचिकित्सा इत्यस्य कः अर्थः?

(6) तत्र के संमर्शिनः?

(7) अनुशासनम् इत्यस्य अत्र कः अर्थः?

**4. सन्दर्भसहितः भावार्थो लेख्यः**

(1) सत्यान्न प्रमदितव्यम् ।

(2) कुशलान्न प्रमदितव्यम् ।

**5. सविस्तरम् उत्तरं लेख्यम् ।**

(1) अस्मिन् पाठे दानविषये यः उपदेशः सः विस्तारपूर्वकं लेख्यः ।

(2) अस्मिन् पाठे श्रीमद्भगवद्गीताया उद्धरणस्य निर्देशः कुत्र, किमर्थं च? इति लेख्यम् ।

**6. सूचनानुसारं लेख्यम् ।**

(1) आचार्यः देववत् उपास्यः (मूलम् उपनिषद्वाक्यं लेख्यम्)

(2) वेदमनूच्याचार्योन्तेवासिनमनुशास्ति (अर्थसहितं सन्धिविग्रहो लेख्यः)

(3) उ (कस्मिन् अर्थे?)

(4) नो इतराणि (सन्दर्भम् अर्थं च प्रदर्शयतु)

(5) आदेशः (अर्थो लेख्यः)

## शिक्षकप्रवृत्तिः

वर्णनद्वारा दीक्षान्तसमारोहस्य परिचयं कारयेयुः ।

शिष्टाचारविषये आचारविषये वा विविधान् सन्दर्भान् बोधकथाः च कथयेयुः ।

मैत्री - करुणा - मुदितोपेक्षाणां विषये योगसूत्रसन्दर्भं सरलया गिरा कथयेयुः ।

श्रीमद्भगवद्गीतायाः सप्तदशाध्याये कथितानां दानानां प्रकारान् वर्णयेयुः ।

## छात्रप्रवृत्तिः

तन्मे मनः शिवसङ्कल्पमस्तु इति मनसि निधाय सत्यस्य महत्त्वं सत्यमेव जयते इति विषये बोधकथाः च कथयेयुः ।

संस्कारविषये जिज्ञासां कुर्युः । पाठांशानुसारं जीवने आचरणं कर्तुं प्रयत्नं कुर्युः ॥

●

# 3. ऋतुवर्णनम्

संस्कृतकाव्यनाटकेषु ब्रह्मदेवस्य इव कवीनाम् अपरा कल्पनासृष्टिः विलसति । प्रायः सर्वे कवयः स्वीयेषु काव्येषु नाटकेषु च प्रकृतिवर्णनसमये रात्रिवर्णनम्, वनवर्णनम्, तथैव ऋतुवर्णनमपि कुर्वन्ति । तत्र एकस्मिन् वर्षे ऋतुचक्रे षड् ऋतवः भवन्ति, हेमन्तः शिशिरः वसन्तः ग्रीष्मः वर्षा शरद् चेति । एते षड् ऋतवः वेदवर्णिताः सन्ति । अत्र प्रावृट् (वर्षा) शरद् चेति ऋतुद्वयं स्त्रीलिङ्गे अस्ति । भारतीयसंस्कृतौ ये उत्सवाः सन्ति, ते ऋतुचक्रम् अनुसृत्य शारीरिकं स्वास्थ्यं च संलक्ष्य एव ऋषिभिः निर्धारिताः सन्ति । अर्थात् अत्र वेदाः पुराणानि ज्योतिषम् आयुर्वेदः इति अनेकेषां विषयाणां दृष्टिकोणः जीवमात्रकल्याणबुद्ध्या सम्बद्धः भवति।

प्रस्तुतः पाठः श्रीमद्भागवतमहापुराणस्य दशमस्कन्धात् पूर्वार्धाद्विंशाध्यायाद् गृहीतः अस्ति । येन वयं ज्ञातुं प्रभवामः यत् साहित्यशास्त्रस्य बीजतत्त्वानि वेदेषु पुराणेषु चापि वर्तन्ते । एतस्य अध्ययनेन अस्मिन् यन्त्रयुगेऽपि बालाः प्रकृतिरक्षणाय पर्यावरणरक्षणाय सन्नद्धाः जागृताः च भवन्तु इति आशयः अस्ति ।

---

शुक उवाच

**तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः ।**
**गोपाः स्त्रीभ्यः समाचख्युः प्रलम्बवधमेव च ।। 1 ।।**

**पदच्छेदः** शुकः (1.1) उवाच (लिट् 1.1) । तयोः (2.6) तत् (1.1) अद्भुतम् (1.1) कर्म (1.1) दावाग्नेः (5.1) मोक्षम् (2.1) गोपाः (1.3) स्त्रीभ्यः (4.1) समाचख्युः (लिट् 3.1) प्रलम्बवधम् (2.1) एव (अ) च (अ) ।। 1 ।।

**अन्वयः** गोपाः स्त्रीभ्यः आत्मनः दावाग्नेः मोक्षभ्यः एव तयोः तत् अद्भुतं कर्म प्रलम्बवधम् च समाचख्युः ॥1॥

**पदार्थः** शुकः (व्यासपुत्रः) उवाच (उक्तवान्) । तयोः (कृष्णबलरामयोः) तत् (अदः) अद्भुतम् (अभूतपूर्वम्) कर्म (कार्यम्) दावाग्नेः (वनपावकस्य) मोक्षम् (मुक्तिम्) गोपाः (गोपालकाः) स्त्रीभ्यः (नारीभ्यः) समाचख्युः (कथितवन्तः) प्रलम्बवधम् (तन्नामकस्य असुरस्य संहारम्) एव (एवम्) च (तथा) ॥1॥

**भावार्थः** शुकदेवः कथयति हे परीक्षित्! गोपाबालकाः स्व स्व गृहं गत्वा, मातरः ! कृष्णबलरामयोः पराक्रमद्वारा वयं वनपावकात् रक्षिताः तथा च प्रलम्बासुरस्य त्रासात् अपि मुक्ताः इति वृत्तान्तं वर्णितवन्तः ॥1॥

**गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः ।**
**मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ।। 2 ।।**

**पदच्छेदः** गोपवृद्धाः (1.3) च (अ) गोप्यः (1.3) च (अ) तद् (2.1) उपाकर्ण्य (अ) विस्मिताः (1.3) मेनिरे (लिट् 1.3) देवप्रवरौ (2.2) कृष्णरामौ (2.2) व्रजम् (2.1) गतौ (2.2) ॥

**अन्वयः** तत उपाकर्ण्य विस्मिताः गोपवृद्धाः गोप्यः च व्रजं गतौ रामकृष्णौ देवप्रवरौ मेनिरे ॥2॥

**पदार्थः** गोपवृद्धाः (जरद्गोपालकाः/ज्येष्ठगोपालाः) च (तथा) गोप्यः (गोपिकाः) च (तथा) तद् (अदः) उपाकर्ण्य (श्रुत्वा) विस्मिताः (आश्चर्यचकिताः) मेनिरे (ज्ञातवन्तः) देवप्रवरौ (अमरमुख्यौ) कृष्णरामौ (रामकृष्णौ) व्रजम् (गोकुलम्) गतौ (यातौ) ।। 2 ।।

**भावार्थः** प्रथमश्लोके वर्णितं वृत्तान्तं श्रुत्वा बृहद्वयस्काः गोपाः गोपिकाः च आश्चर्ययुक्ताः भूत्वा गोकुले विद्यमानौ इमौ कृष्णबलरामौ देवेषु मुख्यौ धारितवन्तः ।। 2 ।।

**ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमुद्भवा ।**
**विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ।। 3 ।।**

**पदच्छेदः** ततः (अ) प्रावर्तत (लङ् 1.1) प्रावृट् (1.1) सर्वसत्वसमुद्भवा (1.1) विद्योतमानपरिधिः (1.1) विस्फूर्जितनभस्तला (1.1) ।। 3 ।।

**अन्वयः** ततः विद्योतमानपरिधिः विस्फूर्जितनभस्तला सर्वसत्वसमुद्भवा प्रावृट् प्रावर्तत ।। 3 ।।

**पदार्थः** ततः (ग्रीष्मानन्तरम्) प्रावर्तत (प्राभवत्) प्रावृट् (वर्षाकालः/वर्षा–ॠतुः) सर्वसत्वसमुद्भवा (समस्तसारसमुत्पन्ना) विद्योतमानपरिधिः (देदीप्यमानः परिवेशः परितः भागः) विस्फूर्जित–नभस्तला (प्रकाशपुञ्जयुक्तं कृतं गगनाङ्गनं यया तादृशी) ।। 3 ।।

**भावार्थः** आतपानन्तरं देदीप्यमानेन परिसरेण युक्तः तथा च चमत्कृतियुक्तेन आकाशस्तरेण सहितः सर्वेषां जन्तूनाम् उत्पत्तिकारणरूपस्य वर्षाकालस्य प्रारम्भः अभवत् ।। 3 ।।

**सान्द्रनीलाम्बुदैर्व्योम सविद्युत्स्तनयित्नुभिः ।**
**अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ।। 4 ।।**

**पदच्छेदः** सान्द्रनीलाम्बुदैः (3.3) व्योम (1.1) सविद्युत्स्तनयित्नुभिः (3.3) । अस्पष्टज्योतिः (1.1) आच्छन्नम् (1.1) ब्रह्म (1.1) इव (अ) सगुणम् (1.1) बभौ (लिट् 1.1) ।। 4 ।।

**अन्वयः** सविद्युत्स्तनयित्नुभिः सान्द्रनीलाम्बुदैः आच्छन्नम् अस्पष्टज्योतिः व्योम सगुणं ब्रह्म इव बभौ ।। 4 ।।

**पदार्थः** सान्द्रनीलाम्बुदैः (परिपूर्णैः श्याममेघैः) व्योम (गगनम्) सविद्युत्स्तनयित्नुभिः (तडिद्भिः युक्तैः मेघैः) अस्पष्टज्योतिः (यत्र प्रकाशः अस्फुटः/न्यूनः भवति) आच्छन्नम् (आवृतम्) ब्रह्म (शारीरिकम्/परमात्मतत्त्वम्) इव (यथा) सगुणम् (गुणसहितम्/मूर्तिमत्/प्रत्यक्षम्) बभौ (शोभते स्म) ।। 4 ।।

**भावार्थः** दामिनीनां/तडितां चमत्कारैः युक्तैः श्याममेघाडम्बरैः च आच्छादितं गगनम् अस्पष्टप्रकाशयुक्तं सगुणं/प्रत्यक्षं (सत्वं रजः तमः इति त्रयः गुणाः) ब्रह्मत्वम् इव प्रतिभाति स्म ।। 4 ।।

**अष्टौ मासान् निपीतं यद् भूम्याश्चोदमयं वसु ।**
**स्वगोभिर्भोक्तुमारेभे पर्जन्यः काल आगते ।। 5 ।।**

**पदच्छेदः** अष्टौ (2.2) मासान् (2.2) निपीतम् (1.1) यत् (1.1) भूम्याः (5.1) च (अ) उदमयम् (1.1) वसु (1.1) । स्वगोभिः (3.3) भोक्तुम् (अ) आरेभे (लिट् 1.1) पर्जन्यः (1.1) काले (7.1) आगते (7.1) ।। 5 ।।

**अन्वयः** भूम्याः अष्टौ मासान् स्वगोभिः यत् उदमयं वसु निपीतं (तत्) पर्जन्यः काले आगते च मोक्तुम् आरेभे ।। 5 ।।

**पदार्थः** अष्टौ (वसुसङ्ख्यान्) मासान् (द्विगुणपक्षान्/अत्र १६ पक्षान्) निपीतम् (परिपूर्णम्) यत् (यावत्परिमितम्) भूम्याः (पृथिव्याः) च (तथा) उदमयम् (जलरूपम्) वसु (धनम्/अष्टवसुरूपं/जलरूपम् सत्वम्) स्वगोभिः (निजकिरणैः) तत् (अदः) मोक्तुम् (त्यक्तुम्/प्रदातुम्) आरेभे (आरम्भं कृतवान्) पर्जन्यः (वृष्टिः) काले (समये) आगते (आयाते) ।। 5 ।।

**भावार्थः** पृथिव्याः अष्टमासपर्यन्तं सूर्येण स्वकिरणैः यत् (जलं) निपीतं (तत्) जलम् अस्मिन् वर्षाकाले आगते बाहुल्येन वर्षति ।। 5 ।।

**तडित्वन्तो महामेघाश्चण्डश्वसनवेपिताः ।**
**प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव ।। 6 ।।**

**पदच्छेदः** तडित्वन्तः (1.3) महामेघाः (1.3) चण्डश्वसनवेपिताः (1.3) । प्रीणनम् (2.1) जीवनम् (2.1) हि (अ) अस्य (6.1) मुमुचुः (लिट् 1.3) करुणाः (1.3) इव (अ) ।। 6 ।।

**अन्वयः** तडित्वन्तः चण्डश्वसनवेपिताः महामेघाः करुणा इव अस्य हि प्रीणनं जीवनं मुमुचुः ।। 6 ।।

**पदार्थः** तडित्वन्तः (विद्युत्सहिताः) महामेघाः (बृहद्घनाः) चण्डश्वसनवेपिताः (घोरपवनकम्पिताः) । प्रीणनम् (प्रसन्नताम्) जीवनम् (जलम्) हि (निश्चयेन) अस्य (एतस्य) मुमुचुः (मुक्तवन्तः) करुणाः (अनुकम्पिताः/दयान्विताः) इव (यथा) ।। 6 ।।

**भावार्थः** विद्युत्सहिताः प्रचण्डवायुभिः कम्पिताः महामेघाः दयालुजनसदृशाः अस्य जगतः सर्वजीवेभ्यः (वृक्षवनस्पतयः अपि जीवयुक्ताः) निश्चयेन प्रसन्नतादायकं जलरूपं जीवनं दत्तवन्तः ।। 6 ।।

**तपःकृशा देवमीढा आसीद् वर्षीयसी मही ।**
**यथैव काम्यतपसस्तनुः सम्प्राप्य तत्फलम् ।। 7 ।।**

**पदच्छेदः** तपःकृशा (1.1) देवमीढा (1.1) आसीत् (लङ् 1.1) वर्षीयसी (1.1) मही (1.1) । यथा (अ) एव (अ) काम्यतपसः (6.1) तनुः (1.1) सम्प्राप्य (अ) तत्फलम् (2.1) ।। 7 ।।

**अन्वयः** यथा काम्यतपसः तनुः तत् फलं सम्प्राप्य तपःकृशा देवमीढा मही वर्षीयसी आसीत् ।। 7 ।।

**पदार्थः** तपःकृशा (तपस्यया दुर्बला) देवमीढा (शुष्का) आसीत् (अभवत्) वर्षीयसी (सस्यसम्पन्ना) मही (पृथ्वी) । यथा (यया रीत्या/यादृशी) एव (निश्चितम्) काम्यतपसः (सकामतपस्यायाः तनुः (शरीरम्) सम्प्राप्य (लब्ध्वा) तत्फलम् (अमुष्य परिणामं/तपः परिणामम्) ।। 7 ।।

**भावार्थः** यथा सकामतपसा (तपस्विजनस्य) शरीरं पूर्वं कृशं भवति, ततः तस्य तपसः फलं लब्ध्वा पुष्टतां लभते तथैव सूर्यातपेन शुष्का देवमीढा (देवमीढनाम्नः यादवस्य) पृथ्वी वर्षाकारणेन हरिता हृष्टपुष्टा अभवत्॥ 7॥

**निशामुखेषु खद्योतास्तमसा भान्ति न ग्रहाः ।**
**यथा पापेन पाखण्डा न हि वेदाः कलौ युगे ।। 8 ।।**

**पदच्छेदः** निशामुखेषु (7.3) खद्योताः (1.3) तमसा (3.1) भान्ति (लट् 1.3) न (अ) ग्रहाः (1.3) । यथा (अ) पापेन (3.1) पाखण्डाः (1.3) न (अ) हि (अ) वेदाः (1.3) कलौ (7.1) युगे (7.1) ।। 8 ।।

**अन्वयः** यथा कलौ युगे पापेन पाखण्डाः भान्ति न वेदाः (तथैव) निशामुखेषु तमसा खद्योताः (भान्ति) न हि ग्रहाः ।। 8 ।।

**पदार्थः** निशामुखेषु (प्रदोषेषु/सायम्) खद्योताः (स्फुर्लिङ्गकाः/प्रकाशितजन्तवः/'जुगनु' 'आगिया' इति भाषायाम् – कीटविशेषाः) तमसा (अन्धकारेण) भान्ति (दीप्ताः भवन्ति/प्रकाशन्ते) न (नो) ग्रहाः (सूर्यादयः) –। यथा (येन प्रकारेण) पापेन (किल्बिषेण/दुरितेन) पाखण्डाः (आडम्बरिणः/दम्भिनः) न (नो) हि (अवश्यम्) वेदाः (श्रुतयः) कलौ (कलिनामके) युगे (कालखण्डे) ।। 8 ।।

**भावार्थः** यथा कलियुगे दुष्कृत्यानां बाहुल्येन पाखण्डानां प्रभावः भवति न तु वेदानाम्; तथैव सायंकाले अन्धकारे दीप्तजन्तवः प्रकाशन्ते न तु ग्रहाः ।। 8।।

**श्रुत्वा पर्जन्यनिनदं मण्डूका व्यसृजन् गिरः ।**
**तूष्णीं शयानाः प्राग् यद्वद् ब्राह्मणा नियमात्यये ।।9।।**

**पदच्छेदः** श्रुत्वा (अ) पर्जन्यनिनदम् (2.1) मण्डूकाः (1.3) व्यसृजन (लङ् 1.3) गिरः (2.3) । तूष्णीम् (अ) शयानाः (1.3) प्राक् (अ) यद्वद् (अ) ब्राह्मणाः (1.3) नियमात्यये (7.1)।।

**अन्वयः** यद्वद् नियमात्यये ब्राह्मणाः (अध्ययनरताः भवेयुः, तथैव) प्राक् तूष्णीं शयानाः मण्डूकाः पर्जन्यनिनदं श्रुत्वा गिरः व्यसृजन् ।। 9।।

**पदार्थः** श्रुत्वा (आकर्ण्य) पर्जन्यनिनदम् (वर्षाध्वनिम्) मण्डूकाः (भेकाः/दर्दुराः) व्यसृजन् (मुक्तवन्तः/उक्तवन्तः) गिरः (वाणीः) । तूष्णीम् (मौनम्/जोषम्) शयानाः (शयनं कुर्वाणाः) प्राक् (पूर्वम्) यद्वद् (यथा) ब्राह्मणाः (विद्योपासकाः) नियमात्यये (कर्तव्यभङ्गे)।।

**भावार्थः** पूर्वे गुरोः ध्यानावस्थासमये प्रशान्ताः निद्राधीनाः ब्रह्मचारिजनाः (शिष्याः); गुरोः ध्यानानन्तरम् अध्ययनरताः भवन्ति तथैव पर्जन्यध्वनिं (वर्षाघोषं) श्रुत्वा दर्दुराः ड्राँऊँ ड्राँऊँ इति ध्वनिं कृतवन्तः ।।9।।

**आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः ।**
**पुंसो यथास्वतन्त्रस्य देहद्रविणसम्पदः ।। 10 ।।**

**पदच्छेदः** आसन् (लङ् 1.3) उत्पथवाहिन्यः (1.3) क्षुद्रनद्यः (1.3) अनुशुष्यतीः (2.1) । पुंसः (6.1 यथा (अ) अस्वतन्त्रस्य (6.1) देहद्रविणसम्पदः (1.3) ।। 10 ।।

**अन्वयः** यथा अस्वतन्त्रस्य पुंसः देहद्रविणसम्पदः उत्पथवाहिन्यः आसन् (तथा) अनुशुष्यतीः क्षुद्रनद्यः आसन् ।। 10 ।।

**पदार्थः** आसन् (अवर्तन्त) उत्पथवाहिन्यः (उर्ध्वमार्गगामिन्यः) क्षुद्रनद्यः (लघुसरितः) अनुशुष्यतीः (अल्पतोयाः)/शुष्का इव) पुंसः (मनुष्यस्य) यथा (यया रीत्या) अस्वतन्त्रस्य (पराधीनस्य) देहद्रविणसम्पदः (शरीरधनसम्पत्तयः) ।। 10 ।।

**भावार्थः** यथा परतन्त्रस्य जनस्य शरीरं द्रव्यसम्पत्तयः च उत्पथवाहिन्यः अभवन् तथैव शुष्काः अल्पतोयाः वा लघुसरितः अपि उत्पथगामिन्यः अभवन् ।। 10 ।।

**हरिता हरिभिः शष्पैरिन्द्रगोपैश्च लोहिता ।**
**उच्छिलीन्ध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ।। 11 ।।**

**पदच्छेदः** हरिता (1.1) हरिभिः (3.3) शष्पैः (3.3) इन्द्रगोपैः (3.3) च (अ) लोहिता (1.1) ।उच्छिलीन्ध्रकृतच्छाया (1.1) नृणाम् (6.3) श्रीः (1.1) इव (अ) भूः (1.1) अभूत् (लुङ् 1.1) ।। 11 ।।

**अन्वयः** हरिभिः शष्पैः हरिता इन्द्रगोपैः लोहिता च उच्छिलीन्ध्रकृतच्छाया नृणां श्रीः इव भूः अभूत् ।।

**पदार्थः** हरिता (शुकवर्णा) हरिभिः (हरितवर्णयुक्तैः) शष्पैः (सस्यैः/धान्यैः) इन्द्रगोपैः (लोहितवर्णैः कीटैः) च (तथा) लोहिता (रक्तवर्णा) ।उच्छिलीन्ध्रकृतच्छाया (छत्राकैः मशरूम इति आङ्गले विहितश्वेतच्छाया) नृणाम् (मनुष्याणाम्) श्रीः (सम्पत्तिः) इव (यथा) भूः (पृथ्वी) अभूत् (जाता) ।। 11 ।।

**भावार्थः** हरिततृणाङ्कुरैः हरिता शुकसदृशरङ्गरञ्जिता तथा च इन्द्रगोपैः अर्थात् वर्षाकाले पृथिव्यां घासे वा दृश्यमानैः रक्तवर्णैः कीटविशेषैः रक्तवर्णा तथा च उच्छिलीन्ध्रैः कृषेः अनन्तरं मृत्तिकाम् उद्भिद्य लघुछत्राकार-वनस्पतिद्वारा श्वेतच्छायायुक्ता पृथिवी मनुष्याणां सम्पत्तिसदृशी जाता ।।

**क्षेत्राणि सस्यसम्पद्भिः कर्णकाणां मुदं ददुः ।**

**धनिनामुपतापं च दैवाधीनमजानताम् ।। 12 ।।**

**पदच्छेदः** क्षेत्राणि (1.3) सस्यसम्पद्भिः (3.3) कर्षकाणाम् (6.3) मुदम् (2.1) ददुः (लिट् 1.3) । धनिनाम् (6.3) उपतापम् (2.1) च (अ) दैवाधीनम् (2.1) अजानताम् (6.3) ।। 12 ।।)

**अन्वयः** सस्यसम्पद्भिः क्षेत्राणि कृषकेभ्यः मुदं ददुः दैवाधीनम् अजानताम् धनिनाम् उपतापं च ददुः ।। 12 ।।

**पदार्थः** क्षेत्राणि (केदाराः) सस्यसम्पद्भिः (धान्यधनेन) कर्षकाणाम् (कृषकाणाम्) मुदम् (हर्षम्) ददुः (अर्पयामासुः) धनिनाम् (श्रेष्ठिनाम्/ऋणदायकानाम्) उपतापम् (मनःपीडाम्) च (तथा) दैवाधीनम् (भाग्याधारितम्) अजानताम् (न अवगच्छताम्) ।। 12 ।।

**भावार्थः** सस्यसम्पद्भिः कृषिक्षेत्राणि कृषकेभ्यः हर्षम् अयच्छन् किन्तु सर्वं भाग्याधीनम् इति विचार्य प्रमादिनां निष्क्रियाणाम् अज्ञानिनां तथा च धनिकानां मानसे परितापम् उत्पादितवती ।। 12 ।।

**जलस्थलौकसः सर्वे नववारिनिषेवया ।**

**अबिभ्रद् रुचिरं रूपं यथा हरिनिषेवया ।। 13 ।।**

**पदच्छेदः** जलस्थलौकसः (1.3) सर्वे (1.3) नववारिनिषेवया (3.1) । अबिभ्रत् (अपाणिनीयं पदम्/आर्षप्रयोगः अबिभः लङ् 1.1 इति पाणिनीयम्) रुचिरम् (2.1) रूपम् (2.1) यथा (अ) हरिनिषेवया (3.1) ।। 13 ।।

**अन्वयः** यथा हरिनिषेवया (भक्ताः) रुचिरं रूपं (तथा) नववारिनिषेवया सर्वे जलस्थलौकसः रुचिरं रूपम् अबिभ्रत ।। 13 ।।

**पदार्थः** जलस्थलौकसः (सलिले भूमौ च निवासकर्तारः) सर्वे (समस्ताः) नववारिनिषेवया (जलस्य पूर्णतया सेवनेन) । अबिभ्रत् (धारितवन्तः) रुचिरम् (रम्यम्) रूपम् (दर्शनीयम्/दृश्यम्) यथा (यया रीत्या) हरिनिषेवया (विष्णोः पूर्णभजनेन) ।। 13 ।।

**भावार्थः** यथा हरेः पूजनार्चनेन भक्ताः पुष्टतां प्राप्य रम्यं स्वरूपं धारितवन्तः तथैव नूतनजलसेवनेन सर्वे जलचराः भूचराः च सुन्दरं स्वरूपम् अधारयन् ।। 13 ।।

**सरिद्भिः सङ्गतः सिन्धुश्चुक्षुभे श्वसनोर्मिमान् ।**

**अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग् यथा ॥ 14 ॥**

**पदच्छेदः** सरिद्भिः सङ्गतः (1.1) सिन्धुः (1.1) चुक्षुभे (कर्मणि लिट् 1.1) श्वसनोर्मिमान् (1.1) । अपक्वयोगिनः (6.1) चित्तम् (1.1) कामाक्तम् (1.1) गुणयुक् (1.1) यथा (अ) ।। 14 ।।

**अन्वयः** यथा अपक्वयोगिनः गुणयुक्तचित्तं कामाक्तं (तथा) श्वसनोर्मिमान् सिन्धुः सरिद्भिः सङ्गतः चुक्षुभे ॥ 14 ॥

**पदार्थः** सरिद्भिः (नदीभिः) सङ्गतः (संयुक्तः) सिन्धुः (समुद्रः) चुक्षुभे (क्षुब्धः) श्वसनोर्मिमान् (पवनैः

तरङ्गयुक्तः) ।अपक्वयोगिनः (साधनारम्भं कृतवतः साधकस्य) चित्तम् (मनः) कामाक्तम् (वासनापरिपूर्णम्) गुणयुक् (सत्त्वादिभिः सहितम्) यथा (इव) ।। 14 ।।

**भावार्थः** यथा योगमार्गे प्रवेशं कुर्वतः साधकस्य गुणैः युक्तं चित्तं कामासक्तं भवति तदा विक्षिप्तं स्यात् तथैव वायुना तरङ्गयुक्तः सागरः नदीनां समप्रभावात् उच्छृङ्खलताम् अनुभवति स्म ।। 14 ।।

**गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः ।**
**अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः ।। 15 ।।**

**पदच्छेदः** गिरयः (1.3) वर्षधाराभिः (3.3) हन्यमानाः (1.3) न (अ) विव्यथुः (लिट् 1.3) । अभिभूयमानाः (1.1) व्यसनैः (3.3) यथा (अ) अधोक्षजचेतसः (1.3) ।। 15 ।।

**अन्वयः** यथा व्यसनैः अभिभूयमानाः अधोक्षजचेतसः (न विव्यथुः) तथा वर्षधाराभिः हन्यमानाः गिरयः न विव्यथुः ।। 15 ।।

**पदार्थः** गिरयः (पर्वताः) वर्षधाराभिः (वृष्टिपातैः/वर्षाप्रवाहैः) हन्यमानाः (आधातयुक्ताः) न (नो) विव्यथुः (व्यथिताः) । अभिभूयमानाः (पराभूताः/वशीभूताः) व्यसनैः (छन्दैः) यथा (इव) अधोक्षजचेतसः (विष्णुमनस्काः) ।। 15 ।।

**भावार्थः** यथा भगवत्सेवायां निरताः जनाः व्यसनैः दुःखानुभवं न कुर्वन्ति, व्यथां न अनुभवन्ति, तथैव वर्षधाराभिः हन्यमानाः पर्वताः दुःखानुभूतिं न अकुर्वन् । ।। 15 ।।

**मार्गा बभूवुः सन्दिग्धास्तृणैश्छन्ना ह्यसंस्कृताः ।**
**नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ।। 16 ।।**

**पदच्छेदः** मार्गाः (1.3) बभूवुः (लिट् 1.3) सन्दिग्धाः (1.3) तृणैः (3.3) छन्नाः (1.3) हि (अ) असंस्कृताः (1.3) न (अ) अभ्यस्यमानाः (1.3) श्रुतयः (1.3) द्विजैः (3.3) कालहताः (1.3) इव (अ) ॥ 16 ॥

**अन्वयः** द्विजैः न अभ्यस्यमानाः कालहताः श्रुतयः इव मार्गाः सन्दिग्धाः तृणैः छन्नाः हि असंस्कृताः बभूवुः ।। 16 ।।

**पदार्थः** मार्गाः (पन्थानः) बभूवुः (जाताः) सन्दिग्धाः (सन्देहयुक्ताः) तृणैः (घासैः) छन्नाः (आच्छादिताः/गुप्ताः) हि (तु) असंस्कृताः (संस्काररहिताः) न (नो) अभ्यस्यमानाः (शिक्षमाणाः) श्रुतयः (वेदाः) द्विजैः (विप्रैः) कालहताः (समयनष्टाः) इव (यथा) ।। 16 ।।

**भावार्थः** यथा वेदपाठकाः बहुकालपर्यन्तम् अभ्यासम् (आवर्तनम्) त्यजन्ति तर्हि वेदमन्त्राः विस्मृताः अथवा सन्देहयुक्ताः (उच्चारणदोषयुक्ताः वा) भवन्ति तथैव घासैः आच्छादिताः मार्गाः निश्चयेन असंस्कृताः असमान्तराः नतोन्नताः गर्तयुक्ताः वा जाताः ।। 16 ।।

**लोकबन्धुषु मेघेषु विद्युतश्चलसौहृदाः ।**
**स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥17॥**

**पदच्छेदः** लोकबन्धुषु (7.3) मेघेषु (7.3) विद्युतः (1.3) चलसौहृदाः (1.3) स्थैर्यम् (2.1) न (अ) चक्रुः (लिट् 1.3) कामिन्यः (1.3) पुरुषेषु (7.3) गुणिषु (7.3) इव (अ) ।। 17 ।।

**अन्वयः** गुणिषु पुरुषेषु कामिन्यः इव चलसौहृदाः विद्युतः लोकबन्धुषु मेघेषु स्थैर्यं न चक्रुः ।। 17 ।।

**पदार्थः** लोकबन्धुषु (जनमित्रेषु) मेघेषु (जलघरेषु) विद्युतः (तडितः/दामिन्यः) चलसौहृदाः (चञ्चलसख्याः)। स्थैर्यम् (स्थिरताम्) न (नो) चक्रुः (विदधुः/कृतवत्यः) कामिन्यः (सुन्दर्यः/नार्यः) पुरुषेषु (नरेषु) गुणिषु (गुणयुक्तेषु) इव (यथा) ।। 17 ।।

**भावार्थः** यथा कामिन्यः गुणिषु पुरुषेषु स्थिरतां न अनुभवन्ति तथैव चलायमानमित्रतायुक्ताः तडितः लोकमित्रेषु जलधरेषु स्थिरतां न कृतवत्यः ।। 17 ।।

**धनुर्वियति माहेन्द्रं निर्गुणं च गुणिन्यभात् ।**

**व्यक्ते गुणव्यतिकरेऽगुणवान् पुरुषो यथा ।। 18 ।।**

**पदच्छेदः** धनुः (1.1) वियति (7.1) माहेन्द्रम् (1.1) निर्गुणम् (1.1) च (अ) गुणिनि (7.1) अभात् (लङ् 1.1) । व्यक्ते (7.1) गुणव्यतिकरे (7.1) गुणवान् (1.1) पुरुषः (1.1) यथा (अ) ।। 18 ।।

**अन्वयः** यथा व्यक्तेः गुणव्यतिकरे गुणवान् पुरुषः च गुणिनि वियति निर्गुणं माहेन्द्रं धनुः अभात् ।। 18 ।।

**पदार्थः** धनुः (धनुष्यम्) वियति (आकाशे) माहेन्द्रम् (इन्द्रस्य) निर्गुणम् (गुणरहितम्) च (एवम्) गुणिनि (गुणयुक्ते) अभात् (शोभते स्म) । व्यक्ते (प्रकटे/प्रत्यक्षे) गुणव्यतिकरे (गुणमिश्रणे) गुणवान् (गुणयुक्तः) पुरुषः (मनुष्यः) यथा (इव) ।। 18 ।।

**भावार्थः** यथा स्पष्टे जगतीतले गुणवान् पुरुषः शोभते तथैव गुणवति नभो मण्डले निर्गुणम् (अपि) इन्द्रधनुः प्रकाशते ।। 18 ।।

**न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः ।**

**अहम्मत्या भासितया स्वभासा पुरुषो यथा ।। 19 ।।**

**पदच्छेदः** न (अ) रराज (लिट् 1.1) उडुपः (1.1) छन्नः (1.1) स्वज्योत्स्नाराजितैः (3.3) घनैः (3.3) । अहम्मत्या (3.1) भासितया (3.1) स्वभासा (3.1) पुरुषः (1.1) यथा (अ) ।। 19 ।।

**अन्वयः** यथा स्वभासा अहम्मत्या पुरुषः (न शोभते तथैव) स्वज्योत्स्नाराजितैः घनैः छन्नः उडुपः न रराज ॥ 19 ॥

**पदार्थः** न (नो) रराज (शोभते स्म) उडुपः (चन्द्रमाः) छन्नः (आच्छादितः/निलीनः) स्वज्योत्स्नाराधितैः (निजचन्द्रिकोपासितैः) घनैः (मेघैः) । अहम्मत्या (अहङ्कारबुद्धया) भासितया (प्रकाशितया) स्वभासा (स्वतेजसा) पुरुषः (मनुष्यः) यथा (इव) ।। 19 ।।

**भावार्थः** यथा स्वज्योत्स्नाभासितया अभिमानबुद्धया जनः न शोभते तथैव स्वज्योत्स्नया शोभितैः मेघैः आच्छादितः चन्द्रमाः न शोभते ।। 19 ।।

**मेघागमोत्सवाहृष्टाः प्रत्यनन्दञ्शिखण्डिनः ।**

**गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे ।। 20 ।।**

**पदच्छेदः** मेघागमोत्सवाः (1.3) हृष्टाः (1.3) प्रत्यनन्दन् (लङ् 1.3) शिखण्डिनः (1.3) गृहेषु (7.3) तप्ताः (1.3) निर्विण्णाः (1.3) यथा (अ) अच्युतजनागमे (7.1) ।। 20 ।।

**अन्वयः** यथा गृहेषु तप्ताः निर्विण्णाः अच्युतजनागमे (तथा) मेघागमोत्सवाः हृष्टाः शिखण्डिनः प्रत्यनन्दन् ।। 20 ।।

**पदार्थः** मेघागमोत्सवाः (जलधरानाम् आगमने उत्सवः येषां ते) हृष्टाः (हर्षयुक्ताः) प्रत्यनन्दन् (आनन्दिताः) शिखण्डिनः (मयूराः) । गृहेषु (गेहेषु) तप्ताः (तापयुक्ताः) निर्विण्णाः (खिन्नाः/श्रान्ताः) यथा (यया रीत्या) अच्युतजनागमे (वैष्णवजनागमने) ।। 20 ।।

**भावार्थः** यथा गृहेषु दुःखानुभवेन तप्ताः जनाः भगवद्भक्तानाम् आगमनेन आनन्दानुभवं कुर्वन्ति तथैव मेघानाम् आगमनेन उत्सवयुक्ताः प्रसन्नाः हर्षयुक्ताः मयूराः आनन्दिताः भवन्ति स्म ।। 20 ।।

**पीत्वापः पादपाः पद्भिरासन् नानात्ममूर्तयः ।**

**प्राक्क्षामास्तपसा श्रान्ता यथा कामानुसेवया ।। 21 ।।**

**पदच्छेदः** पीत्वा (अ) अपः (2.2) पादपाः (1.3) पद्भिः (3.3) आसन् (लङ् 1.3) नाना (अ) आत्ममूर्तयः (1.3) । प्राक् (अ/1.1) क्षामाः (1.3) तपसा (3.1) श्रान्ताः (1.3) यथा (अ) कामानुसेवया (3.1) ।। 21 ।।

**अन्वयः** यथा प्राक्तपसा क्षामाः श्रान्ताः कामानुसेवया पद्भिः अपः पीत्वा नाना आत्ममूर्तयः आसन् ।। 21 ।।

**पदार्थः** पीत्वा (पानं कृत्वा) अपः (जलम्) पादपाः (वृक्षाः) पद्भिः (चरणैः अत्र मूलैः) आसन् (जाताः) नाना (विविधाः) आत्ममूर्तयः (स्वप्रतिमाः) । प्राक् (पूर्वम्) क्षामाः (कृशाः/क्षीणाः) तपसा (तपस्यया) श्रान्ताः (क्लान्ताः) यथा (इव) कामानुसेवया (इच्छानुरूपेण सेवनेन (।। 21 ।।)

**भावार्थः** यथा पूर्वं तपसा शुष्काः तथा च श्रान्ताः तृप्तिपर्यन्तं सेवनेन पुष्टतां लभन्ते तथैव पादपाः पद्भिः (मूलैः) जलं पीत्वा नानारूपैः आत्मरूपमूर्तयः अभवन् ।।

**सरस्स्वशान्तरोधस्सु न्यूषुरङ्गापि सारसाः ।**

**गृहेष्वशान्तकृत्येषु ग्राम्या इव दुराशयाः ।। 22 ।।**

**पदच्छेदः** सरस्सु (7.3) अशान्तरोधस्सु (7.3) न्यूषुः (लिट् 1.3) अङ्ग (सं.) अपि (अ) सारसाः (1.3) । गृहेषु (7.3) अशान्तकृत्येषु (7.3) ग्राम्याः (1.3) इव (अ) दुराशयाः (1.3) ।। 22 ।।

**अन्वयः** अङ्ग अशान्तकृत्येषु गृहेषु दुराशयाः ग्राम्याः इव अशान्तरोधस्सु सरस्सु अपि सारसाः न्यूषुः ।। 22 ।।

**पदार्थः** सरस्सु (सरोवरेषु) अशान्तरोधस्सु (शान्तिरहितैः तीरैः युक्तेषु) न्यूषुः (वासं कृतवन्तः) अङ्ग ! अत्र सन्धिः आर्षः) अपि (प्रत्युत) सारसाः (क्रौञ्चपक्षिणः) । गृहेषु (गेहेषु) अशान्तकृत्येषु (शान्तिरहिताः क्रियाः येषु तादृशेषु) ग्राम्याः (ग्रामीणाः/क्षुल्लकाः) एव (यथा) दुराशयाः (खलवासनाः) ।। 22 ।।

**भावार्थः** हे परीक्षित ! (अङ्ग !) अशुद्धेन हृदयेन युक्तेषु गृहस्थाश्रमेषु दुष्टेन अन्तःकरणेन युक्ताः मूर्खजनाः यथा निवासं कुर्वन्ति तथैव शान्तिरहितेषु सरोवरतटेषु अपि क्रौञ्चपक्षिणः निवासं कृतवन्तः ।। 22 ।।

**जलौघैर्निरभिद्यन्त सेतवो वर्षतीश्वरे ।**

**पाखण्डिनामसद्वादैर्वेदमार्गाः कलौ यथा ।। 23 ।।**

**पदच्छेदः** जलौघैः (3.3) निरभिद्यन्त (लङ् 1.3) सेतवः (1.3) वर्षति (7.1) ईश्वरे (7.1) । पाखण्डिनाम् (6.3) असद्वादैः (3.3) वेदमार्गाः (1.3) क्लौ (7.1) यथा (अ) (1)

**अन्वयः** यथा कलौ पाखण्डिनाम् असद्वादैः वेदमार्गाः (खण्डिताः) तथैव ईश्वरे वर्षति सेवतः जलौघैः निरभिद्यन्त ।। 23 ।।

**पदार्थः** जलौघेः (सलिलसमूहैः) निरभिद्यन्त (निर्भिन्नाःभग्नाः) सेतवः (तटयोजकाः) वर्षति (वर्षा भवति तदा) ईश्वरे (यदा इन्द्रः/पर्जन्यः)। पाखण्डिनाम् (दम्भिनाम्/आडम्बरिणाम्) असद्वादैः (मिथ्याजल्पैः वितण्डाभिः) वेदमार्गाः (श्रुतिपथाः) कलौ (कलियुगे) यथा (इव) ।। 23 ।।

**भावार्थः** यथा कलियुगे पाखण्डिनाम् असद्वादैः श्रुतिमार्गाः खण्डिताः अभवन् तथैव मेघवर्षया सेतवः सलिलसमूहैः भग्नाः सञ्जाताः ।। 23 ।।

**व्यमुञ्चन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः ।**
**यथाऽऽशिषो विश्पतयः काले काले द्विजेरिताः ।। 24 ।।**

**पदच्छेदः** व्यमुञ्चन् (लङ् 1.3) वायुभिः (3.3) नुन्ना (1.1) भूतेभ्यः (4.3) अथ (अ) अमृतम् (2.1) घनाः (1.3)। यथा (अ) आशिषः (2.2) विश्पतयः (1.3) काले/काले (7.1) द्विजेरिताः (1.3) ।। 24 ।।

**अन्वयः** अथ यथा द्विजेरिताः विश्पतयः काले काले आशिषः (तथैव) वायुभिः नुन्नाः घनाः भूतेभ्यः अमृतं व्यमुञ्चन् ।। 24 ।।

**पदार्थः** व्यमुञ्चन् (मुक्तवन्तः) वायुभिः (पवनैः) नुन्ना (प्रेरिताः) भूतेभ्यः (जीवानां कृते) अथ (तदनन्तरम्) अमृतम् (जलम्/पीयूषम/सुधाम्) घनाः (मेघाः)। यथा (इव) आशिषः (आशीर्वादान् धनानि वा) विश्पतयः (राजानः / व्यापारिणः) काले-काले (समये समये) द्विजेरिताः (विप्रैः प्रचोदिताः) ।। 24 ।।

**भावार्थः** तदनन्तरं यथा ब्राह्मणैः प्रेरिताः राजानः भूतेभ्यः प्रजाभ्यः समये समये आशीर्वादान् धनानि वा यच्छन्ति तथैव वायुभिः प्रेरिताः मेघाः भूतेभ्यः अमृतदृशम् जलं विमुक्तवन्तः ॥ 24 ॥

**एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजम्बुमत् ।**
**गोगोपालैर्वृतो रन्तुं सबलः प्राविशद्धरिः ।। 25 ।।**

**पदच्छेदः** एवम् (अ) वनम् (2.1) तद् (2.1) वर्षिष्ठम् (2.1) पक्वखर्जूरजम्बुमत् (2.1)। गोगोपालैः (3.3) वृतः (1.1) रन्तुम् (अ) सबलः (1.1) प्राविशत् (लङ् 1.1) हरिः (1.1) ।। 25 ।।

**अन्वयः** एवम् वर्षिष्ठं पक्वखर्जूरजम्बुमत् वनम् गोगोपालैः वृतः सबलः हरिः रन्तुं प्राविशत् ।। 25 ।।

**पदार्थः** एवम् (इत्थम्) वनम् (विपिनम्) तद् (अदः) वर्षिष्ठम् (वृष्ट्या सम्पन्नं सुन्दरम्) पक्वखर्जूरजम्बुमत् (परिणतानां खर्जूराणां जम्बूनां च वृक्षैः युक्तम्) गोगोपालैः (गोपवृन्दैः) वृतः (आविष्टः) रन्तम् (क्रीडितुम्) सबलः (बलयुक्तः) प्राविशत् (प्रविष्टवान्) हरिः (कृष्णः) गोगोपालैः (3.3) वृतः (1.1) रन्तुम् (अ) सबलः (1.1) प्राविशत (लङ् 1.1) हरिः (1.1) ।। 25 ।।

**भावार्थः** अनया रीत्या वर्षाबाहुल्येन परिपक्वानां खर्जूरफलानां जम्बूफलानां च वृक्षैः युक्तं वनं गोपैः गोपालबालकैः च बलरामसहितः श्रीकृष्णः रमणार्थं प्रविष्टवान् ।। 25 ।।

**क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति ।**
**निर्विश्य भगवान् रेमे कन्दमूलफलाशनः ।। 26 ।।**

**पदच्छेदः** क्वचित् (अ) वनस्पतिक्रोडे (7.1) गुहायाम् (7.1) च (अ) अभिवर्षति (7.1)। निर्विश्य (अ) भगवान् (1.1) रेमे (लिट् 1.1) कन्दमूलफलाशनः (1.1) ।। 26 ।।

**अन्वयः** कन्दमूलफलाशनः भगवान् क्वचित् अभिवर्षति (तदा) वनस्पतिक्रोडे च गुहायां निर्विश्य रेमे ।। 26 ।।

**पदार्थः** क्वचित् (कुत्रचित्) वनस्पतिक्रोडे (वृक्षकोटरे) गुहायाम् (गह्वरे) च (एवम्) अभिवर्षति (यदा परितः वृष्टिः भवति तदा) निर्विश्य (आश्रित्य) भगवान् (श्रीकृष्णः) रेमे (रमणम्/क्रीडां कृतवान्) कन्दमूलफलाशनः (कन्दमूलफलानि भक्षयति) ।। 26 ।।

**भावार्थः** कन्दमूलफलाशनः भगवान् श्रीकृष्णः कदाचित् परितः वर्षा भवति तदा वनस्पतिकुञ्जे गुहायां च प्रविश्य रमते स्म ।। 26 ।।

**प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहाम् ।**
**भगवान् पूजयाञ्चक्रे आत्मशक्त्युपबृंहिताम् ।। 27 ।।**

**पदच्छेदः** प्रावृट्श्रियम् (2.1) च (अ) ताम् (2.1) वीक्ष्य (अ) सर्वभूतमुदावहाम् (2.1) । भगवान् (1.1) पूजयाञ्चक्रे (लिट् 1.1) आत्मशक्त्युपबृंहिताम् (2.1) ।। 27 ।।

**अन्वयः** आत्मशक्त्युपबृंहितां सर्वभूतमुदावहां तां प्रावृट्श्रियं वीक्ष्य भगवान् पूजयाञ्चक्रे ।

**पदार्थः** प्रावृट्श्रियम् (वर्षाशोभाम्/वृष्टिसमृद्धिम्) च (तथा) ताम् (पूर्ववर्णिताम्) वीक्ष्य (विलोक्य) सर्वभूतमुदावहाम् (समस्तजीवेभ्यः आनन्दोत्पादिकाम्) । भगवान् (श्रीकृष्णः) पूजयाञ्चक्रे) (अर्चितवान्) आत्मशक्त्युपबृंहिताम्) निजशक्त्या परिवर्धिताम्) ।। 27 ।।

**भावार्थः** तथा च आत्मशक्त्या वर्धितप्राणिनां कृते हर्षदायिकायाः वर्षायाः शोभां सस्यसम्पत्तिं वा वीक्ष्य श्रीकृष्णः तां पूजयामास ।। 27 ।।

## स्वाध्यायः

1. **बहुविकल्पप्रश्नाः।**

(1) कति ऋतवः सन्ति ?

(क) 3 (ख) 4 (ग) 5 (घ) 6

(2) उत्सवाः किम् अनुसृत्य ऋषिभिः निर्धारिताः ?

(क) कालचकम् (ख) सृष्टिचक्रम् (ग) पर्यावरणचक्रम् (घ) एतेषु नैकमपि

(3) शुकदेवः कः ?

(क) व्यासस्य पिता (ख) परीक्षितः गुरुः (ग) विदुरस्य पुत्रः (घ) एतेषु नैकमपि

(4) इदं प्रावृड्वर्णनम् उवाच

(क) व्यासः (ख) श्रीभगवान् (ग) परीक्षित् (घ) एतेषु नैकमपि

(5) गोपाः कस्मात् आत्मनः मोक्षं समाचख्युः ?

(क) प्रलम्बात् (ख) असुरात् (ग) दावाग्नेः (घ) एतेषु नैकमपि

(6) अयं पाठांशः श्रीमद्भागवतस्य कस्माद् भागाद् गृहीतः ?

(क) पञ्चमस्कन्धपूर्वार्धात् (ख) द्वितीयस्कन्धपूर्वार्धात्

(ग) दशमस्कन्धस्य उत्तरार्धात् (घ) एतेषु नैकमपि

(7) व्योम कैः आच्छन्नम्?

(क) स्तनयित्नुभिः (ख) पक्षिभिः (ग) वृक्षैः (घ) जलधाराभिः

(8) सूर्यातपेन किं शुष्कम्?

(क) मेघाः (ख) विद्युतः (ग) पृथिवी (घ) एतेषु नैकमपि

(9) ऊर्ध्वमार्गगामिन्यः काः?

(क) वर्षाधाराः (ख) विद्युतः (ग) लघुसरितः (घ) एतेषु नैकमपि

(10) कृषकेभ्यः के मुदं ददुः?

(क) वर्षाकालः (ख) क्षेत्राणि (ग) मेघः (घ) एतेषु नैकमपि

(11) छन्नः कः न रराज?

(क) वर्षाकालः (ख) चन्द्रमाः (ग) मेघः (घ) एतेषु नैकमपि

(12) पद्भिः अपः पीत्वा के पुष्टतां लभन्ते?

(क) पादपाः (ख) मेघाः (ग) पक्षिणः (घ) एतेषु नैकमपि

**2. परस्परं समन्वयः करणीयः ।**

| **पदम्** | **समानार्थी** |
|---|---|
| (1) व्योम | (1) गगनम् |
| (2) विद्युत् | (2) तडित् |
| (3) मेघः | (3) जलधरः |
| (4) आपः | (4) सलिलानि |
| (5) उडुपः | (5) चन्द्रमाः |
| (6) रामः | (6) बलदेवः |
| (7) क्षेत्राणि | (7) केदाराः |

**3. एकैकवाक्यद्वारा उत्तराणि ( अतिलघूत्तराणि ) लेख्यानि ।**

(1) गोपाः काभ्यः प्रलम्बवधं समाचख्युः?

(2) पर्जन्यनिनदं श्रुत्वा दर्दुराः किं कृतवन्तः?

(3) वर्षाकाले पृथिवी कीदृशी दृश्यते?

(4) नववारिसेवनेन जलस्थलवासिनां स्वरूपं कीदृशं प्रतिभाति?

(5) भगवद्भक्तानाम् आरामेन के आनन्दम् अनुभवन्ति?

(6) केषाम् असद्वादैः वेदमार्गाः खण्डिताः भवन्ति?

(7) वर्षाकालस्य शोभां दृष्ट्वा श्रीकृष्णः किं कृतवान्?

**4. सन्दर्भसहितं श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(1) अष्टौ मासान् निपीतं यद..... ।

(2) जलस्थलौकसः सर्वे......

(3) लोकबन्धुषु मेघेषु......

5. **सविस्तरम् उत्तरं लेख्यम् ।**

(1) वर्षाकाले मार्गाः कीदृशाः इति वर्णनीयम् ।

(2) अस्मिन् पाठे कृतः पक्षिणाम् उल्लेखः वर्णनीयः ।

(3) गोपैः सह श्रीकृष्णस्य वनरमणं वर्णनीयम् ।

6. **सूचनानुसारं लेख्यम् ।**

(1) गुहायाम् (विभक्तिपरिचयो लेख्यः) ।

(2) अबिभ्रत् (टिप्पणी लेख्या)

(3) उच्छिलीन्ध्रकृतच्छाया (पदार्थो लेख्यः)

(4) चुक्षुभे (पदपरिचयो लेख्यः)

(5) वर्षतीश्वरे (विग्रहार्थो लेख्यः)

**शिक्षकप्रवृत्तिः**

प्रकृतिप्रेमोत्पादनाभिगमेन पर्यावरणमहत्त्वं कथयेयुः ।

ऋत्वनुसारिणाम् उत्सवानां मानवजीवनविज्ञाने प्रभावं वर्णयेयुः ।

ऋतुसंहार-कादम्बरीस्थविन्ध्याटवीवर्णनादीनां सन्दर्भाणाम् उल्लेखं कुर्युः ।

यावच्छक्यं वर्षाकाले एव अस्य पाठस्य अध्यापनं स्यादिति आयोजनं कुर्युः ।

भारतस्य कथं कृषिप्रधानत्वम्, इति प्रतिपाद्य देवमातृकः देशः नदीमातृकः देशः इति भेदं कथयेयुः ।

**छात्रप्रवृत्तिः**

पूर्ववर्षेषु पठितानां वर्षागीतानां गानं कुर्युः ।

पाठे वर्णितानां परिस्थितीनां प्रत्यक्षीकरणं कर्तुं प्रयतेरन् ।

विश्वस्तरीयवातावरणस्थितिं प्रति जिज्ञासां कुर्युः ।

●

# 4 सत्यस्य महिमा

अस्माकं भारतदेशस्य ध्येयवाक्यम् अस्ति सत्यमेव जयते इति । अर्थात् वयं मन्यामहे यत् अस्माकं आचारे व्यवहारे च यत् किमपि भवेत्, तत् सर्वमपि सत्याधारितम् एव भवेत् इति । अस्माकं धर्मशास्त्राणि वेद-पुराण-दर्शन-स्मृतिशास्त्राणि चापि सत्यस्य महिमानं गायन्ति । तद्यथा अनृतात् सत्यमुपैमि इति वेदः, सत्यं परं धीमहि इति पुराणशास्त्रम्, सत्यं ज्ञानमनन्तं ब्रह्म इति दर्शनशास्त्रम्, मौनात्सत्यं विशिष्यते इति स्मृतिशास्त्रम् । एतेषु प्राचीनेषु शास्त्रगतासु सूक्तिषु यस्य सत्यस्य महिमा वर्णितः अस्ति तदेव सत्यम् अधुनापि तथैव महिमामयं प्रवर्तते । अत एव भारतीयाः सत्यम् इति तत्त्वं नारायणरूपेण स्वीकुर्वन्ति । एषा परम्परा संस्कृतकाव्यनाटकेषु अपि स्थिरा जाता । ततः सत्यपालनव्रतानां पुरुषाणां कथा अपि पुराणेतिहासयोः संगृहीता । प्रस्तुतस्य पाठस्य कथा अपि एतादृशी पौराणिकी कथा वर्तते ।

जनश्रुतिषु यदा यदा सत्यस्य उल्लेखः भवति, तदा तदा सर्वप्रथमं सूर्यवंशीयस्य राज्ञः हरिश्चन्द्रस्य स्मरणं भवति । अस्य महापुरुषस्य जीवनमधिकृत्य संस्कृतस्य नवीनाः अध्येतारः सत्यं प्रति आकृष्टाः भवन्तु इति संकल्प्य श्रीबृहद्गुजरातसंस्कृतपरिषदा प्रकाशितमस्ति श्रीघनश्याम-त्रिवेदिविरचितम् एकं नाटकम्, ततः छात्राणां वयःकक्षानुकूलं ग्राह्य-त्याज्यविवेकपूर्वकम् अधोलिखितं नाट्यरूपमत्र संगृहीतम् अस्ति ।

अस्मिन् नाट्यांशे विश्वामित्रः राज्ञः हरिश्चन्द्रस्य सत्यनिष्ठां परीक्षितुं राज्यसंपत्यादिकं सर्वमपि याचते । ततश्च दक्षिणया विहीनं दानं धर्मशास्त्रविरुद्धम् इति उक्त्वा दक्षिणाम् अर्जितुम् एकमासात्मकम् अवधिं निर्धारयति । अस्मिन् अवधौ अतीव कष्टं सोढ्वा, चाण्डालकर्म कृत्वा दक्षिणामर्जयन् जीवति । तदैव आकस्मिकं दुर्घटति । स्वीयः रोहितनामकः पुत्रः दिवंगच्छति । तस्य और्ध्वदैहिकं कर्म कर्तुं तारामती नाम स्वीया पत्नी यदा श्मशाने आगच्छति तदा तस्याः अपि शुल्ककामः अयं राजा, पत्न्याः हस्ते रोहितनामानं स्वपुत्रं मृतं दृष्ट्वा अपि, स्वीयकर्तव्यरूपस्य सत्यस्य निष्ठातः पालनं करोति । सत्यात् विचलितो न भवति । एतादृशेन सत्यपालनेन अन्ते देवाः प्रसन्नाः भवन्ति, तं सत्यवादिनं च पुरस्कुर्वन्ति । अत एव उच्यते सर्वं सत्ये प्रतिष्ठितम् इति ।

---

**॥ सत्यवादी हरिश्चन्द्रः ॥**

मङ्गलगानं श्रूयते

**गङ्गाधरो रुचिरचन्द्रकराभिरामो**
**यः पार्वतीसहचरश्च तुषारवर्णः ।**
**बिभ्रद् विषं सुविषमं गुणरत्नरम्यः**
**श्रेयः स वो दिशतु शाश्वतिकं त्रिनेत्रः ।। 1 ।।**

**सूत्रधारः** : आर्ये इतस्तावत् ।

**नटीः** : आर्यपुत्र इयमस्मि । आज्ञापयतु भवान् ।

**सूत्रधारः** : अये कीदृशी मनोहारिणी संध्या । अत्र गुणानुरागिणः सहृदयाः सभ्या उपस्थिताः । तद् इमां सन्ध्यामधिकृत्य गीयतां किंचित् ।

**नटीः** : भवतु । (गायति)

**अस्तं गतः कमलिनीकुलनाथ एषः**
**पूजां तनोति शुभदां मुनिवर्ग एषः ।**
**एतद् विभाति गगनं तुहिनांशुयुक्तं**
**सान्ध्यं प्रमोदयति धाम मनांसि रम्यम् ।। 2 ।।**

**सूत्रधारः** : अहो, साधु गीतम् । तर्हि गीतबद्धान् एतान् कतमेन प्रसङ्गेन अद्य प्रसादयामः ?

**नटीः** : सतीषु अपि अनेकासु विद्वत्कृतिषु अद्यत्वे नवीनरचनायां प्रायः सर्वेषाम् अभिरुचिः दृश्यते । तत् कमपि नूतनं प्रसंगमाश्रित्य उपस्थातव्यम् अस्माभिः ।

**सूत्रधारः** : शोभनम् । प्रयुज्यतां तर्हि नितरां निर्मलः सत्यवादिनो हरिश्चन्द्रस्य सत्यपालनवृत्तान्तः ।

**श्रूयन्ते ये हरौ चन्द्रे जगदाह्लादिनो गुणाः ।**
**दृश्यन्ते ते हरिश्चंद्रे चन्द्रवत् प्रियदर्शने ।। 3 ।।**

**सूत्रधारः** : साधूक्तम् । यतो हि-

**सत्यं परः सदाचारः सत्यं धर्मस्य जीवनम् ।**
**सत्यं भगवतो रूपं सर्वं सत्ये प्रतिष्ठितम् ।। 4।।**
**प्रतिज्ञापालनं पुंसां दुष्करं हि मतं मम ।**
**हरिश्चन्द्रेण सत्यार्थं सर्वनाशेऽपि तत्कृतम् ।। 5 ।।**

तर्हि प्रतिपात्रमाधीयतां यत्नः ।

**( नेपथ्ये )**

[परित्रायताम् - परित्रायताम् । इति पौरा आक्रोशन्ति ।]

(न भेतव्यं न भेतव्यम् । अयमहं आगतः ।)

**सूत्रधारः** : अये कोऽयं कोलाहलः ? कस्य परित्राणम् ?

**( आलोक्य )**

**निष्कारणं प्रपीड्यन्ते एते लोकाः पुरश्रिताः ।**
**परित्राणार्थमेतेषां हरिश्चन्द्रोऽयमागतः ।। 6 ।।**

एहि । गच्छावस्तावत् । (निष्क्रान्तौ ।)

**। इति प्रस्तावना ।**

(ततः प्रविशति सज्जचापधरो राजा हरिश्चंद्रः ।)

**राजा** : न भेतव्यं, न भेतव्यम् । अयमहं आगतः । कोऽयं परलोककांक्षी मम राज्ये दुष्कृतम् आचरति? आः हरिश्चन्द्रे जीवति सति कोऽयं नराधमः मदीयैः बाणैः स्वभुजयोः उच्छेदनम् अभिलषति?

**हरिश्चन्द्रे मयि प्राप्ते धर्मविघ्नः कुतो मतः ।**
**विद्यमाने सहस्रांशौ अन्धकारात् कुतो भयम् ।। 7 ।।**

न भेतव्यम् भोः अयमागतोऽहम् । (इति निष्क्रान्तः ।)

**( नेपथ्ये )**

(पापिजनशासनेन वर्धतेतरां महाराजो हरिश्चन्द्रः) ।

**राजाः** : (प्रविश्य) उत्खातं प्रजाजनशल्यम् । अर्थवान् मे नृपतिशब्दः । हरिश्चन्द्रस्य आज्ञाचक्रं यत्र प्रवर्तते न तत्र कोऽपि प्रजाः पीडयितुं शक्तः । शृणुत रे पौराः, विस्रब्धा भवत ।

**आश्रयेण विहीनस्य क्षिप्तस्य दुःखवारिधौ ।**
**अयं बाहुर्भवेत्तस्य प्लव उद्धरणे सदा ।। ८ ।।**

(इति प्रस्थातुमिच्छति ।)

(ततः प्रविशति विश्वामित्रः ।)

**विश्वामित्रः** : (प्रविश्य सक्रोधम्) आः, कोऽयं दुरात्मा मदान्धः हीनजनोचिताम् आत्मश्लाघां करोति ? (विलोक्य) अये! अत्रभवान् हरिश्चन्द्रः भोः तिष्ठ तिष्ठ ।

**राजाः** : अये! कथं भगवान् विश्वामित्रः ? अभिवादये । (प्रणमति ।) भगवन् क्षम्यताम् । राज्ञां खलु प्रजापालनं परो धर्म इति शास्त्रकारा आमनन्ति ।

**विश्वामित्रः** : यदि धर्म एव ते संमतः तर्हि उच्यताम्-

**दानं कस्मै प्रदातव्यं रक्षणीयं च किं मतम् ।**
**सेवनीयं च किं कर्म संसारेऽस्मिन् विपश्चिताम् ।। ९ ।।**

**राजाः** : भगवन् ब्राह्मणवर्येभ्यः जीविकाहीनेभ्यश्च दानं, भीतानां शरणागतानां च रक्षणं, गुरुचरणानां, हरिचरणानां च सेवनं अस्मिन् संसारे सुखावहम् ।

**विश्वामित्रः** : शोभनम् । (स्वगतम्) अनेन मम अनुकूलं मन्त्रितम् । परीक्षे तावदेनम् । (प्रकाशम्) भोः ! दानग्रहणोत्सुकोऽयं ब्राह्मणः । देहि तावत् मदिच्छानुसारं दानं दक्षिणाम् च।

**राजाः** : भगवन्, यथेष्टं भणतु । सर्वं प्रदाय भवन्तं सेवितुमिच्छामि । भवान् हि गुरुः ब्राह्मणश्च ।

**विश्वामित्रः** : साधु राजन् साधु । दीयतां तर्हि समग्रा ससागरा सपर्वतग्रामनगरा इयं पृथिवी । अपरं च यत् तव समीपे वर्तते तत्सर्वं मह्यं देहि ।

**राजाः** : (प्रणम्य) यद् भवान् आज्ञापयति । अनुगृहीतोऽस्मि ।

**विश्वामित्रः** : (स्वगतम्) अयं राजा वचनपालने स्वर्गेऽपि नितान्तं विख्यातः । पश्यामि तावत् अस्य वचनपालनदक्षताम् । (प्रकाशम्) भो धर्मप्रिय, अधुना अस्मिन् राज्ये मम अधिकारः सञ्जातः । अतः आज्ञापयामि त्वां यत् मुकुटादीनि भूषणानि त्यक्त्वा पत्न्या पुत्रेण च सहितः शीघ्रं मम राज्यं परित्यज ।

**राजाः** : (प्रणम्य भूषणानि अवतार्य) यथा आदिशति भवान् ।
(राजा गन्तुमिच्छति ।)

**विश्वामित्रः** : भोः सत्यवादिन् धर्मज्ञ, दक्षिणाविहीनं दानं ददासि ?

**राजाः** : भगवन्, सर्वमपि भवते दत्तम् । पत्नीपुत्रौ विहाय मम समीपे किंचिदपि नास्ति ।

**विश्वामित्रः** : (सकोपम्) राजन्, धर्मविदांवर, पूर्वं प्रतिज्ञाय अधुना विरुद्धं कथं समाचरसि ? दक्षिणां दत्वा गच्छसि । एष ते राजधर्मः दानधर्मश्च । अन्यथा शापपात्रं भविष्यसि ।

**राजाः** : भगवन्, प्रसीदतु । मा कुप्यताम् । दक्षिणां ते अवश्यं दास्यामि ।

**विश्वामित्रः** : भो राजन्, नाहं विलम्बं सहिष्ये । दीयताम् अधुनैव ।

**राजाः** : भगवन्, एकस्मिन् मासे ते दक्षिणां दास्यामि । एतावन्तं कालं क्षमस्व माम् । अधुना मम समीपे किञ्चिदपि देयं नास्ति । तर्हि अनुमन्यतां मे गमनम् ।

**विश्वामित्रः** : भवतु । गच्छ धर्मपरिपालनाय । (निष्क्रान्तौ)

(ततः प्रविशति पत्नीपुत्राभ्यां अनुगम्यमानः राजा ।)

(नेपथ्ये)

अयि महाराज । अनाथान् अस्मान् विहाय कुत्र गच्छति भवान् ? भवन्तमनुसरामः ।

(प्रजानुरोधमवगण्य राजा प्रतिष्ठते ।)

**( पुनरपि नेपथ्ये )**

तिष्ठतु तिष्ठतु भवान् । राजन् भवतो दर्शनं करिष्यामः । ईदृशं दर्शनसौभाग्यं पुनः कदा लभ्यते । अहो कीदृशं विधिवैचित्र्यम् । पुरा यः अनुचरैः सेव्यमानो जयजयशब्दपूर्वकं अगच्छत् सः अधुना पत्नीपुत्रसहितः पद्भ्यां व्रजति । स्वामिन्, कथं भवान् अस्मान् परित्यजति ? अनाथानामस्माकं कः शरणम् ? न गन्तव्यं न गन्तव्यम् । स्वकीयराज्ये एव तिष्ठतु ।

(राजा गच्छन् तिष्ठति । विश्वामित्रः प्रविशति ।)

**विश्वामित्रः** : (सकोपम्) भो मिथ्यावादिन्, कपटिन् धूर्त, एकदा राज्यदानं कृत्वा अधुना कथं तिष्ठसि ? प्रतिगृहाण तव राज्यम् । मिथ्याभाषिणः दानं ग्रहीतुं न इच्छामि । धिक्त्वाम् ।

**राजा** : क्षम्यतां क्षम्यतां भगवन् । अयमहं गच्छामि । एकदा दत्तं न प्रतिगृह्णामि ।

**विश्वामित्रः** : गच्छ । नाहं त्वामत्र द्रष्टुमिच्छामि ।

**राजा** : अयमहं गच्छामि । (प्रस्थितः ।)

(आकाशे)

**क्रूरता कीदृशी त्वद्य विश्वामित्रेण दर्शिता ।**
**राज्यभ्रष्टः कृतो येन हरिश्चन्द्रो महीपतिः ।। 10 ।।**

**विश्वामित्रः** : (सकोपम्) आः विश्वामित्रः क्रूर इति ? अरे एवं कथयतः युष्मान् सर्वान् अहं शपामि यत्, यूयं सर्वे पृथिव्यां मनुष्ययोनिं लभध्वम् ।

**।। समाप्तमिदं दृश्यम् ।।**

**।। अथापरं दृश्यम् ।।**

(वाराणसीनगर्याम्)

(ततः प्रविशति सपरिवारो राजा ।)

**राजा** : एषा पवित्रनगरी वाराणसी । अस्यां पिनाकपाणेः भगवतः शङ्करस्य अधिकारः प्रवर्तते । न इयं मम राज्यभूमिः । अतः अत्र निवासं करिष्यामः । (उपविशति ।)

(ततः प्रविशति विश्वामित्रः ।)

**विश्वामित्रः** : भो राजन्....।

**राजा** : (उत्थाय पुरतो गत्वा अभिवादयते ।) भगवन् वन्दे । भवद्दर्शनेन कृतार्थोऽस्मि ।

**विश्वामित्रः** : दीर्घायुर्भव । अपि अनामयं ते ?

**राजा** : भवद्दर्शनेन सविशेषम् ।

**विश्वामित्रः** : अपि नाम स्मर्यते । अद्य एकमास्य अवधिः पूर्णः संजातः । दीयतां तर्हि मम दक्षिणा ।

**राजा** : (बद्धाञ्जलिर्भूत्वा) भगवन् मम समीपं जीवनं पत्नीं पुत्रं च विहाय किञ्चिदपि नास्ति ।

**विश्वामित्रः** : अयि असत्यवादिन् । एकं शब्दमपि ते श्रोतुं न इच्छामि ।

**राजा** : तपस्विन्, जानामि अहं यत् मासस्य अयम् अंतिमो दिवसः किन्तु तत्रापि अर्धो दिवसः अवशिष्यते । अतः आसायं प्रतीक्ष्यताम् । येन केन प्रकारेण अहं ते दक्षिणां दास्यामि ।

**विश्वामित्रः** : भवतु । पुनः आगमिष्यामि । (निष्क्रान्तः)

**राजा** : (स्वगतम्) किं करोम्यहम् । कं याचे । (विचार्य) नहि नहि, याचनावृत्तिः मरणात् अपि लघीयसी । याचनां न करिष्ये । कथं तर्हि मम सत्यव्रतस्य पालनं स्यात् ? अथवा पलायनम् एव शरणम् । नहि नहि, न इदं उचितम् । अविद्यमाने मयि किन्नाम राजा स्यात् । किं च मे पुत्रकः कुर्यात् । (स्मृत्वा) अहो अयं तु शास्त्रनिन्दितो मार्गः । कथं मूढस्य मे ईदृशी मतिः संजाता । यदि पलायते तर्हि ब्राह्मणस्य धनहर्ता भविष्यामि, ततश्च हीनतमां योनिं प्राप्स्यामि । लोकेऽपि मम अपकीर्तिः भविष्यति । (विचार्य) हन्त दृष्ट उपायः । स्वशरीरं विक्रीय महर्षेः दक्षिणां दास्यामि ।

**राज्ञी** : महाराज, अलम् अति चिन्तया । महाराजस्य वचनपालनम् अवश्यं भविष्यति । अस्मिन् कार्ये भवतः साहाय्यं कृत्वा सहधर्मचारिणीपदं मे अन्वर्थं करिष्यामि ।

**राजा** : अयि धर्मप्रिये देवि, अलं सन्तापेन । उच्यतां तर्हि कीदृशं मे साहाय्यं करिष्यसि ?

**राज्ञी** : आर्यपुत्र, रोहितसदृशेन पुत्रेण आवयोः सफलं दाम्पत्यम् । अधुना मां विक्रीय दक्षिणाप्रदानं करोतु भवान् । तेन ते वचनपालनं भविष्यति ।

**राजा** : अयि कल्याणि । अतीव कठोरं मन्त्रयसे । अशक्यमेव एतत् ।

**प्राणान् वरं विहास्यामि न ते त्यागो मयोचितः ।**
**यया धर्मस्तथार्थश्च सा भार्या किं विहीयते ।। 11 ।।**

(ततः प्रविशति विश्वामित्रः ।)

**विश्वामित्र** : भो राजन् । आगतोऽस्मि दक्षिणा मे सज्जा भवेत् ।

**राजा** : भगवन् क्षमस्व । असंशयं ते दक्षिणा भविष्यति किन्तु सूर्यास्तमनाय काश्चिद् घटिका अवशिष्टाः । प्रतीक्षतां भवान् ।

**विश्वामित्रः** : (सक्रोधम्) आः किं भूयो भूयः समयं ददासि । व्याजं च अपदिशसि । मां प्रतरसि । मिथ्या प्रलपसि । दृष्टं सत्यवादित्वम् । भवतु । समयबद्धोऽस्मि । अरे रे सूर्यकुलकलङ्क ! यदि सायंकालात् प्राक् दक्षिणां मे न ददासि, तर्हि घोरशापाग्निना त्वां दाहयिष्यामि ।

**राजा** : मर्षयतु मर्षयतु भगवन् । प्राणान्तेऽपि वचनत्यागं न करिष्यामि ।

**विश्वामित्रः** : बाढम् । गच्छाम्यहं पुनरागमनाय ।

(इति निष्क्रान्तः ।)

**राजा** : (सखेदम्) किं करोमि? अधुना का गतिः? न कोऽप्युपायः उपलभ्यते ।

**राज्ञी** : आर्यपुत्र, तां मे प्रार्थनां स्वीकरोतु । मम विक्रयः एव अत्र शोभनतरः उपायः ।

**राजा** : हा भगवन् कृतान्त! कमलिनीपत्रपतितजलबिन्दुसदृशैः क्रीडसे अस्मत्कुटिल-भागधेयैः ! अये! कोऽयं दैवदुर्विपाकः । मयाऽपि तावत् पत्नीविक्रयः विधास्यते? नहि नहि (विचिन्त्य) तर्हि अन्यः उपायोऽपि कः? भवतु अशरणोऽस्मि । (राज्ञीं प्रति) साधु । अयि कल्याणि, निर्दयो भवामि । विक्रयं ते करिष्यामि । क्रूरतमोऽपि जनः यन्न कुर्यात् तदहं करिष्यामि ।

**धर्मार्थं चैव सत्यार्थं विक्रयं ते करोम्यहम् ।**
**वाक्पालनं भवेत् तेन हृदयं स्याच्च निर्व्यथम् ।। 12 ।।**

**।। समाप्तमिदं दृश्यम् ।।**

(नेपथ्ये विचित्राः भूतप्रेतपिशाचादीनां गृध्रवायसशृनां च शब्दाः ।)

(ततः प्रविशति चाण्डालवेशधारीः हरिश्चन्द्रः ।)

**हरिश्चन्द्रः** : सत्यमुक्तं यत् दुःखं दुःखेन शाम्यति । दक्षिणायाः ऋणदुःखं निवारितम् अपरमिदं चाण्डालकर्मदुःखम् आपतितम् । कं शोचे? किं स्वीयां प्रजां, अशरणान् किंकरान्, शून्यामयोध्यां, दासीभूतां महाराज्ञीं तारामतीं, ललितं सुन्दरं रोहितं पुत्रं वा । भवतु, नायं उचितः कालः अतीतस्मरणस्य । (विलोक्य) श्मशानं सम्प्राप्तोऽस्मि । इयं भगवती कात्यायनी । भगवति चण्डि ! रौद्ररूपे ! भैरवि ! नमस्ते । अपि च,

**धर्मं नमामि प्रथमं मम जीवभूतं**
**सम्पूर्णविश्वजनकं कमलासनं च ।**
**विष्णुं पुराणपुरुषं पुरुषोत्तमाख्यं**
**रुद्रं यमं च वरुणं च बृहस्पतिं च ।। 13 ।।**

अधुना तावत् मम चाण्डालकर्म आरभे ।

(ततः प्रविशति मृतरोहितशरीरं धृत्वा तारामती ।)

**तारामती** : हा पुत्र ! हा वत्स ! एकाकिनीं मां परित्यज्य कुत्र गतः ? भो दुष्टसर्प, त्वया ममैव पुत्रो दृष्टः ?

(हरिश्चन्द्रः करं ग्रहीतुमिच्छति ।)

**हरिश्चन्द्रः** : (स्त्रियं प्रति) अयि भोः दीयतां मे शववस्त्रं श्मशानकरश्च । (बालं दृष्टवा) अहो मधुरमस्य दर्शनम् । राजपुत्र एव लक्ष्यते । पुत्र इव स्निह्यति अस्मिन् मे चेतः ।

**तारामती** : (चाण्डालं विलोक्य आत्मगतम्) कथम् आर्यपुत्रः । (निपुणं निरूप्य, प्रकाशम् ।) हा नाथ त्वमसि ? ईदृशी तव अवस्था ? भौ दुर्दैव, त्वया अस्मत्कृते किं किं न कृतम् ।

**हरिश्चन्द्रः** : (ससंभ्रमम्) कथं महादेवी ? अस्यामवस्थायाम् ? (बालकं निरूप्य) किं अयम् अस्मत्कुलदीपकः? हा वत्स । (मूर्च्छति ।)

**तारामती** : सामाश्वसिहि, समाश्वसिहि आर्यपुत्र ।

**हरिश्चन्द्रः** : (समाश्वस्य) पुत्र! सुन्दरे ते नयने, मधुरं तत्प्रजल्पितं, अव्याजसुन्दरं हास्यं च स्मरतः शतधा विदीर्यते मे

हृदयम् । देवि, एतत्सर्वं ममापराधस्य विलसितम् । क्षमस्व माम् । गहना कर्मणो गतिः । अधुना रोहितशरीरं चितायां स्थापयामि । त्वं गच्छ, ब्राह्मणस्य सेवां कुरु । त्वं क्रीताऽसि ।

**सेवा नाम मनुष्याणां धर्मकार्यं परं मतम् ।**
**स्वीकृता या सदा कुर्यात् निःसंशयं धरातले ।। 14 ।।**

**तारामती** : आर्यपुत्र ! पुत्रविहीना अहमेकाकिनी कथं जीवनं धारयिष्ये ? जीवने मरणे वा भवन्तमेव अनुगमिष्यामि ।
[हरिश्चन्द्रः पुत्रं गृहीत्वा चितासमीपं गच्छति । ईश्वरं प्रार्थयित्वा अग्निप्रज्वालनं कर्तुमिच्छति ।]
(ततः प्रविशति इन्द्रः ।)

**इन्द्रः** : तिष्ठ तिष्ठ राजन्, तिष्ठ । तव प्रार्थनां श्रुत्वा सर्वे देवाः प्रसन्ना अत्रैवागताः । अहं देवराज इन्द्रः । अयं चतुराननो ब्रह्मा । अयं धर्मः । इमे विश्वेदेवाः । एते मरुद्गणाः । अयं सूर्यः । अयं चन्द्रः । एते सर्वेऽपि त्वां द्रष्टुमुपस्थिताः ।

**( नेपथ्ये )**
**अहो धैर्यम् अहो सत्यम् अहो दानम् अहो बलम् ।**
**त्वया राजन् हरिश्चन्द्र सर्वं लोकोत्तरं कृतम् ।। १५ ।।**

**विश्वामित्रः** : (प्रविश्य) सत्यव्रतपालनेन वर्धतेतरां महाराजो हरिश्चन्द्रः । वत्स हरिश्चन्द्र, वत्से तारामति, न भेतव्यम् । दुर्गाधोऽयं विपत्तिसागरः युष्माभिः सर्वैः सफलतया उत्तीर्णः । राजन् धन्योऽसि । अस्मान् अन्यथा मा संभावय । इदं सर्वं तव परीक्षार्थम् आयोजितम् आसीत् । मा भैषीः । अहं रोहितं जीवयामि ।
(जलं प्रक्षिपति, रोहित उत्तिष्ठते ।)

**इन्द्रः** : वयस्य ! धन्योऽसि । यत् त्वया कृतं, न तदन्यः कृतवान् करिष्यति वा । त्वयाऽद्य लोके सत्यं प्रतिष्ठापितम् । राजन्, इयं ते विमला कीर्तिर्यावदियं वसुधा, तावत् तामलंकरिष्यति । रोहितो दीर्घायुश्चक्रवर्ती च भविष्यति । वत्से तारामति, पुण्यश्लोका त्वं प्रातः स्मरणीया भविष्यसि । यथेच्छं वरं वृणीष्व किं ते प्रियं करोमि ।

**हरिश्चन्द्रः** : (सप्रणामम्) प्रभो, भवद्दर्शनेन आप्तकामोऽस्मि । तथापि सर्वाः प्रजाः सत्यान्न प्रमाद्येयुः तथा क्रियताम् ।

**इन्द्रः** : राजन् त्वदुपार्जितेन पुण्येन घोरे कलौ धर्मस्य सर्वेष्वप्याधारभूतेषु चरणेषु नष्टेषु सत्यनामकश्चरणः सर्वदा सुस्थिरो भविष्यति । राजन्, किं ते भूयः प्रियमुपहरामि । तथापीदमस्तु ।

**( भरतवाक्यम् )**
**लोकः सदा नन्दतु पूर्णकामः चन्द्रार्धमौलौ निबिडानुरागः ।**
**वर्षन्तु कामं सलिलं पयोदाः सत्ये रताः सर्वजना भवन्तु ।। 16 ।।**

**।। समाप्तमिदं दृश्यं नाटकं च ।।**

## टिप्पणी

**शब्दार्थाः** गङ्गाधरः – शिवः, तुषारवर्णः – हिमवत् श्वेतवर्णः, बिभ्रद् – धारयन्, श्रेयः – कल्याणम्, शाश्वतिकम् – नित्यम्, कमलिनीकुलनाथः – सूर्यः, तुहिनांशुः – चन्द्रः, धाम – (अत्र) तेजः, जगदाह्लादिनः – विश्वनानन्ददाः, हरौ चन्द्रे – (अत्र) मनोहारिणि चन्द्रमसि, हरिश्चन्द्रे – तन्नामके नृपे, दुष्करम् – कठिनाम्, आधीयताम् – स्थाप्यताम्, परित्रायताम् – रक्षतु, न भेतव्यम् – भयं न धारणीयम्, पुरश्रिताः – नगरवासिनः, परलोककाङ्क्षी – मरणेच्छुकः, अभिलषति – इच्छति, सहस्रांशौ – सूर्ये, शल्यम् – कण्टकम्, विस्रब्धाः – विश्वासयुक्ताः दुःखवारिधौ – कष्टसमुद्रे, प्लवः – लघुनौका, दुरात्मा – दुर्जनः, आत्मश्लाघाम् –

स्वप्रशंसाम्, आमनन्ति – उपदिशन्ति/कथयन्ति, विपश्चिताम् – पण्डितानाम्/सज्जनानाम्, मन्त्रितम् – भणितम्, नितान्तम् – अत्यन्तम्, शीघ्रम् – सत्वरम्, अनुमन्यताम् – अनुमतिः दीयताम्, अनुगम्यमानः – पृष्ठे चलन्, मिथ्यावादिन् – सत्यभाषिन्, महिपतिः – राजा, लभध्वम् – प्राप्नुवन्तु, वाराणसी – काशी, पिनाकपाणेः – शिवस्य/विश्वनाथस्य, लधीयसी – क्षुद्रा, विहास्यामि – त्यक्ष्यामि/त्यागं करिष्यामि, विहीयते – त्यज्यते, व्याजम् – मिथ्या कारणम् (बहानुं), मर्षयतु – क्षम्यताम्, कुटिलभागधेयैः – वक्रभाग्यैः दैवदुर्विपाकः – भाग्यदुष्परिणामः, विधास्यते – करिष्यते, निर्व्यथम् – शान्तम्/दुःखरहितम्, नेपथ्ये – मञ्चपटात् पृष्ठभागे, गृध्रवायसशूनाम् – दाक्षाय्य–काक–कुक्कुराणाम्, चाण्डालः – (श्मशाने) शवदाहकारकः किङ्करान् – सेवकान्, शून्याम् – रिक्ताम् – कमलासनम् – ब्रह्माणम्/ब्रह्मदेवम्, ससम्भ्रमम् – संवेगसहितम्/सहसा साश्चर्यम्, अव्याजसुन्दरम् – निष्कपटरमणीयम्, दुर्गाधः – तलपरिमाणं ज्ञातुं दुस्तरः, मा भैषीः – भययुक्तः मा भूः, वृणीष्व – चिनुहि/याचस्व, उपार्जितेन – सञ्चितेन, चन्द्रार्धमौलौ – शिवे, निबिडानुरागः – गाढप्रेमा, कामम् – प्रचुरम्, पयोदाः – मेघाः।

**समासः** – सत्यवादी – सत्यं वदति इति तच्छीलः (उपपदतत्पुरुषः) रुचिरचन्द्रकराभिरामः चन्द्रस्य कराः इति चन्द्रकराः (ष. तत्पु.), रुचिराः च ते चन्द्रकराः इति रुचिरचन्द्रकराः, तैः अभिरामः (तृ. तत्पु.) । तुषारवर्णः – तुषारः वर्णः (कर्मधारयः) यस्य सः (बहुव्रीहिः) । तुहिनांशुयुक्तम् – तुहिनांशुना युक्तम् (तृ. तत्पु.) कमलिनीकुलनाथः – कमलिनीनां कुलस्यनाथः (ष. तत्पु.) । प्रियदर्शने – प्रियंदर्शनं यस्य सः, तस्मिन् (बहुव्रीहिः) । प्रतिपात्रम् – पात्रं पात्रं प्रति (अव्ययीभावः) । पुरश्रिताः – पुरंश्रिताः इति (द्वि. तत्पु.) । सहस्रांशुः – सहस्रम् अंशवः यस्य सः (बहुव्रीहिः) । सपर्वतग्रामनगरा – पर्वताः च ग्रामाः च नगराणि च (द्वन्द्वः) तैः सह इयम् अस्तीति (पृथिवी) । पत्नीसुत्रसहितः – पत्नी च पुत्रः चेति पत्नीपुत्रौ (द्वन्द्वः) ताभ्यां सहितः (तृ. तत्पु.) । दीर्घायुः – दीर्घम् आयुः यस्य सः (बहुव्रीहिः) । कमलिनीपत्रपतितजलबिन्दुसदृशैः – कमलिन्याः पत्राणि (ष. तत्पु.) तेषु पतिताः (स. तत्पु.) जलस्य बिन्दवः (ष. तत्पु.) कमलिनीपत्रपतितजलबिन्दुभिः सदृशानि (तृ. तत्पु. – भागधेयानि), तैः । गृध्रवायसशूनाम् – गृध्राः च वायसाः च श्वानः चेति तेषाम् (द्वन्द्वः) । कमलासनम् – कमलम् आसनं यस्य सः (बहुव्रीहिः) तम् । अस्मत्कुलदीपकः – अस्माकं कुलम् (ष. तत्पु.), तस्य दीपकः (ष.तत्पु.) । विपत्तिसागरः – विपत्तिः एव सागरः (कर्मधारयः) । चन्द्रार्धमौलौ – चन्द्रस्य अर्धं मौलौ यस्य सः चन्द्रार्धमौलिः (बहुव्रीहिः) तस्मिन् । निबिडः अनुरागः (कर्मधारयः) यस्य सः (बहुव्रीहिः–लोकः) । पयोदाः – पयांसि ददति इति (उपपदतत्पुरुषः) ॥

**अवधेयम्** – श्लो. 1, 2, 15 वसन्ततिलकावृत्तम् । श्लो. 18 इन्द्रवज्रा । अवशिष्टश्लोकेषु अनुष्टुप् ।

## स्वाध्यायः

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) भारतस्य ध्येयवाक्यम् अस्ति ।
(क) सत्यं परं धीमहि (ख) सत्यं ज्ञानमनन्तं (ग) सत्यात्मकं त्वाम् (घ) एषु नैकमपि

(2) अस्य नाटकस्य रचयिता कः ।
(क) हरिश्चन्द्रः (ख) विश्वामित्रः (ग) वेदव्यासः (घ) एषु नैकमपि

(3) चाण्डालकर्म कः करोति ?
(क) हरिश्चन्द्रः (ख) विश्वामित्रः (ग) वेदव्यासः (घ) एषु नैकमपि

(4) सर्वं कुत्र प्रतिष्ठितम् ?
(क) पुराणेषु (ख) संस्कृतसाहित्ये (ग) दर्शनशास्त्रेषु (घ) सत्ये

(5) नाटकस्य आरम्भे कः आगच्छति ?
(क) विश्वामित्रः (ख) तारामती (ग) सूत्रधारः (घ) नटी

(6) नाटके क्रोधयुक्तं पात्रम् अस्ति ?
(क) रोहितः (ख) देवाः (ग) विश्वामित्रः (घ) एषु नैकमपि

**2. एकवाक्येन उत्तरं लिखत ।**

(1) कानि सत्यस्य महिमानं बहुशः गायन्ति?
(2) दक्षिणाम् अर्जितुं विश्वामित्रः कियन्तम् अवधिं निर्धारयति?
(3) हरिश्चन्द्रस्य पुत्रस्य किं नामधेयम्?
(4) कया विहीनं दानं धर्मशास्त्रविरुद्धम्?
(5) दानं कस्मै प्रदातव्यम्?
(6) रक्षणीयं किं मतम्?
(7) किं कर्म सेवनीयम्?
(8) न भेतव्यं, न भेतव्यम् इति कस्य पात्रस्य उक्तिः?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) नटीसूत्रधारयोः संवादसारः लेख्यः ।
(2) हरिश्चन्द्रतारामत्योः संवादसारः लेख्यः ।
(3) सपरिवारं हरिश्चन्द्रः कुत्र निवसति ? तत्र च सः किं कार्यं करोति?
(4) अन्ते कः देवः आगत्य नेपथ्यात् पूर्वं किं वदति? ।
(5) सरलसंस्कृतेन भरतवाक्यस्य भावार्थः लेख्यः ।

**4. कस्य पात्रस्य उक्तिः इति संदर्भः लेख्यः ।**

(1) अस्तं गतः कमलिनीकुलनाथ एषः ।
(2) भोः सत्यवादिन् । दक्षिणाविहीनं दानं ददासि?
(3) किं करोम्यहम् । कं याचे ।
(4) एते सर्वेऽपि त्वां द्रष्टुमुपस्थिताः ।
(5) प्रभो! भवद्दर्शनेन आप्तकामोऽस्मि ।

**5. श्लोकपूर्तिः कर्तव्या ।**

(1) श्रूयन्ते ये हरौ चन्द्रे........।
(2) क्रूरता कीदृशी त्वद्य........।
(3) धर्मार्थं चैव सत्यार्थं..........।
(4) अहो धैर्यम् अहो सत्यम्.......।

**6. नाटके आगतानां सर्वेषां पात्राणां नामानि लेख्यानि ।**

## शिक्षकप्रवृत्तिः

- सत्यविषये अन्याः पौराणिकीः कथाः कथयित्वा अर्वाचीननाट्यं प्रति अभिमुखीकुर्युः ।
- नाटके समागतानां संवादानां व्यावहारिकसंस्कृते प्रयोगं कर्तुं प्रेरणां दद्युः ।
- रोचकप्रसङ्गानां नाट्यरूपान्तरं कारयेयुः ।

## छात्रप्रवृत्तिः

- सत्यस्य महिम्नः विषये आधुनिकाः कथाः कथयेयुः ।
- अस्य नाटकस्य मञ्चनं कुर्युः ।
- अन्येषाम् अर्वाचीननाटकानां विषये जिज्ञासां कुर्युः ।

# 5. एकाक्षरी भाषते

प्रस्तावना  जगति सर्वासु भाषासु प्राचीनतमा भाषा संस्कृतं वर्तते इति विदितचरमेव सर्वेषां विद्वज्जनानाम् । इयं प्राचीना संस्कृतभाषा जीवति न वेति विषये विचारद्वयम् प्रचलति साम्प्रतिके समाजे । केचन भारतीयाः सन्तः अपि भारतीयतां प्रति न्यूनां रुचिं न्यूनं गर्वं वा धारयन्ति अज्ञानतः विद्वेषतः वा कथयन्ति यत् संस्कृतभाषा मृता वर्तते । सा अद्यत्वे न जीवति । तेषां तर्कः वर्तते यत् भाषा यदि जीवति चेत् तां संभाषमाणाः जनाः अपि अवश्यं भवेयुः । अथ चापरं तर्कं ते प्रस्तुवन्ति यत् यदि भाषा मृता नास्ति चेत् नवीनानाम् साधनानां नामकरणे सा समर्था भवेदिति । यतोहि अद्यतने समाजे विज्ञानप्रौद्योगिकीनिर्मितानां पदार्थानां नामकरणे यथा अन्या भाषा समर्था भवति तथा संस्कृतभाषा समर्था नास्ति इति ।

एतत् तर्कद्वयमपि मिथ्याक्षेपात् अन्यत् किमपि नास्ति । संस्कृतभाषां भाषमाणाः बहवः जनाः साम्प्रतिके समाजे विचरन्ति । अथ च नवीनानां साधनानां नामकरणे यथा संस्कृतं समर्थमस्ति तथा नान्या कापि भाषा समर्था अस्ति । अत्र प्रमाणानाम् अभावः नास्ति परन्तु यत्र तत्र सर्वत्र बहूनि प्रमाणानि संस्कृतभाषा मृता न अपितु जीवति एव इत्यस्य । परम् एतदर्थं स्वीयात् संकुचितात् चित्तात् बहिरागमनमपेक्षते । पश्यन्तु भवन्तः, अधुनातने समाजे चायनाम्ना यत् प्रसिद्धं पेयं वर्तते तत्कृते किं संस्कृतभाषायां किमपि नाम कर्तुं शक्यते इति कश्चित् प्रश्नं करोति, तर्हि पाठः अयं प्रस्तोतव्यः ।

अयं पाठः चायनाम्ना प्रसिद्धं पेयपदार्थमधिकृत्य रचितः अस्ति, आधुनिकेन केनचित् पण्डितेन । संस्कृतभाषायाः संभाषणे अभिव्यक्तिकरणे नवीननामकरणे च कीदृशं सामर्थ्यमस्ति इति ये ज्ञातुमिच्छन्ति तेषां कृते अयं पाठः प्रत्यक्षप्रमाणत्वेन उपस्थितः भवति । अस्मिन्पाठे यथा एकाक्षरी प्रत्यक्षं भाषते तथैव एतस्य पाठस्य रचयिता अपि स्वीयेन नाम्ना परोक्षतः भाषते । परन्तु एतत् भाषणम् अधिगन्तुं संस्कृतजगतः सान्निध्यम् अपेक्षितं भवति । ये वर्तमानकालीनं संस्कृतजगत् जानन्ति ते एतत् वस्तुद्वयम् सम्यक् अवगन्तुं शक्नुवन्ति । किमधिकम् संस्कृतछात्राः पाठमिमं पठित्वा विना निर्देशम् अस्य पाठस्य रचयितुः नाम्ना परिचिताः भविष्यन्तीति संपादकानां दृढः विश्वासः ।

---

अहं चायमस्मि । जलं दुग्धं पर्णचूर्णं शर्करा एलादिचूर्णम्  एभिः पञ्चमहाभूतैः मे जन्म जायते । परमात्मन इव मे बहूनि रूपाणि सन्ति । क्वचित् आफ्रिकाजन इव कृष्णं मे रूपम् । क्वचित् भारतीयजन इव नातिकृष्णं नातिगौरं गोधूमवर्णं मे रूपम् भासते । क्वचित् च युरोपजन इव केवलं गौरवर्णमपि द्रष्टुं शक्यते ।

यथा खलु परमात्मनः बहूनि नामानि सन्ति तथैव ममापि बहूनि नामानि सन्ति । केचन माम् एकाक्षरी नाम्ना संबोधयन्ति । केचन मां चायम् इति नाम्ना भाषन्ते । केचन उष्णोदकम्, संजीवनी, कलिपानम् – इत्यादीनि बहूनि नामानि मे प्रयुञ्जते । किं कथयामि अद्यत्वेऽपि नामानि मे दिने दिने लङ्कां प्रविष्टस्य हनुमतः पुच्छमिव वर्धमानानि सन्ति ।

जगद्विधातुः भगवतः यथा विविधाः भक्ताः सन्ति, तथैव मदीया अपि भक्ताः विविधाः सन्ति । तेषु केचन धनिनः केचन निर्धनाः सन्ति । केचन अधीताक्षराः सन्ति केचन च अनधीताक्षराः सन्ति । केचन स्वामिनः वर्तन्ते तर्हि केचन सेवकाः सन्ति । केषां केषां नामसंकीर्तनं करवाणि, नागरिकाः स्युः ग्रामवासिनः स्युः, कृषकाः स्युः व्यवसायिनः स्युः, रोगिनः वैद्याः राजानः प्रजा इत्यादयः सर्वे मद्भक्ताः सन्ति ।

भक्तानां पुण्यवशात् प्रतिनगरं प्रतिग्रामं प्रतिवसति प्रतिगृहं भगवतः यथा मन्दिराणि सन्ति, तथा मदीयानि आपणानि अपि सर्वत्र सन्ति । मन्दिराणां प्रतिस्थानं स्थितित्वात् कश्चिदपि भक्तः भगवतः दर्शनं कर्तुं नातिदूरं गच्छति, तथैव मदीयानाम् आपणानां प्रतिस्थानं स्थितित्वात् कश्चिदपि मे भक्तः मम पानार्थं नातिदूरं गच्छति ।

परमात्मा इवाहं विश्वस्मिन् सर्वत्र व्याप्ता ।

केचन एकतन्त्रपूजामिव शीघ्रं केचन षोडशोपचारपूजनमिव शनैः शनैः मां स्वीकुर्वन्ति । आतिथ्यस्य पर्यायीभूताहं सर्वत्र पृथिव्यां पृथिवी एव भ्रमणशीलास्मि । बालकानां कृते अधिकदुग्धमिश्रितं मे सात्विकं रूपम्, सामान्यजनानां कृते सप्रमाणदुग्धमिश्रितं मे राजसं रूपं, परं विविधतीव्रचूर्णसमन्वितं कृष्णं मे तामसं रूपं चेति मे रूपत्रयं वर्तते । कलिकाले अहं गौरीशङ्करप्रसादोपमम् भोगायतम् अमृतमेव अस्मीति मन्ये ।

परमात्मनः शक्तिः यथा अनन्ता अस्ति तथैव मद्गता शक्तिः अपि अनन्ता अस्ति । किं कथयामि प्रातः उदितेऽपि सूर्ये निद्रां दूरीकर्तुं न्यूनातिन्यूनं त्रिवारमुदयमारूढाहं सदा सक्षमा वर्ते । शास्त्राणि इव अहमपि जनानां नेत्रोन्मीलं करोमि । लक्ष्मणस्य संजीवनीव जनानां मूर्च्छां संहरामि । समुद्रमन्थने प्रवृत्ताः देवदानवाः अमृतकुम्भाय अहमहमिकया यथा प्रयतन्ते तथैव प्रातः जनाः मां प्राप्तुं प्रयतन्ते । केचन विषमिव मां त्यजन्ति परं केचन नीलकण्ठः इव मां स्वीकृत्य कण्ठाभरणमिव सततं रक्षन्ति ।

सामान्यरूपेण जनाः मां द्विवारं सेवन्ते । परं मम नाम यदा दूरदर्शने आयाति तदा भगवता कृष्णेन धृतो गोवर्धनः यथा उन्नतिं प्राप्नोति तथा अहमपि उन्नता भवामि । देवताः राक्षसाः सर्वेऽपि यथा भगवन्तं शङ्करं विना विरोधेन स्वीकुर्वन्ति, तथैवाहं सज्जनदुर्जनैः सर्वैः स्वीकृता भगवान् आशुतोष इव सर्वान् आशु तोषयामि । तारापथे (आकाशे) स्थिताः तारकगणा इव मे असङ्ख्यकाः भक्ताः सन्ति । यद्यपि कोफी, शीतपेयानि च मया सह स्पर्धन्ते तथापि विश्वविजयिनी अहमेव पर्वतानां हिमालय इव स्थिता, भवतां सर्वेषां कृपया अजेया संवृत्ता सती धन्यतामनुभवामि ।

केचन मम तुलनां सूर्येण सह कुर्वन्ति । ये मम प्रशंसकाः सन्ति ते वदन्ति सूर्यः सहस्रकरः अहमपि सहस्रकरैः धृतास्मि । सूर्यः यथा प्रातः उदेति तथा अहमपि प्रातः उदयं प्राप्नोमि । सूर्यो नितान्तं तपति, अहमपि नितान्तं तपामि । सूर्यः जनान् प्रबोधयति अहमपि जनान् प्रबोधयामि । गृहे गृहे सूर्यस्य प्रातः स्वागतं भवति, ममापि तथैव स्वागतं भवति । सूर्यः विश्वव्याप्तः, अहमपि विश्वस्मिन् व्याप्ता अस्मि । एवं प्रकारेण यदा मम तौलनिकी प्रशंसा भवति तदा मया गर्वानुभूतिः क्रियते ।

भवन्तः तु विना कारणं मयि रुचिवन्तः सन्ति इति नास्ति अवसरः अधिकस्य वचनस्य । अतो वचनाद् विरमामि, भवतां हृदि तु सदा विष्णोः कौस्तुभमणिरिव विराजमाना एव अस्मि भविष्यामि च ।।

## टिप्पणी

**सन्धिः** परमात्मन इव (परमात्मनः इव) । नातिकृष्णम् (न अतिकृष्णम्) । ममापि (मम अपि) । अद्यत्वेऽपि (अद्यत्वे अपि) । इवाहम् (इव अहम्) । पर्यायीभूताहम् (पर्यायीभूता अहम्) उदितेऽपि (उदिते अपि) त्रिवारमुदयमारुढाहम् त्रिवारम् उदयम् आरूढा अहम्) सञ्जीवनीव (सञ्जीवनी इव) ।

**समासः** पर्णचूर्णम् (पर्णस्य चूर्णम् ष.तत्पु.) । आफ्रिकाजनः (आफ्रिकायाः जनः ष.तत्पु.) । एकाक्षरी (एकम् अक्षरम् यस्याः सा बहु.) । उष्णोदकम् (उष्णं चादः उदकम् कर्म.) । कलिपानम् (कलेः पानम् ष.तत्पु.) । जगद्विधातुः (जगतः विधाता, तस्य ष.तत्पु.) । अधीताक्षराः (अधीतानि अक्षराणि यैः ते बहु.) । अनधीताक्षराः (न अधीताक्षराः नञ्त.) । मानसंकीर्तनम् (मानस्य संकीर्तनम् ष.तत्पु.) । भ्रमणशीला (भ्रमणं शीलम् येषाम् ते बहु.) । अधिकदुग्धमिश्रितम् (अधिकेन दुग्धेन मिश्रितम् तृ.तत्पु.) । सामान्यजनानाम् (सामान्यः चासौ जनः, तेषाम् कर्म.) । सप्रमाणदुग्धमिश्रितम् प्रमाणेन सहितम् बहु., सप्रमाणं चादः दुग्धम् कर्म., सप्रमाणदुग्धेन मिश्रितम् – तृ.तत्पु.) । नेत्रोन्मीलनम् (नेत्रयोः उन्मीलनम्

– तृ.तत्पु.) । समुद्रमन्थने (समुद्रस्य मथनम्, तस्मिन् – तृ.तत्पु.) । देवदानवाः (देवाः च दानवाः च इ.द्व.) । अमृतकुम्भाय (अमृतस्य कुम्भः, तस्मै– तृ.तत्पु.) । अहमहमिकया (अहं पूर्वम् अहं पूर्वम् इति) । कण्ठाभरणम् (कण्ठस्य आभरणम् – तृ.तत्पु.) । सज्जनदुर्जनैः (सज्जनाः च दुर्जनाः च, तैः इ.द्व.) । सहस्रकरः (सहस्रम् कराः यस्य सः बहु.) गर्वानुभूतिः (गर्वस्य अनुभूतिः – तृ.तत्पु.) । विश्वव्याप्तः (विश्वस्मिन् व्याप्तः स.तत्पु.) ।।

**शब्दार्थः** चायम् (एतन्नामकम् एकं प्रसिद्धं पेयम्, चा इति भाषायाम्) । भाषन्ते (वदन्ति) । व्यवसायिनः (व्यापारिणः) । आपणानि (विक्रयस्थानानि) । मूर्च्छाम् (अचेतनताम्) । अहमहमिकया (अहम् पूर्वम् अहं पूर्वम् इति क्रमेण) । नीलकण्ठः (शिवः) । कण्ठाभरणम् (कण्ठस्य अलङ्करणम्) । आशुतोषः (शिवः) उदेति (उदयं प्राप्नोति) । तौलनिकी (तुलनात्मिका, तुलनायाः सम्बन्धिनी) । रुचिवन्तः (रुचिः अस्ति येषाम् ते) । रमे (रमणं करोमि) ।।

**स्वाध्यायः**

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) रूपाणि मे क इव सन्ति?

(क) सूर्यः इव (ख) परमात्मा इव (ग) चन्द्रमा इव (घ) अनिलः इव

(2) क इव मे कृष्णं रूपम् अस्ति?

(क) आफ्रिकाजन इव (ख) भारतीयजन इव (ग) सामान्यजन इव (घ) युरोपजन इव

(3) यथा मन्दिराणि तथा मे सन्ति?

(क) गृहाणि (ख) नगराणि (ग) वनानि (घ) आपणानि

(4) सप्रमाणदुग्धमिश्रितं मे रूपमस्ति?

(क) राजसं रूपम् (ख) तामसं रूपम् (ग) सात्विकं रूपम् (घ) मधुरं रूपम्

(5) शास्त्राणि इव अहमपि किं करोमि?

(क) नेत्रोन्मीलनम् (ख) नेत्रमीलनम् (ग) मुखोन्मीलनम् (घ) सुखोन्मीलनम्

(6) केचन मां... इव त्यजन्ति?

(क) सुखम् (ख) दुःखम् (ग) विषम् (घ) अमृतम्

**2. एकवाक्येन उत्तरं लिखत ।**

(1) भरतीयजन इव मे कीदृशं रूपमस्ति?

(2) नामानि मे कति सन्ति?

(3) मम पानार्थं भक्तः कुत्र गच्छति?

(4) अहं कस्य पर्यायीभूता?

(5) मद्गता शक्तिः कीदृशी वर्तते?

(6) क इव मे असंख्यकाः भक्ताः सन्ति?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) मम जन्म कैः पदार्थैः जायते ।

(2) एकाक्षर्याः भक्ताः के के सन्ति ।

(3) एकाक्षर्याः सात्विकादीनि रूपाणि लिखत ।

(4) के मया एकाक्षर्या सह स्पर्धन्ते ।

(5) मदीया तुलना केन सह भवति?

**4. सामासिकपदानां परिचयं कारयत ।**

(1) एकाक्षरी

(2) अनधीताक्षराः

(3) षोडशोपचारपूजनम्

(4) न्यूनातिन्यूनम्

(5) नेत्रोन्मीलनम्

(6) सज्जनदुर्जनैः

**5. अधस्तनेषु वाक्येषु उपमान-उपमेययोः परिचयं कारयत ।**

(1) परमात्मनः नामानि इव ममापि बहूनि नामानि सन्ति ।

(2) मे नामानि हनुमतः पुच्छमिव वर्धमानानि सन्ति ।

(3) यथा मन्दिराणि तथा मे आपणानि सन्ति ।

(4) पृथिवी इव अहं भ्रमणशीला अस्मि ।

(5) आशुतोष इव अहं सर्वान् आशुतोषयामि ।

**6. पदस्य तदर्थस्य च परिचयं कारयत ।**

(1) पञ्चमहाभूतानि

(2) संजीवनी

(3) कलिपानम्

(4) नागरिकाः

(5) षोडशोपचारपूजनम्

(6) अमृतकुम्भः

**7. यथापाठं रिक्तस्थानानां पूर्तिः विधेया ।**

(1) केचन माम् ................ नाम्ना संबोधयन्ति ।

(2) ................ भगवतः यथा विविधाः भक्ताः सन्ति ।

(3) भक्तानां पुण्यवशात् ................ भगवतः मन्दिराणि सन्ति ।

(4) कलिकाले अहं भोगायतम् ................ एव अस्मि ।

(5) ................ सञ्जीवनीव जनानां मूर्च्छां संहरामि ।

(6) सामान्यरूपेण जनाः मां ................ सेवन्ते ।

●

# 6. द्वारपालस्य सेवानिष्ठा

संस्कृतसाहित्ये मुख्यत्वेन विभागद्वयं मन्यन्ते बुधजनाः । पद्यकाव्यं गद्यकाव्यञ्च । गद्यकाव्यस्यापि पद्यकाव्यवत् प्राचीनकालत एव विकासः दृश्यते । कादम्बरी, दशकुमारचरितम्, कथासरित्सागरः, हर्षचरितमित्यादीन्यनेकानि गद्यकाव्यानि उपलब्धानि सन्ति । तथैव महाकविना अम्बिकादत्तव्यासेन रचितमेतद् ''शिवराजविजय'' इति नामकं गद्यकाव्यं सर्वरीत्या वैशिष्ट्यपूर्णमस्ति । इदं गद्यकाव्यं मुख्यत्वेन त्रिषु विरामेषु विभक्तमस्ति । प्रथमविरामे चत्वारः उच्छ्वासाः सन्ति । पण्डितः अम्बिकादत्तव्यासः प्रतिभायुक्तः वैश्विकभावनायुक्तः शास्त्रनिष्णातश्चासीत् । गतशताब्देः उत्तरार्धे पण्डिताम्बिकादतस्य जयपुरनगरे जन्म अभवत् किन्तु तेषां कार्यक्षेत्रं बिहारप्रदेशः । तस्य स्थितिकालः विक्रमाब्दान्तर्गतोऽस्ति । अस्मिन् ग्रन्थे छत्रपति-शिवाजीमहाराजस्य चरित्रं, दिग्विजययात्रावर्णनं च विद्यते । एतिह्यविषयस्य सुचारुवर्णने अम्बिकादत्तस्य कवित्वशक्तिः गद्यवैशिष्ट्यं, घटनाक्रमस्य चाद्भुतप्रवाहः अत्र दरीदृश्यते । देशभक्त्युत्थानसमये निर्मितेऽस्मिन् ग्रन्थे देशभक्तेः उदात्तभावानां कमनीयवर्णनं सौम्यं रुचिरञ्चास्ति । वर्णनेषु सजीवतानयनाय प्रभावोत्पादनाय च समासबहुलाम् ओजोगुणमण्डितां च शैलीमाश्रयते तथापि अम्बिकादत्तः कस्याश्चित् शैल्याः क्रीतदासो न लक्ष्यते । अपितु विषयानुसारं शैलीं परिवर्त्य निजप्रतिभां प्रदर्शयति । अत एव गद्यसाहित्येऽस्य गद्यम्, आदर्शस्वरूपम् अद्वितीयं च मन्यते ।

प्रस्तुतोऽयं गद्यांशः प्रथमविरामस्य द्वितीयोच्छ्वासात् समुद्धृतोऽस्ति ।

---

ततः संवृते किञ्चिदन्धकारे धूप-धूमेनेव व्याप्तासु हरित्सु भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः आगत-प्रत्यागतञ्च विदधानः, प्रताप-दुर्ग-दौवारिकः, कस्यापि पादक्षेपध्वनिमिवाश्रौषीत् । ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीप-प्रकाशेऽवतमसवशादागन्तारं कमप्यनवलोकयन्, गम्भीरस्वरेणैवमवादीत् कः कोऽत्र भोः ? इति ।

अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावित् । भूयः साक्षेपमवोचत् क एष मामनुत्तरयन् मुमुर्षुः समायाति बधिरः ?

ततो दौवारिक! शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि? इति वक्तारमपश्येतैवाकर्णि मन्दस्वरमेदुरावाणी । अथ तत्किं नाऽज्ञायि अद्याऽपि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिःपृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति इत्येव भाषमाणेन द्वारस्थेन क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि इति कथयन्, द्वादशवर्षेण केनापि भिक्षुबटुनाऽनुगम्यमानः, कोऽपि कषायवासाः धृत-तुम्बी-पात्रः, भस्मच्छुरितललाटः, रुद्राक्षमालिका-सनाथित-कण्ठः, भव्यमूर्तिः संन्यासी दृष्टः । ततस्तयौरेवमभूदालापः।

**संन्यासी** : कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

**दौवारिकः** : भगवन् ! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददेवायातीत्याक्रुश्यते ।

**संन्यासी** : सत्यं क्षान्तोऽयमपराधः, परमद्यावधि संन्यासिनः ब्रह्मचारिणः, पण्डिताः, स्त्रियः, बालाश्च न किमपि प्रष्टव्याः, आत्मानमपरिचाययन्तोऽपि प्रवेष्टव्याः ।

**दौवारिकः** : संन्यासिन् । संन्यासिन् । बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे । किन्तु यो वैदिकधर्मरक्षा-व्रती, यश्च संन्यासिनां ब्रह्मचारिणां तपस्विनाञ्च संन्यासस्य ब्रह्मचर्यस्य तपसश्चान्तरायाणां हन्ता, येन च वीरप्रसविनीयमुच्यते कोङ्कणदेश-भूमिः, तस्यैव महाराज-शिववीरस्याज्ञां वयं शिरसा वहामः ।

**संन्यासी** : अथ किमप्यस्तु, पन्थानं निर्दिश, आवां शिववीरनिकटे जिगमिषावः ।

**दौवारिकः** : अलमालप्यापि तत्, प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ ।

**संन्यासी** : तत्किं कोऽपि न प्रविशति रात्रौ ?

**दौवारिकः** : (साक्षेपम्) कोऽपि कथं न प्रविशति ? परिचिता वा प्राप्तपरिचयपत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः, ये तुम्बीं गृहीत्वा द्वाराद् द्वारम् इति कथयन्नेव तत्तेजसेव घर्षितो मध्य एव विरराम ।

**संन्यासी** : (स्वगतम्) राजनीतिनिष्णातः शिववीरः । सर्वथा दौवारिकतायोग्य एवायं द्वारपालः स्थापितोऽस्ति । परीक्षितमप्येनमेकस्मिन् विषये पुनः परीक्षिष्ये तावत् । (प्रकटम्) दौवारिक ! इत आयाहि, किमपि कर्णे कथयिष्यामि ।

**दौवारिकः** : (तथा कृत्वा) कथ्यताम् ।

**संन्यासी** : निरीक्षस्व त्वमधुना दौवारिकोऽसि, प्राणानगणयन् जीविकां निर्वहसि, त्वं सहस्रं वाऽयुतं वा मुद्रा राशीकृताः कदापि प्राप्यसीति न कथमपि संभाव्यते ।

**दौवारिकः** : आम्, अग्रे कथ्यताम् ।

**संन्यासी** : वयञ्च संन्यासिनो वनेषु गिरिकन्दरेषु च विचरामः, सर्वरसायनतत्त्वं विद्मः ।

**दौवारिकः** : स्यादेवम्, अग्रे अग्रे ?

**संन्यासी** : तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः तदधुनैव परिष्कृतं पारद-भस्म तुभ्यं दद्याम्, यथा त्वं गुञ्जामात्रेणाऽपि द्वापञ्चाशत्सङ्ख्यात्मकतुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः ।

**दौवारिकः** : हं हो ! कपटसंन्यासिन् ! कथं विश्वासघातं स्वामिवञ्चनञ्च शिक्षयसि ? ते केचनाऽन्ये भवन्ति जार-जाताः, ये उत्कोच-लोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशाः । (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वम् ? कुतः आयातः ? केन वा प्रेषितः ?

**संन्यासी** : (स्मित्वेव) अथ त्वं मा कं मन्यसे ?

**दौवारिकः** : अहं तु त्वामस्यैव ससैनस्यायातस्य अफजलखानस्य...

**संन्यासी** : (विनिवार्य मध्य एव) धिग् धिग् ।

**दौवारिकः** : कस्याऽप्यन्यस्य वा गूढचरं मन्ये । तदादेशं पालयिष्यामि प्रभुवर्यस्य । (हस्तमाकृष्य) आगच्छ दुर्गाध्यक्षस्य समीपे, स एवाऽभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।

ततः संन्यासी तु त्यज, नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि, दयस्व दयस्व इति सहस्रधा समचकथयत्, तथापि दौवारिकः तमाकृष्य नयन्नेव प्रचलितः ।

अथ यावद् द्वारस्थ-स्तम्भोपरि संस्थापितायां काच-मञ्जूषायां जाज्वल्यमानस्य प्रबलप्रकाशस्य दीपस्य समीपे समायातः, तावत्संन्यासिनोक्तम् - दौवारिक ! अपि मां पूर्वमपि कदाऽप्यद्राक्षीः ? ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण, अरुणापाङ्गाभ्यां लोचनाभ्याम्, गौरतरेण वर्णेन चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्यचिनोत् । भुशुण्डी-समुत्तोलन-किण-कर्कश-करग्रहमपहाय, सलज्ज इव च नम्रीभूय, प्रणमन्नुवाच आः कथं श्रीमान् गौरसिंह आर्यः ? क्षम्यतामनुचितव्यवहारेण एतस्य ग्राम्य-वराकस्य । तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत् दौवारिक ! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि, यथायोग्य एव पदे नियुक्तोऽसि चेति । त्वादृशा एव प्रभूणां पुरस्कारभाजनानि भवन्ति, लोकद्वयञ्च विजयन्ते । तव प्रामाणिकतां जानाति एवाऽत्रभवान् प्रभुवर्य्यः परमहमपि विशिष्य कीर्तयिष्यामि । निर्दिश तावत् श्रीमान् ? किञ्चाऽनुतिष्ठति ?

(शिवराजविजयः)

## टिप्पणी

**शब्दार्थाः** हरित्सु (दिक्षु) भुशुण्डीम् (आयुधविशेषम् (बन्दूक इति)) विदधानः (कुर्वाणः) अवतमसम् (गाढद्वान्तम्) मन्द्रस्वरेण (गम्भीरनादेन) मेदुरा (सान्द्रस्निग्धा) आकर्णि (श्रुतः) सनाथितः (भूषितः) तुरीयाश्रमसेवी (चतुर्था(संन्यासी)श्रमवासी) अददत् (अयच्छन्) अपरिचाययन्तः (परिचियमददतः) शिरसा वहामः (सर्वथा पालयामः) हन्ता (निवारयिता) घर्षितः (भीषितः) परीक्षिष्ये (परीक्षां करिष्ये) निरीक्षस्व (अवलोकय) तत्वम्) – सामर्थ्यम्) प्रतिरुन्धेः (प्रतिवारयेः) परिष्कृतम् (संशोधितम्) जाम्बूनदम् (सुवर्णम्) जारजाता (धूर्ताः) अपाङ्गः नेत्रप्रान्तभागः) चुम्बितम् (स्पृष्टम्) निर्भीकेण (भयशून्येन) हारिणा (मनोहरेण) पर्यचिनोत् (परिचितवान्) समुतोलनेन (उत्थापनेन) किणः चिन्हविशेषः) कर्कशस्य (कठोरस्य) ग्रहः (ग्रहणम्) ।।

**समासः** सेवानिष्ठा–सेवायां/सेवायै निष्ठा (सप्तमी/चतुर्थीतत्पुरुषः) तुरीयाश्रमवासी – तुरीयः आश्रमः (कर्मधारयः) तस्मिन् वासः यस्य सः (बहुव्रीहि)। मन्द्रस्वरेण – मन्द्रः च असौ स्वरः तेन (कर्मधारयः)। अपरिचाययन्तः – न परिचाययन्तः इतिः (नञ्तत्पुरुषः)। निर्भीकेण – निर्गतं भयं यस्मात् तेन (बहुव्रीहिः)। कषायवासाः – कषायं वासः येषां ते (बहुव्रीहि)।

**तिङन्त( धातु )पदपरिचयः** – अश्रौषीत् (श्रृ लुङ्१.१) अवादीत् (वद लुङ १.१) अभूत् (भू लुङ १.१) अश्रावि (कर्मणि लुङ् १.१) आकर्णि आ+कर्ण कर्मणि लुङ्१.१) आयाहि (आ+या लोट् २.१) अवोचत् (ब्रू/वच् लङ्१.१) अद्राक्षीः (दृश् लुङ् २.१) निरीक्षस्व (निर्+ईक्ष् लोट् २.१) प्रतीक्षामहे (प्रति+ईक्ष लट् ३.३) पर्यचिनोत् (परि+चि लङ्१.१) प्रतिरुन्धेः (प्रति+रुध् विधिलिङ् २.१)

सुबन्त(नाम/शब्द)पदपरिचयः – निरीक्षमाणः (व.कृ.पुं.१.१) विदधानः कृपु.१.१) परिचाययन्तः (व.कृ.पु.१.३) ततः (अ.) किञ्चित् (अ.) आलप्य (सं.भू.कृ.-अ.)

### स्वाध्यायः

1. **अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) शिवराजविजयस्य रचयिता कः अस्ति?

(क) बाणभट्टः (ख) अम्बिकादतव्यासः (ग) सुबन्धुः (घ) श्रीहर्षः

(2) पाठेऽस्मिन् कस्य दुर्गस्य दौवारिकः उपवर्णितः?

(क) प्रतापदुर्गस्य (ख) रक्तदुर्गस्य (ग) सिंहदुर्गस्य (घ) जीर्णदुर्गस्य

(3) संन्यासिना सह कति वर्षाणां भिक्षुबटुः आसीत्?

(क) दश (ख) एकादश (ग) द्वादश (घ) त्रयोदश

(4) दौवारिकः कस्य आज्ञां न प्रतीक्षते?

(क) ब्रह्मणः (ख) विष्णोः (ग) इन्द्रस्य (घ) शिवस्य

(5) का भूमिः वीरप्रसविनी उच्यते अस्मिन् पाठे?

(क) गुर्जरभूमिः (ख) बिहारभूमिः (ग) बङ्गभूमिः (घ) कोङ्कणभूमिः

(6) संन्यासिरूपेण वस्तुतः कः आगतः अस्ति?

(क) शिववीरः (ख) अफजलखानः (ग) गौरसिंहः (घ) कोऽपि न

**2. अतिलघूत्तरप्रश्नाः ।**

(1) दौवारिकः स्कन्धे किं निधाय प्रविशति ?

(2) दौवारिकः पादध्वनिं श्रुत्वा किम् अवादीत् ?

(3) दौवारिकः कस्य आज्ञां शिरसा वहति ?

(4) संन्यासिनां कृते दुर्गप्रवेशसमयः कः ?

(5) संन्यासिनः मतानुसारं राजनीति – निष्णातः कः अस्ति ?

**3. द्वित्रिवाक्यैः उत्तरं लिखत ।**

(1) दौवारिकेण कीदृशः संन्यासी दृष्टः ?

(2) संन्यासिनः मतानुसारं के न प्रष्टव्याः ?

(3) दौवारिकस्य कर्णे संन्यासी किं कथयति ?

(4) दौवारिकः संन्यासिनं कस्य समीपे नयति ?

**4. टिप्पणीं लिखत ।**

(1) शिववीरः दौवारिकदृष्ट्या ।

(2) पाठे निरूपिता स्वामिभक्तिः ।

(3) दौवारिकपरीक्षा ।

**5. कः कं प्रति कथयति ।**

(1) कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

(2) आत्मानमपरिचाययन्तोऽपि प्रवेष्टव्याः ?

(3) कथं विश्वासघातं स्वामिवञ्चनञ्च शिक्षयसि ?

(4) महाशयोऽसि, दयस्व दयस्व ।

**शिक्षकप्रवृत्तिः**

शिववीरसदृशानामन्यदेशभक्तानां चरितं छात्रेभ्यः कथयेत् ।

स्वामिभक्तिविषयकान् अन्यप्रसङ्गान् वर्णयेत् ।

**छात्रप्रवृत्तिः**

संवादांशं नाटकीयरीत्या शालासु प्रदर्शयेत् ।

●

# 7. उत्तररामचरितम्

आदिमहाकाव्यं रामायणम् आधारीकृत्य संस्कृतसाहित्ये अनेकविधा: रचना: कृता: सन्ति कविभि: । तेषु मर्यादापुरुषोत्तमं रामम् अधिकृत्य श्रव्यकाव्येषु कविकुलगुरो: कालिदासस्य रघुवंशम्, महाकविभट्टस्य भट्टिकाव्यम् (अपरनाम रावणवधम्), चेति काव्यद्वयं सद्य: एव स्मृतिपथमायाति । एवमेव दृश्यकाव्येषु मुरारिकवे: अनर्घराघवम्, जयदेवस्य प्रसन्नराघवम्, भास्करकवे: उन्मत्तराघवम् चेति नैका: रचना: स्मृतिपथमायान्ति । इतोऽपि सुप्रसिद्धम् भावस्य अतिरेकजननं करुणेन रसेन परिपूर्णम् तत्रभवता महाकविना भवभूतिना विरचितम् उत्तररामचरितम् कस्यापि कदापि विस्मृतपथं न गच्छति । अनेन महाकविना भवभूतिना रूपकत्रयस्य रचना कृता । रूपकत्रयमिदं महावीरचरितम्, मालतीमाधवम् उत्तररामचरितम् चेति नाम्ना प्रसिद्धम् अस्ति ।

अयं कवि: अष्टम्या: ईस्वीयशताब्द्या: पूर्वार्धे जात: इति विद्वांस: स्वीकुर्वन्ति । अथ चायं विदर्भदेशीय: पद्मपुरवास्तव्य: काश्यपगोत्रोत्पन्न: यजुर्वेदस्य तैतिरीयशाखाध्यायी नीलकण्ठ–जतुकर्ण्यो: पुत्र: इत्यादिकमपि निर्धारयन्ति । एवं हि श्रूयते यत् कालिदासेन शकुन्तलाया: पतिगृहप्रस्थानप्रसङ्गे वृक्षा: भावेन आर्द्रीकृता: परन्तु अनेन भवभूतिना तु उत्तररामचरिते नाटके पुटपाकसदृशे रामस्य करुणरसस्य वर्णने पाषाणेभ्य: अश्रुबिन्दव: पातिता: इति । किमधिकं ब्रूमहे भवभूते: काव्यप्रतिभाया: सर्वोत्कृष्टं दृष्टान्तरूपमिदम् उत्तरामचरितम् अस्ति ।

अस्य उत्तररामचरितस्य नाटकस्य य: चतुर्थ: अङ्क: वर्तते, तस्य अन्तिम: अंश: अत्र संपाद्य संगृहीत: अस्ति । अस्मिन् अंशे आश्रमबटूनाम् अश्वमेधस्य घोटकेन सह साक्षात्कार: भवति । अस्य प्रसङ्गस्य महाकविना भवभूतिना यादृशं नाट्यात्मकं वर्णनं कृतमस्ति तत् सर्वथा विशिष्टं वर्तते । अनेन पाठेन वयं ज्ञातुं शक्नुम: यत् उत्तरे रामचरिते भवभूतिर्विशिष्यते इति वचनम् केन कारणेन सार्थकम् अस्तीति ।

---

(नेपथ्ये)

भो भो: सैनिका ! एष खलु कुमारश्चन्द्रकेतुराज्ञापयति: न केनचिदाश्रमाभ्यर्णभूमय आक्रमितव्या इति ।

**लव:**

**अरुन्धतीजनकौ** : अये! मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुर्द्रष्टव्य इत्यसौ सुदिवस: ।

**कौसल्या** : वत्सलक्ष्मणस्य पुत्रक: आज्ञापयतीत्यमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते ।

**लव:** : आर्य! क एष चन्द्रकेतुर्नाम?

**जनक:** : जानासि रामलक्ष्मणौ दाशरथी?

**लव:** : एतावेव रामायणकथापुरुषौ?

**जनक:** : अथ किम्?

**लव:** : तत्कथं न जानामि?

**जनक:** : तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतु: ।

**लव:** : ऊर्मिलाया: पुत्रस्तर्हि मैथिलस्य राजर्षे: दौहित्र: ।

**अरुन्धती** : आविष्कृतं कथाप्रावीण्यं वत्सेन ।

**जनकः** : (विचिन्त्य) यदि त्वमीदृशः कथायामभिज्ञस्तद् ब्रूहि तावत्पश्यामस्तेषां दशरथस्य पुत्राणां कियन्ति किंनामधेयान्यपत्यानि केषु दारेषु प्रसूतानि ?

**लवः** : नाऽयं कथाविभागोऽस्माभिरन्येन वा श्रुतपूर्वः ।

**जनकः** : किं न प्रणीतः कविना ?

**लवः** : प्रणीतः, न तु प्रकाशितः । तस्यैव कोऽप्येकदेशः प्रबन्धान्तरेण रसवानभिनेयार्थः कृतः । तं च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद् भगवतो भरतस्य तौर्यत्रिकसूत्रधारस्य ।

**जनकः** : किमर्थम् ?

**लवः** : स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति ।

**जनकः** : सर्वमिदमाकूततरमस्माकम् ।

**लवः** : महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था । यतः केषाञ्चिदन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम् । तेषामनुयात्रिकश्चापपाणिः प्रमादच्छेदनार्थमस्मद्भ्राता प्रेषितः ।

**कौसल्या** : भ्रातापि तेऽस्ति ?

**लवः** : अस्त्यार्यः कुशो नाम ।

**कौसल्या** : ज्येष्ठ इति भणितं भवति ।

**लवः** : एवमेतत् । प्रसवानुक्रमेण स किल ज्यायान् ।

**जनकः** : किं यमावायुष्मन्तौ ?

**लवः** : अथ किम् ?

**जनकः** : वत्स । कथय, कथाप्रपञ्चस्य कियान्पर्यन्तः ?

**लवः** : अलीकपौरापवादोद्विग्नेन राज्ञा निर्वासितां देवीं देवयजनसम्भवां सीतामासन्नप्रसव-वेदनामेकाकिनीमरण्ये लक्ष्मणः परित्यज्य प्रतिनिवृत्त इति ।

**कौसल्या** : हा वत्से मुग्धमुखि ! क इदानीं ते शरीरकुसुमस्य झटिति दैवदुर्विलासपरिणाम एकाकिन्या निपतितः ?

**जनकः** : हा वत्से ।

**नूनं त्वया परिभवं च वनं च घोरं**
**तां च व्यथां प्रसवकालकृतामवाप्य ।**
**क्रव्याद्गणेषु परितः परिवारयत्सु**
**संत्रस्तया शरणमित्यसकृत्स्मृतोऽहम् ।।**

**लवः** : आर्ये । कावैतौ ?

**अरुन्धती** : इयं कौसल्या । अयं जनकः । (लवः सबहुमानखेदकौतुकं पश्यति)

**जनकः** : अहो निर्दयता दुरात्मनां पौराणाम् । अहो रामभद्रस्य क्षिप्रकारिता ।

**एतद्वैशसघोरवज्रपतनं शश्वन्ममोत्पश्यतः ।**
**क्रोधस्य ज्वलितुं झटित्यवसरश्चापेन शापेन वा ।।**

**कौसल्या** : (सभयकम्पम्) भगवति ! परित्रायताम् । प्रसादय कुपितं राजर्षिम् ।

**लवः** : एतद्धि परिभूतानां प्रायश्चितं मनस्विनाम् ।

**अरुन्धती** : **राजन्नपत्यं रामस्ते पाल्याश्च कृपणा जनाः ।।**

**जनकः** : **शान्तं वा रघुनन्दने तदुभयं यत्पुत्रभाण्डं हि मे**
**भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः ।।**

(प्रविश्य सम्भ्रान्ताः)

**बटवः** : कुमार! कुमार! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः ।

**लवः** : अश्वोऽश्व इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते, तद् ब्रूत कीदृशः?

**बटवः** : अये! श्रूयताम् ।
**पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्**

**दीर्घग्रीवः** : **स भवति खुरास्तस्य चत्वार एव ।**
**शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्**
**किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः ।।**

(इत्यजिने हस्तयोश्चाकर्षयन्ति)

**लवः** : (सकौतुकोपरोधविनयम्) आर्याः । पश्यत । एभिर्नीतोऽस्मि । (इति त्वरितं परिक्रामति ।) अरुन्धतीजनकौ महत्कौतुकं वत्सस्य ।

कौसल्या अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च । भगवति ! जानामि तं पश्यन्ती वञ्चितेव ।

तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत्पलायमानं दीर्घायुषम् ।

**अरुन्धती** : अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते ?

**कञ्चुकी** : (प्रविश्य) भगवान् वाल्मीकिराह - ज्ञातव्यमेतदवसरे भगवद्भिरिति ।

**जनकः** : अतिगम्भीरमेतत्किमपि । भगवत्यरुन्धति! सखि कौसल्ये! आर्य गृष्टे! स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः ।

(इति निष्क्रान्तो वृद्धवर्गः)

(प्रविश्य)

**बटवः** : पश्यतु कुमारस्तावदाश्चर्यम् ।

**लवः** : दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्वः ।

**बटवः** : कथं ज्ञायते?

**लवः** : ननु मूर्खाः । पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः । तत्प्रायमेवान्यदपि दृश्यते । यदि च विप्रत्ययस्तत्पृच्छथ ।

**बटवः** : भो भोः । किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति?

**लवः** : (सस्पृहमात्मगतम् ।) अश्वमेध इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः ।

(नेपथ्ये)

**योऽयमश्वः पताकेयमथवा वीरघोषणा ।**

**सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ।।**

**लवः** : (सगर्वम्) अहो संदीपनान्यक्षराणि ।

**बटवः** : किमुच्यते? प्राज्ञः खलु कुमारः ।

**लवः** : भो भोः, तत्किमक्षत्रिया पृथिवी यदेवमुद्घोष्यते ।

(नेपथ्ये)

रे रे । महाराजं प्रति कुतः क्षत्रियः?

**लवः** : धिग्जाल्मन् ।

**यदि नो सन्ति सन्त्येव केयमद्य विभीषिका ।**

**किमुक्तैरेभिरधुना तां पताकां हरामि वः ।।**

हे बटवः! परिवृत्य लोष्टैरभिघ्नन्त उपनयनतैनमश्वम् । एष रोहितानां मध्येचरो भवतु ।

(प्रविश्य सक्रोधः)

**पुरुषः** : धिक्चपल! किमुक्तवानसि? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोऽप्यपूर्वारण्यदर्शनाक्षिप्तदयो न यावदायाति, तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

**बटवः** : कुमार । कृतं कृतमश्वेन । तर्जयन्ति विस्फारितशरासनाः कुमारमायुधीयश्रेणयः । दूरे चाश्रमपदम् । इतस्तदेहि । हरिणप्लुतैः पलायामहे ।

**लवः** : किं नाम विस्फुरन्ति शस्त्राणि ? (इति धनुरारोपयन्)

**ज्याजिह्वया वलयितोत्कटकोटिदंष्टं-**

**मुद्गारिघोरघनघर्घरघोषमेतत् ।**

**ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-**

**जृम्भाविडम्बि विकटोदरमस्तु चापम् ।।**

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

[इति महाकविभवभूतिविरचिते उतररामचरिते कौसल्याजनकयोगो नाम चतुर्थोऽङ्कः।]

## टिप्पणी

**सन्धिः** कुमारश्चन्द्रकेतुराज्ञापयति (कुमारः चन्द्रकेतुः आज्ञापयति) । वत्सश्चन्द्रकेतुर्द्रष्टव्य इत्यसौ (वत्सः चन्द्रकेतुः द्रष्टव्यः इति असौ) । आज्ञापयतीत्यमृतबिन्दुसुन्दराण्यक्षराणि (आज्ञापयति इति अमृतबिन्दुसुन्दराणि अक्षराणि) क एष चन्द्रकेतुर्नाम (कः एषः चन्द्रकेतुः नाम) । एतावेव (एतौ एव) । लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः (लक्ष्मणस्य अयम् आत्मजः चन्द्रकेतुः) । पुत्रस्तर्हि (पुत्रः तर्हि) । नाऽयं कथाविभागोऽस्माभिरन्येन (न अयं कथाविभागः अस्माभिः अन्येन) । तस्यैव कोऽप्येकदेशः (तस्य एव कः अपि एकदेशः) । भरतस्तमप्सरोभिः (भरतः तम् अप्सरोभिः) वाल्मीकेरास्था (वाल्मीकेः आस्था) । भ्रातापि तेऽस्ति (भ्राता अपि ते अस्ति) । अस्त्यार्यः (अस्ति आर्यः) । यमावायुष्मन्तौ (यमौ आयुष्मन्तौ) । शरणमित्यसकृत्स्मृतोऽहम् (शरणम् इति असकृत् स्मृतः अहम्) । कावेतौ (कौ एतौ) । शश्वन्ममोत्पश्यतः (शश्वत् मम उत्पश्यतः) । झटित्यवसरश्चापेन (झटिति अवसरः चापेन) । एतद्धि (एतत् हि) । राजन्नपत्यम् (राजन् अपत्यम्) ।

रामस्ते पाल्याश्च (रामः ते पाल्याः च) । अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते । (अश्वः अश्वः इति कः अपि भूतविशेषः जनपदेषु अनुश्रूयते) । इत्यजिने हस्तयोश्चाकर्षयन्ति (इति अजिने हस्तयोः च अपकर्षति) । एभिर्नीतोऽस्मि (एभिः नीतः अस्मि) । वञ्चितेव (वञ्चिता इव) । तस्मादितोऽन्यतो भूत्वा (तस्मात् इतः अन्यतः भूत्वा) । कुमारस्तावदाश्चर्यम् (कुमारः तावत् आश्चर्यम् ) । विप्रत्ययस्तत्पृच्छथ (विप्रत्ययः तत् पृच्छथ) । किमुक्तैरेभिरधुना (किम् उक्तैः एभिः अधुना) । उपनयनतैनमश्वम् (उपनयत एनम् अश्वम्) । शिरोरपि (शिशोः अपि) । राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः (राजपुत्रः चन्द्रकेतुः दुर्दान्तः) । सोऽप्यपूर्वारण्यदर्शनाक्षिप्तदयो न (सः अपि अपूर्वारण्यदर्सनाक्षिप्तदयः न) इतस्तदेहि (इतः तत् एहि) ।।

**समासः** आश्रमाभ्यर्णभूमयः (अभ्यर्णा चासौ भूमिः, ताः कर्म, आश्रमस्य अभ्यर्णभूमयः ष. तत्पु.) । मेध्याश्वरक्षाप्रसङ्गात् (मेध्यः चासौ अश्वः कर्म., मेध्याश्वस्य रक्षा ष. तत्पु., मेध्याश्वरक्षायाः प्रसङ्गः, तस्मात् ष. तत्पु.) । अमृतबिन्दुसुन्दराणि (अमृतस्य बिन्दवः ष. तत्पु.., अमृतबिन्दुः एव सुन्दराणि कर्म.) । कथाप्रावीण्यम् (कथासु प्रावीण्यम् स. तत्पु.) । श्रुतपूर्वः (पूर्वं श्रुतः केवलसमासः) चापपाणिः (पाणौ चापं यस्य सः बहु.) । प्रमादच्छेदनार्थम् (प्रमादस्य छेदनार्थम् ष. तत्पु.) । अलीकपौरापवादोद्विग्नेन (पौराणाम् अपवादः ष. तत्पु., अलीकः चासौ पौरापवादः कर्म., अलीकपौरापवादेन उद्विग्नः तृ. तत्पु.) । देवयजनसम्भवाम् (देवस्य यजनम् ष. तत्पु., देवयजने सम्भवा, ताम् स. तत्पु.) । आसन्नप्रसववेदनाम् (प्रसवस्य वेदना ष. तत्पु., आसन्ना प्रसववेदना यस्याः सा, ताम् बहु.) । दैवदुर्विलासपरिणामः (दैवस्य दुर्विलासः ष. तत्पु., दैवदुर्विलासस्य परिणामः ष. तत्पु.) । वैशसघोरवज्रपतनम् (वैशसं चादः घोरम् कर्म., वज्रस्य पतनम् ष.तत्पु., वैशसघोरं चादः वज्रपतनम् कर्म.) । भूयिष्ठद्विजबालवृद्धविकलस्त्रैणः (द्विजः च बालाः च वृद्धाः च विकलाः च स्त्रैणानि च इ. द्व., भूयिष्ठानि द्विज... स्त्रैणानि यस्मिन् सः बहु.) । भूतविशेषः (भूतेषु विशेषः स. तत्पु.) । दीर्घग्रीवः (दीर्घा ग्रीवा यस्य सः बहु.) । सकौतुकोपरोधविनयम् (कौतुकोपरेधेन विनयेन सहितः, तत् बहु.) अरण्यगर्भरूपालापैः (अरण्यं गर्भः येषाम् बहु., रूपाणि च आलापाः च इ. द्व., अरण्यगर्भानां रूपालापाः तैः ष. तत्पु.) सर्वक्षत्रपरिभावी (सर्वः चासौ क्षत्रः कर्म., सर्वक्षत्रान् परिभवितुं शीलं यस्य सः उप. तत्पु.) । उत्कर्षनिकषः (उत्कर्षस्य निकषः ष. तत्पु.) । सप्तलोकैकवीरस्य (सप्त चामी लोकाः कर्म., एकः चासौ वीरः कर्म., सप्तलोकेषु एकवीरः स. तत्पु.) दशकण्ठकुलद्विषः (दश कण्ठानि यस्य सः बहु., दशकण्ठस्य कुलम् ष.तत्पु., दशकण्ठकुलं द्वेष्टि तस्य उप. तत्पु.) । मध्येचरो (मध्ये चरति उप. तत्पु.) । (सक्रोधः क्रोधेन सहितः बहु.) । अपूर्वारण्यदर्शनाक्षिप्तहृदयः (अपूर्वं चादः अरण्यम् कर्म., अपूर्वारण्यस्य दर्शनम् ष.तत्पु., अपूर्वारण्यदर्शनेन आक्षिप्तं हृदयं यस्य सः बहु.) । तरुगहनेन (तरूणाम् गहनम् तेन ष. तत्पु.) । विस्फारितशरासनाः (विस्फारितानि शरासनानि यैः ते बहु.) । आयुधीयश्रेणयः (आयुधीयानां श्रेणयः ष. तत्पु.) । ज्याजिह्वया (ज्या इव जिह्वा-......) । वलयितोत्कटकोटिदंष्टम् (वलयिते उत्कटे कोटी दंष्ट्रे यस्य तत् बहु.) । उद्धूरिघोरघनघर्घरघोषम् (उद्धूरीणां घोराणां घनानां घर्घरघोषः यस्मात् तत् बहु.) ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-जृम्भाविडम्बि (ग्रासे प्रसक्तः स. तत्पु., हसत् चासौ अन्तकः कर्म., ग्रासप्रसक्तः चासौ हसदन्तकः कर्म., वक्त्र एव यन्त्रम् कर्म., वक्त्रयन्त्रस्य जम्भा ष. तत्पु., - ग्रासप्रसक्तहसदन्तकस्य वक्त्रयन्त्रजृम्भां विडम्बयितुम् शीलं यस्य तत् उप. तत्पु.) विकटोदरम् (विकटम् उदरं यस्य तत् बहु.) ।।

**शब्दार्थाः** अभ्यर्णभूमयः (समीपवर्तिन्यः भूमयः) । दौहित्रः (दुहितायाः पुत्रः) । दारेषु (पत्नीषु) । तौर्यत्रिकसूत्रधारस्य (नृत्यगीतवाद्यस्य सूत्रधारस्य प्रयोजकाचार्यस्य) । आकूततरम् (कुतूहलजनकम्) । अनुयात्रिकः (अनुगामी) । देवयजनम्भवाम्

(यज्ञभूमिसमुत्पन्नाम्) । मुग्धमुखि (मुग्धं मनोहरं मुखं वदनं यस्याः सा सम्बोधनम्) । क्षिप्रकारिता (शीघ्रकारिता) । वैशसघोरवज्रपतनम्, (वैशसं हिंसनं तदेव घोरं भीषणं वज्रपतनम् अशनिनिपातम् तत्) । पुत्रभाण्डम् (पुत्ररूपं मूलधनम्) पशुसमाम्नाये (पशु नामके संग्रहशास्त्रे) । सांग्रामिके (रणकौशलबोधके शास्त्रे) । धूनोति (कम्पयति) । अजस्रम् (अविरतं वा) । शष्पाणि (नूतनतृणानि) । प्रकिरति (विसृजति) । शकृत्पिण्डकान् (पुरीषखण्डान्) । कवचिनः (कवचधारिणः)। परिवृतः (परिवेष्टितः) । पर्यटति (परिभ्रमति) । उर्जस्वलः (बलवान्) । सर्वक्षत्रपरिभावी (सर्वान् क्षत्रियान् परिभावितुं न्यक्कर्तुम् शीलं यस्य सः) विभीषिका (भयप्रदर्शनम्) । रोहितानाम् (मृगविशेषाणाम्) । दृप्ताम् वाचम् (गर्वितां वाणीम्)। तरुगहनेन (वृक्षवनेन, निबिडवनभागेन) । तर्जयन्ति (भर्त्सयन्ति) । हरिणप्लुतैः (मृगवत् तीव्रगमनैः) पलायामहे (अपसरामः) ज्याजिह्वया (ज्या शिंजिनी, तद्रूपया जिह्वया रसनया)।

## स्वाध्यायः

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) उत्तररामचरितस्य रचयिता कः ?
(क) कालिदासः (ख) रामः (ग) भवभूतिः (घ) विशाखदत्तः

(2) लक्ष्मणस्य पुत्रस्य किं नाम ?
(क) श्वेतकेतुः (ख) कन्दर्पकेतुः (ग) चन्द्रकेतुः (घ) सत्यकेतुः

(3) रामायणकथापुरुषौ कौ स्तः ?
(क) रावणकुम्भकर्णौ (ख) रामरावणौ (ग) लवकुशौ (घ) रामलक्ष्मणौ

(4) वाल्मीकिः कस्याश्रमं प्रति पुस्तकं प्रेषयति ?
(क) व्यासस्य (ख) विश्वामित्रस्य (ग) भरतस्य (घ) ऋष्यश्रृङ्गस्य

(5) भगवान् प्राचेतसः कः ?
(क) वाल्मीकिः (ख) व्यासः (ग) रामः (घ) जनकः

(6) आश्रमबटवः कं पशुविशेषं पश्यन्ति ?
(क) हरिणम् (ख) अश्वम् (ग) सिंहम् (घ) व्याघ्रम्

(7) जनकः केन सह संवादं करोति ?
(क) कुशेन (ख) अश्वेन (ग) चन्द्रकेतुना (घ) लवेन

(8) आश्वमेधिकम् अश्वं के रक्षन्ति ?
(क) दण्डिनः (ख) शिखिनः (ग) बटवः (घ) तपस्विनः

(९) अश्वमेधः नाम क्षत्रियाणां वर्तते
(क) उत्कर्षनिकषः (ख) युद्धनिकषः (ग) यज्ञनिकषः (घ) बलनिकषः

(10) कः रोहितानां मध्येचरः भवतु ?
(क) बटुः (ख) चन्द्रकेतुः (ग) अश्वः (घ) हरिणः

**2. एकवाक्येन उत्तरं लिखत ।**

(1) मैथिलः राजर्षिः कः अस्ति ?
(2) भरतः काभिः वाल्मीकिरचितं कथाभागं प्रयोजयिष्यति ?
(3) लवकुशयोः मध्ये कः ज्येष्ठः ?
(4) लवः कस्य यज्ञस्य अश्वं पश्यति ?
(5) प्रस्तुतः नाट्यांशः कुतः उद्धृतः वर्तते ?
(6) अश्वोऽश्वः इति नाम बटुभिः कुत्र पठ्यते ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) जनकः लवं प्रति कथाविषये किं पृच्छति ?

(2) वाल्मीकिना कथायाः एकभागः किमर्थं न प्रकाशितः ?

(3) अन्तेवासिनां पृष्ठतः वाल्मीकिना कः प्रेषितः ? किमर्थम् ?

(4) आश्वमेधिकस्य अश्वस्य रक्षां के के कुर्वन्ति ?

(5) बटुभिः वर्णितः अश्वः कीदृशः अस्ति ?

(6) लवः कानि अक्षराणि संदीपनानि मनुते ?

**4. समासिकपदानाम् परिचयं कारयत ।**

(1) मेध्याश्वरक्षाप्रसङ्गात्

(2) देवदुर्विलासपरिणामः

(3) वैशसघोरवज्रपतनम्

(4) अरण्यगर्भरूपालापैः

(5) उत्कर्षनिकषः

(6) दशकण्ठकुलद्विषः

**5. सन्धिविच्छेदं कुरुत ।**

(1) वत्सश्चन्द्रकेतुर्द्रष्टव्य इत्यसौ

(2) नायं कथाविभागोऽस्माभिरन्येन

(3) यमावायुष्मन्तौ

(4) झटित्यवसरश्चापेन

(5) एभिर्नीतोऽस्मि

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) चन्द्रकेतुः

(2) लवः

(3) जनकस्य शोकः

(4) आश्वमेधिकः अश्वः

(5) भवभूतिः

**7. पदानां परिचयं कारयत अर्थं च लिखत ।**

(1) अभ्यर्णभूमयः

(2) दारेषु

(3) धूनोति

(4) प्रकिरति

(5) निषङ्गिणः

(6) दृप्ता वाक्

**8. एतानि वाक्यानि कः कम् प्रति वदति इति नामतः लेखनीयम् ।**

(1) एतावेव रामायणकथापुरुषौ ।

(2) भ्राताऽपि ते अस्ति ?

(3) अहो रामभद्रस्य क्षिप्रकारिता ।

(4) नूनमाश्वमेधिकोऽयमश्वः ।

(5) अहो संदीपनान्यक्षराणि ।

(6) हरिणप्लुतैः पलायामहे ।

# 8. वृक्षाः सत्पुरुषा इव

महर्षिणा व्यासेन विरचितम् महाभारतम् नाम सुप्रसिद्धम् आर्षकाव्यम् । ''महत्त्वात् भारवत्वात् च महाभारतमुच्यते''- इति अभियुक्तानाम् उक्त्यनुसारम् इदम् आर्षकाव्यम् महत्त्वात् भारवत्वात् च महाभारतनाम्ना प्रसिद्धिं गतमस्तीति परम्परायाम् प्रसिद्धम् । किमिदं महत्त्वम् भारवत्वम् च इति प्रश्ने विषयाणां वैविध्यमत्र कारणत्वेन प्रदर्श्य उत्तरयितुं शक्यते । अस्मिन् विषयवैविध्ये धर्मनीतिः, अर्थनीतिः, कामनीतिः, मोक्षनीतिः, परिवारनीतिः, समाजनीतिः, राजनीतिः - इत्यादीनां बहूनां विषयाणां समावेशः भवतीति विदितचरमेव ।

एतैः विविधैः विषयैः सह प्रासङ्गिकरूपेण बहवः भौतिकस्य ज्ञानस्य विज्ञानस्य च विषयाः अपि समाविष्टाः सन्ति। तेषु वनस्पतिशास्त्रमपि एकं शास्त्रम् अस्ति । महाभारते अनुशासनपर्वणि 177 तमे अध्याये भृगुमुनेः भरद्वाजमुनेः च संवादः आगच्छति । अयं संवादः वृक्षेषु चैतन्यमस्ति न वेति विषयकः संवादस्य अन्ते साररूपेण वृक्षेषु चैतन्यमस्ति इति स्वीकार्यः सिद्धान्तः भरद्वाजमुनिना प्रस्थापितः ।

उपर्युक्तात् अध्यायात् अत्र केचन श्लोकाः संगृहीताः सन्ति । एतान् श्लोकान् पठन्तः छात्राः वृक्षेषु चैतन्यमस्ति इति सिद्धान्तात् परिचिताः भविष्यन्ति । अथ च वृक्षाणां चैतन्यतायाः प्रस्थापने भरद्वाजमुनिः केन प्रकारेण कान् हेतून् प्रस्तौति इत्यादिकम् अनुशील्य तादृशीं स्वसिद्धान्तप्रस्थापनकलाम् अपि हस्तगतां कर्तुं शक्ष्यन्ति छात्राः इति दृढः विश्वासः । गच्छता कालेन कदाचित् कस्यचित् विषयस्य संदर्भे यः स्वीयः सिद्धान्तः प्रवर्तते, तस्य प्रस्थापनावसरे ते तादृशप्रकारम् उपक्रमम् आचरन्तः साफल्यं प्राप्तुं शक्ष्यन्ति इति दिक् ।

---

भरद्वाज उवाच-

**एते ते धातवः पञ्च ब्रह्मा यानसृजत्पुरा । आवृता यैरिमे लोका महाभूताभिसंज्ञितैः ।। 1 ।।**

**पदच्छेदः** एते (1.3) ते (1.3) धातवः (1.3) पञ्च (1.3) ब्रह्मा (1.1) यान् (2.3) असृजत् (लङ्, अ.पु.ए.व.) पुरा (अ.) आवृताः (1.3) यैः (3.3) इमे (1.3.) लोकाः (1.3) महाभूताभिसंज्ञितैः (3.3) ।।

**अन्वयः** ब्रह्मा यान् पुरा असृजत् ते एते पञ्च धातवः (सन्ति) । यैः महाभूताभिसंज्ञितैः इमे लोकाः आवृताः (सन्ति) ।।

**पदार्थः** ब्रह्मा (पितामहः) यान् (धातून्) पुरा (प्राचीनकाले), असृजत् (निर्मितवान्) । ते एते पञ्च धातवः (पञ्चमहाभूताः) (सन्ति) । यैः (पञ्च) महाभूताभिसंज्ञितैः (महाभूतनामकैः) इमे लोकाः (सर्वे लोकाः) आवृताः (व्याप्ताः) (सन्ति) ।।

**भावार्थः** पितामहः ब्रह्मा प्राचीनकाले पञ्च धातून् असृजत् । ते धातवः महाभूतनाम्ना प्रसिद्धाः सन्ति । तैः इमे सर्वे लोकाः व्याप्ताः सन्ति ।।

**पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः । स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः ।। 2 ।।**

**पदच्छेदः** पञ्चभिः (3.3) यदि (अ.) भूतैः (3.3) तु (अ.) युक्ताः (1.3) स्थावरजङ्गमाः (1.3) स्थावराणाम् (6.3) न (अ.) दृश्यन्ते (लट्, अ.पु.ब.व.) शरीरे (7.1) पञ्च (1.3) ।।

**अन्वयः** यदि तु स्थावरजङ्गमाः पञ्चभिः भूतैः युक्ताः (सन्ति इति, तर्हि) स्थावराणां शरीरे पञ्च धातवः न दृश्यन्ते ।।

**पदार्थः** यदि तु स्थावरजङ्गमाः (वृक्षादयः स्थावराः पश्वादयः जङ्गमाः च), पञ्चभिः (अग्न्यादिभिः), भूतैः युक्ताः (संयुक्ताः), (सन्ति, तर्हि) स्थावराणां (वृक्षाणां) शरीरे (काये), पञ्च धातवः (अग्न्यादयः) न दृश्यन्ते (दृष्टिपथं न आयान्ति) ।।

**भावार्थः** यदि पञ्चभिः – अग्न्यादिभिः भूतैः स्थावरजङ्गमाः युक्ताः भवेयुः तर्हि तेषां स्थावराणां वृक्षाणां शरीरे पञ्च धातवः (दृश्येरन्, परन्तु ते किमर्थं) न दृश्यन्ते ।।

**अनूष्मणामचेष्टानां घनानां चैव तत्त्वतः । वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः ।। 3 ।।**

**पदच्छेदः** अनूष्मणाम् (6.3) अचेष्टानाम् (6.3) घनानाम् (6.3) चैव – च एव (अ.) तत्त्वतः (अ.) वृक्षाणाम् (6.3) न (अ.) उपलभ्यन्ते (लट्, अ. पु. ब. व.) शरीरे (7.1) पञ्च (1.3) धातवः (1.3) ।।

**अन्वयः** अनूष्मणाम् अचेष्टानां तत्त्वतः घनानां चैव वृक्षाणां शरीरे पञ्च धातवः न उपलभ्यन्ते ।।

**पदार्थः** अनूष्मणाम् (उष्मात् रहितानाम्) अचेष्टानां (क्रियातः रहितानां) तत्त्वतः (अग्न्यादितत्त्वतः) घनानां (संगठितानां) चैव वृक्षाणां (पादपानां) शरीरे (काये) पञ्च धातवः (अग्न्यादयः) न उपलभ्यन्ते (न प्राप्यन्ते) ।।

**भावार्थः** अनूष्मणः अचेष्टाः तत्त्वतः घनाः ये वृक्षाः सन्ति, तेषां शरीरे अग्न्यादयः पञ्च धातवः न उपलभ्यन्ते ।।

**न शृण्वन्ति न पश्यन्ति न गन्धरसवेदिनः । न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः ।।4 ।।**

**पदच्छेदः** न (अ.) शृण्वन्ति (लट्, अ.पु.ब.व.) न (अ.) पश्यन्ति (लट्, अ.पु.ब.व.) न (अ.) गन्धरसवेदिनः (1.3) न (अ.) च (अ.) स्पर्शम् (2.1) विजानन्ति (लट्, अ.पु.ब.व.) ते (1.3) कथम् (अ.) पाञ्चभौतिकाः (1.3) ।।

**अन्वयः** न शृण्वन्ति, न पश्यन्ति, न (च) गन्धरसवेदिनः (सन्ति, अथ) च न स्पर्शम् विजानन्ति, (तस्मात्) ते कथम् पाञ्चभौतिकाः (भवितुम् अर्हन्ति) ।।

**पदार्थः** न शृण्वन्ति (श्रवणं न कुर्वन्ति), न पश्यन्ति (दर्शनं न कुर्वन्ति), न च गन्धरसवेदिनः (गन्धं रसं च न अवगच्छन्ति), अथ च न स्पर्शम् विजानन्ति (अवगच्छन्ति), तस्मात् ते (वृक्षाः), कथम् (केन कारणेन) पाञ्चभौतिकाः भवितुम् अर्हन्ति ।।

**भावार्थः** न शृण्वन्ति, न पश्यन्ति, गन्धं रसं स्पर्शं च नावगच्छन्ति, तस्मात् वृक्षाः केन कारणेन पाञ्चभौतिकाः भवितुम् अर्हन्ति ।।

**अद्रवत्वादनग्नित्वादभौमत्वादवायुतः । आकाशस्याप्रमेयत्वाद्वृक्षाणां नास्ति भौतिकम् ।। 5 ।।**

**पदच्छेदः** अद्रवत्वात् (5.1) अनग्नित्वात् (5.1) अभौमत्वात् (5.1) अवायुतः (अ.) आकाशस्य (6.1) अप्रमेयत्वात् (5.1) वृक्षाणाम् (6.3) न (अ.) अस्ति (लट्,अ.पु.ए.व.) भौतिकम् (1.1) ।।

**अन्वयः** अद्रवत्वात्, अनग्नित्वात् अभौमत्वात्, अवायुतः, आकाशस्य च अप्रमेयत्वात् वृक्षाणाम् भौतिकम् न अस्ति ।।

**पदार्थः** अद्रवत्वात् (द्रवत्वस्य अभावात्), अनग्नित्वात् (अग्नित्वस्य अभावात्), अभौमत्वात् (भौमत्वस्य अभावात्), अवायुतः (वायुत्वस्य अभावात्), आकाशस्य च अप्रमेयत्वात् (आकाशतत्त्वस्य प्रमेयत्वाभावात्) वृक्षाणाम् (स्थविराणाम्) भौतिकम् (भूतसंपन्नता) न अस्ति ।।

**भावार्थः** वृक्षाणां भौतिकम् अर्थात् भूतसंपन्नता न अस्ति, यतोहि तत्र द्रवत्वस्य, अग्नित्वस्य, भौमत्वस्य, वायुत्वस्य, आकाश-प्रमेयस्य च अभावः वर्तते ।

भृगुरुवाच

**घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः । तेषां पुष्पफले व्यक्तिर्नित्यं समुपलभ्यते ।। 6 ।।**

**पदच्छेदः** घनानाम् (6.3) अपि (अ.) वृक्षाणाम् (6.3) आकाशः (1.1) अस्ति (लट्, अ.पु.ए.व.) न (अ.) संशयः (1.1.) तेषाम् (6.3) पुष्पफले (2.2) व्यक्तिः (1.1) नित्यम् (2.1) समुपलभ्यते ।।

**अन्वयः** घनानाम् अपि वृक्षाणाम् आकाशः अस्ति, (अत्र) संशयः न (कार्यः) । (यतोहि) तेषाम् (वृक्षाणाम्) पुष्पफले व्यक्तिः नित्यम् समुपलभ्यते ।।

**पदार्थः** घनानाम् (घनत्वयुक्तानाम्) अपि वृक्षाणाम् (स्थावराणाम्) आकाशः (आकाशतत्त्वम्) अस्ति, अत्र संशयः न कार्यः । यतोहि तेषां (वृक्षाणां) पुष्पाणां फलानां च व्यक्तिः (अभिव्यक्तिः) नित्यं (सदा), समुपलभ्यते (प्राप्यते) ।।

**भावार्थः** यतोहि वृक्षेषु पुष्पाणां फलानां च अभिव्यक्तिः सदा समुपलभ्यते, अतः घनेषु अपि वृक्षेषु आकाशतत्त्वम् अस्ति, अत्र केनापि संशयः न कार्यः ।।

**ऊष्मतो ग्लानपर्णानां त्वक्फलं पुष्पमेव च । म्लायते चैव शीतेन स्पर्शस्तेनात्र विद्यते ।। 7 ।।**

**पदच्छेदः** ऊष्मतः (अ.) ग्लानपर्णानाम् (6.3) त्वक् (1.1) फलम् (1.1) पुष्पम् (1.1) एव (अ.) च (अ.) म्लायते (लट्, अ.पु.ए.व.) चैव (अ.) शीतेन (3.1) स्पर्शः (1.1) तेन (3.1) अत्र (अ.) विद्यते (लट्, अ.पु.ए.व.) ।।

**अन्वयः** ऊष्मतः शीतेन च ग्लानपर्णानाम् त्वक् फलम् पुष्पम् चैव म्लायते, तेन स्पर्शः अत्र विद्यते (इति स्थितम्) ।।

**पदार्थः** ऊष्मतः (उष्मणः कारणात्) शीतेन (शीतस्य च कारणात्) ग्लानपर्णानाम् (म्लानपर्णानाम्) त्वक्(त्वचा), फलम् पुष्पम् चैव म्लायते (म्लानतां गच्छन्ति), तेन (तस्मात् कारणात्) अत्र (वृक्षेषु) स्पर्शः विद्यते ।।

**भावार्थः** ऊष्मतः शीततः चैव ग्लानपर्णानाम् वृक्षाणां त्वक्, फलं, पुष्पं च म्लानतां गच्छन्ति, तस्मात् कारणात् वृक्षेषु स्पर्शः विद्यते ।

**वाय्वग्न्यशनिनिष्पेषैः फलपुष्पं विशीर्यते । श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः ।। 8 ।।**

**पदच्छेदः** वाय्वग्न्यशनिनिष्पेषैः (3.3) फलपुष्पम् (2.1) विशीर्यते (लट्, अ. पु. ए. व.) श्रोत्रेण (3.1) गृह्यते (लट्, अ. पु. ए. व.) शब्दः (1.1) तस्मात् (5.1) श्रृण्वन्ति (लट्, अ.पु.ए.व.) पादपाः (1.3) ।।

**अन्वयः** वाय्वग्न्यशनिनिष्पेषैः फलपुष्पं विशीर्यते । श्रोत्रेण शब्दः गृहयते, तस्मात् पादपाः श्रृण्वन्ति ।।

**पदार्थः** वाय्वग्न्यशनिनिष्पेषैः (वायुः अग्निः अशनिः इत्येतेषां निष्पेषैः प्रेक्षणैः) फलपुष्पम् (फलम् पुष्पम् च) विशीर्यते (शीर्णे भवतः) । श्रोत्रेण (श्रवणेन्द्रियेण) शब्दः (ध्वनिः) गृह्यते (गृहीतः भवति) । तस्मात् (तेन कारणेन) पादपाः (वृक्षाः) श्रृण्वन्ति (श्रवणं कर्म कुर्वन्ति) (इति निश्चीयते) ।।

**भावार्थः** वायुः अग्निः अशनिः इत्येतेषां प्रभावेण वृक्षगतं फलपुष्पं विशीर्यते । अथ च वृक्षः श्रोत्रेण ध्वनिं गृह्णाति, तस्मात् पादपाः श्रृण्वन्ति (इति निश्चीयते) ।।

**वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति । न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात्पश्यन्ति पादपाः ।।9 ।।**

**पदच्छेदः** वल्ली (1.1) वेष्टयते (लट्, अ.पु.ए.व.) वृक्षम् (2.1) सर्वतः (अ.) चैव (अ.) गच्छति (लट्, अ.पु.ए.व.) न हि (अ.) अदृष्टेः (6.1) च (अ.) मार्गः (1.1) अस्ति (लट्, अ.पु.ए.व.) तस्मात् (5.1) पश्यन्ति (लट्, अ.पु.ए.व.) पादपाः (1.3) ।।

**अन्वयः** वल्ली (लता) वृक्षं (पादपं) वेष्टयते (आलिङ्गयति), सर्वतः चतुर्दिक् चैव गच्छति (याति) । अदृष्टेः (दृष्टिविहीनस्य) च मार्गः न हि अस्ति, तस्मात् पादपाः (वृक्षाः), पश्यन्ति ।।

**भावार्थः** वल्ली वृक्षं वेष्टयते इत्यतः, (भूमौ च) सर्वतः चतुर्दिक् गच्छति इत्यतः (पादपाः पश्यन्ति) । (अथ च) दृष्टिविहीनस्य मार्गः न अस्ति, तस्मात् (अपि निश्चीयते) यत् पादपाः पश्यन्ति ।।

**पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि । अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ।। 10 ।।**

**पदच्छेदः** पुण्यापुण्यैः (3.3) तथा (अ.) गन्धैः (3.3) च (अ.) विविधैः (3.3) अपि (अ.) अरोगाः (1.3) पुष्पिताः (1.3) सन्ति (लट्, अ.पु.ब.व.) तस्मात् (5.1) जिघ्रन्ति (लट्, अ.पु.ब.व.) पादपाः (1.3) ।।

**अन्वयः** – पुष्पिताः पादपाः पुण्यापुण्यैः तथा च विविधैः गन्धैः धूपैः च अरोगाः (भवन्ति) सन्ति, तस्मात् पादपाः जिघ्रन्ति (इति निश्चितम्) ।।

**पदार्थः** पुष्पिताः (पुष्पवन्तः), पादपाः (वृक्षाः) पुण्यापुण्यैः (पुण्येन अपुण्येन), अपि च विविधैः गन्धैः धूपैः च अरोगाः (रोगरहिताः) भवन्ति । तस्मात् पादपाः जिघ्रन्ति (गन्धं गृह्णन्ति) (इति निश्चितम्) ।।

**भावार्थः** पुष्पिताः पादपाः पुण्यापुण्यैः विविधैः गन्धैः धूपैः च वृक्षाः अरोगाः भवन्ति । तस्मात् पादपाः जिघ्रन्ति गन्धं गृह्णन्ति (इति निश्चितम्) ।।

**पादैः सलिलपानं च व्याधीनामपि दर्शनम् । व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे ।। 11 ।।**

**पदच्छेदः** पादैः (3.3) सलिलपानम् (2.1) च (अ.) व्याधीनाम् (6.3) अपि (अ.) दर्शनम् (1.1) व्याधिप्रतिक्रियत्वात् (5.1) च (अ.) विद्यते (लट्, अ.पु.ए.व.) रसनम् (1.1) द्रुमे (7.1) ।।

**अन्वयः** पादैः सलिलपानम्, व्याधीनाम् च अपि दर्शनम्, व्याधिप्रतिक्रियत्वात् च द्रुमे रसनम् विद्यते (इति निश्चीयते) ।।

**पदार्थः** पादैः (चरणैः) सलिलपानम् (जलस्य पानम्) (कुर्वन्ति), व्याधीनाम् (रोगानाम्) च अपि दर्शनम् (भवति), व्याधिप्रतिक्रियत्वात् (व्याधिं प्रति प्रतिक्रियायाः कारणात्) च द्रुमे रसनम् विद्यते (इति निश्चीयते) ।।

**भावार्थः** पादैः सलिलपानम् कुर्वन्ति, व्याधीनाम् अपि तत्र दर्शनम् भवति, अथ च व्याधिप्रतिक्रियत्वात् च द्रुमे रसनं विद्यते (इति निश्चीयते) ।।

**वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत् । तथा पवनसंयुक्तः पादैः पिबति पादपः ।। 12 ।।**

**पदच्छेदः** वक्त्रेण (3.1) उत्पलनालेन (3.1) यथा (अ.) ऊर्ध्वम् (2.1) जलम् (2.1) आददेत् (विधिलङ् अ.पु.ए.व.) तथा (अ.) पवनसंयुक्तः (1.1) पादैः (3.3) पिबति (लङ् अ.पु.ए.व.) पादपः (1.1) ।।

**अन्वयः** यथा उत्पलनालेन वक्त्रेण जलम् ऊध्वर्म् आददेत्, तथा पवनसंयुक्तः पादपः पादैः (जलं) पिबति ।।

**पदार्थः** यथा (येन प्रकारणे), उत्पलनालेन (कमलस्य नालिकया), वक्त्रेण (मुखेन) जलम् ऊर्ध्वम् आददेत्

गृह्मीयात् तथा पवनसंयुक्तः (वायुना संयुक्तः) पादपः (वृक्षः) पादैः (मूलैः) जलं पिबति ।।

**भावार्थः** यथा उत्पलनालेन मुखेन जलम् ऊर्ध्वम् आददेत्, तथा वायुसंयुक्तः पादपः पादैः - मूलैः जलं पिबति ।।

**ग्रहणात्सुखदुःखस्य छिन्नस्य च विरोहणात् । जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ।। 13 ।।**

**पदच्छेदः** ग्रहणात् (5.1) सुखदुःखस्य (6.1) छिन्नस्य (6.1) च (अ.) विरोहणात् (5.1) जीवम् (2.1) पश्यामि (लट्, उ.पु.ए.व.) वृक्षाणाम् (6.3) अचैतन्यम् (1.1) न (अ) विद्यते (लट्, अ.पु.ए.व.) ।।

**अन्वयः** सुखदुःखस्य ग्रहणात्, छिन्नस्य च विरोहणात् (वृक्षे) जीवं पश्यामि । (एवं) वृक्षाणाम् अचैतन्यम् न विद्यते ।।

**पदार्थः** सुखदुःखस्य (सुखस्य दुःखस्य च) ग्रहणात् (स्वीकारात्), छिन्नस्य (कर्तितस्य) च विरोहणात् (पुनरारोहणात्) (वृक्षे) जीवम् (चैतन्यं) पश्यामि । (एवं) वृक्षाणाम् अचैतन्यम् (चेतनतायाः अभावः) न विद्यते ।।

**भावार्थः** सुखदुःखस्य ग्रहणात्, छिन्नस्य विरोहणात् इति कारणद्वयात् वृक्षे जीवं चैतन्यं पश्यामि । वृक्षाणाम् अचैतन्यम् न विद्यते ।।

**तेन तज्जलमादत्तं जरयत्यग्निमारुतौ । आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते ।। 14 ।।**

**पदच्छेदः** तेन (3.1) तत् (1.1) जलम् (1.1) आदत्तम् (1.1) जरयति (लट्, अ.पु.ए.व.) अग्निमारुतौ (2.2) आहारपरिणामात् (5.1) च (अ.) स्नेहः (1.1) वृद्धिः (1.1) च (अ.) जायते (लट्, अ.पु.ए.व.) ।।

**अन्वयः** तेन तत् जलम् आदत्तम् अग्निमारुतौ जरयति । आहारपरिणामात् च स्नेहः वृद्धिः च जायते ।।

**पदार्थः** तेन (मूलेन), तत् जलम् आदत्तम् (पीतम्), अग्निमारुतौ (शरीरस्थम् अग्निं वायुं च) जरयति (जीर्णं करोति) । आहारपरिणामात् (आहारस्य परिवर्तनात्) च स्नेहः (स्निग्धता), वृद्धिः (विकासः) च जायते (समुत्पद्यते) ।।

**भावार्थः** पादपः मूलेन यत् जलं पीबति, तत् जलं वृक्षस्थम् अग्निं वायुं च जरयति - जीर्णं करोति । आहारस्य परिणामात् च वृक्षे स्नेहः वृद्धिः च जायते ।।

## टिप्पणी

**समासः** - महाभूताभिसञ्ज्ञितैः - महान्ति च तानि भूतानि इति महाभूतानि (क. धा.) महाभूतानि इति अभिसञ्ज्ञिताः (ये धावतः, बहुव्रीहिः) तैः । स्थावरजङ्गमाः - स्थावराः च जङ्गमाः च इति (द्वन्द्वः) । अनुष्मणाम् - न उष्मा, अनूष्मा (नञ्तत्पु.), येषां येषु वा इति अनुष्माणः (बहुव्रीहिः) तेषाम् । अचेष्ठानाम् - न चेष्ठा येषां येषु वा इति अचेष्टाः (बहुव्रीहिः) तेषाम् । गन्धरसवेदिनः - गन्धाः च रसाः च इति गन्धरसाः (द्वन्द्वः) तान् (साधु/तच्छीलाः) विदन्ति इति (उपपदतत्पुरुषः)। अद्रवत्वात् - (द्रवस्य भावः द्रवत्वम्) न द्रवत्वम् इति अद्रवत्वम् (नञ्तत्पु.) तस्मात् । पुष्पफले - पुष्पं च फलं चेति पुष्पफलम् (प्राण्यङ्गे एकवद्भावः, द्वन्द्वः) ते तस्मिन् वा । ग्लानपर्णानाम् - ग्लानानि च तानि पर्णानि (कर्मधारयः) तेषाम्। वाय्वग्न्यशनिनिष्पेषैः - वायुः च अग्निः च अशनिः चेति वाच्वग्न्यशनयः (द्वन्द्वः) तेषां निष्पेषाः (ष. तत्पु.) तैः । फलपुष्पम् - फलं च पुष्पं चेति (प्राण्यङ्गद्वन्द्वः) । विशीर्यते - विशिष्टतया शीर्यते इति । अदृष्टेः - न दृष्टिः यस्य सः अदृष्टिः (बहुव्रीहिः) तस्य । पादपाः - पादैः पिबन्ति इति (उपपदतत्पु.) । पुण्यापुण्यैः - पुण्यानि च अपुण्यानि चेति पुण्यापुण्यानि (द्वन्द्वः) तैः । अरोगाः न रोगः येषां ते (बहुव्रीहिः) । व्याधिप्रतिक्रियत्वात् - व्याधेः प्रतिक्रियत्वम् इति (ष. तत्पु.) तस्मात् । उत्पलनालेन - उत्पलस्य नालम् (ष. तत्पु.) तेन । पवनसंयुक्तः - पवनेन संयुक्त इति (तृ. तत्पु.) । अग्निमारुतौ - अग्निः च मरुत् चेति (द्वन्द्वः) तौ । आहारपरिणामात् - आहारस्य परिणामः (ष. तत्पु.) तस्मात् ।

## स्वाध्यायः

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) प्रस्तुतः पाठः कस्मात् उद्धृतः ?

(क) रामायणात् (ख) महाभारतात् (ग) भागवतात् (घ) रघुवंशात्

(2) ब्रह्मणा कति धातवः सृष्टाः ?

(क) त्रयः (ख) पञ्च (ग) सप्त (घ) दश

(3) पुष्पफलयोः व्यक्तिः कुत्र समुपलभ्यते ?

(क) पादपेषु (ख) जनेषु (ग) क्षेत्रेषु (घ) उद्यानेषु

(4) पादपाः सलिलपानं कुर्वन्ति

(क) शाखाभिः (ख) पत्रैः (ग) पादैः (घ) स्कन्धैः

(5) छिन्नस्य विरोहणात् वृक्षेषु पश्यामि ?

(क) मूलम् (ख) जीवम् (ग) बुद्धिम् (घ) जलम्

(6) अदृष्टेः किम् न अस्ति ?

(क) नेत्रम् (ख) मूलम् (ग) मार्गः (घ) शाखा

**2. एकवाक्येन उत्तरं लिखत ।**

(1) इमे लोकाः केन आवृत्ताः सन्ति ?

(2) वृक्षाणां शरीरं कीदृशम् अस्ति ?

(3) शीतेन पादपस्य किं किं म्लायते ?

(4) वृक्षं का वेष्टयते ?

(5) पादैः पादपः किं पिबति ?

(6) कस्य परिणामात् स्नेहो वृद्धिश्च जायते ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) महाभूताभिसंज्ञितानां धातूनां नामतः परिचयं कारयत ।

(2) वृक्षाणाम् पाञ्चभौतिकत्वे द्वित्राणि कारणानि लेखनीयानि ।

(3) वृक्षे स्पर्शः विद्यते न वेति विचार्य तत्र कारणं प्रदेयम् ।

(4) किं पादपाः श्रृण्वन्ति ? तत्र प्रमाणं किम् ।

(5) वृक्षेषु वृद्धिः कथं जायते ?

**4. समासिकपदानां परिचयं कारयत ।**

(1) स्थावरजङ्गमाः

(2) गन्धरसवेदिनः

(3) पुष्पफले

(4) ग्लानपर्णानाम्

(5) अरोगाः

(6) उत्पलनालेन

**5. सन्धिविच्छेदं कुरुत ।**

(1) आवृता यैरिमे

(2) अद्रवत्वादनग्नित्वादभौमत्वादवायुत:

(3) स्पर्शस्तेनात्र

(4) शब्दस्तस्माच्छ्रुण्वन्ति

(5) न ह्यदृष्टेश्च मार्गोऽस्ति

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) ब्रह्मा

(2) स्थावरजङ्गमा:

(3) पाञ्चभौतिका:

(4) पादपा:

(5) आहारपरिणाम:

**7. पदानां परिचयं कारयत ।**

(1) उपलभ्यन्ते

(2) कथम्

(3) गन्धरससेविन:

(4) त्वक्

(5) अग्निमारुतौ

●

# 9. अयं मे हस्तो भगवान्

महर्षिः व्यासः यत् महाभारतं नामकं सुप्रसिद्धं महाकाव्यम् अरचयत्, तत् प्रत्येकं मानवम् आदर्शं जीवनं जीवितुं प्रेरयति । बालाः स्युः युवकाः स्युः, प्रौढाः स्युः, वृद्धाः वा स्युः सर्वेषां कृते एतत् महाभारतं सात्त्विकीं प्रेरणां ददाति । जनान् प्रेरयितुं बहूनि आख्यानानि समागच्छन्ति । एतेषु आख्यानेषु कमपि एकं विषयमधिकृत्य उपदेशतत्त्वं परिकल्पितं भवति । अस्यामेव परम्परायां कदाचित् इतिहासप्रसिद्धं वस्तु अपि आख्यानरूपेण आयाति । अत्र इतिहासे भवतु नाम पात्राणि घटनाः वा परिकल्पिताः स्युः, परन्तु तत्र दीयमानः उपदेशः प्रेरणा वा सत्यमेव भवति ।

येभ्यः जनेभ्यः प्रेरणा उपदेशः वा दीयते ते प्रायः द्विप्रकारकाः भवन्ति । एके सरलतया विना अवरोधं विना समस्यां जीवन्तः जनाः । अपरे च महता कष्टेन सावरोधं समस्यासहितं च जीवनं जीवन्तः जनाः। उभयोः कृते उपदेशः दातव्यः भवति, प्रेरणा च दातव्या भवति । विशेषतः जीवनात् पराजितः कश्चित् जनः यदा जीवनात् पलायनं परिकल्पयति तदा सः अनिवार्यतया उपदेशस्य प्रेरणायाः च पात्रं भवति । एतादृशान् जनान् यदि कश्चित् उपदेशमाध्यमेन प्रेरणामाध्यमेन वा सहायं करोति, चेत् आत्महननसंकल्पः परिहरति । एतादृशं कर्म वस्तुतः पुण्यकर्म अस्ति ।

प्रदत्तपाठः महाभारते शान्तिपर्वणि मोक्षधर्मपर्वणि 180 तमः अध्यायः वर्तते । अत्रत्यः विषयः जीवनात् पराजितानां स्वीयस्य मृत्योः यैः परिकल्पना कृता अस्ति, तादृशानां जनानां कृते सम्यक् मार्गदर्शनं करोति । अस्मिन् अध्याये काश्यपनाम्नः कस्यचित् ब्राह्मणस्य इन्द्रस्य च पारस्परिकः संवादः अस्ति । अस्मिन् संवादे केनापि मानवेन आत्महननं न विचारणीयमिति उपदेशः प्रदत्तः अस्ति । परमात्मा प्रत्येकं मानवाय हस्तौ ददाति । यस्य मानवस्य हस्तौ स्तः, सः कथं जीवनस्य परित्यागरूपं महापातकं विचारयेत् इत्यादिरूपेणात्र प्रेरणा प्रदता वर्तते । अस्य पाठेन तदनुकूलाचरणेन च छात्राः जीवने कदापि नैराश्यं न भजिष्यन्ते इति दिक् ।।

---

भीष्म उवाच ।।

**अत्राप्युदाहरन्तीममितिहासं पुरातनम् । इन्द्रकाश्यपसंवादं तन्निबोध युधिष्ठिर ।। 1 ।।**

**पदच्छेदः** अत्र (अ.) अपि (अ.) उदाहरन्ति (उत् + आ + ह लट् अ. पु. ब. व.) इमम् (2.1) इतिहासम् (2.1) पुरातनम् (2.1) इन्द्रकाश्यपसंवादम् (2.1) तत् (2.1) निबोध (नि + बुध् लोट् म.पु.ए.व.) युधिष्ठिर (सम्बोधनम्) ।।

**अन्वयः** अत्र (अस्मिन् संदर्भे) अपि इमम् पुरातनम् (प्राचीनम्) इतिहासम् (ऐतिह्यम्) उदाहरन्ति (उदाहरणरूपेण प्रस्तुवन्ति), तत् इन्द्रकाश्यपसंवादम् (इन्द्रस्य कश्यपस्य् च मध्ये संपन्नम् संवादम्) हे युधिष्ठिर त्वं मत्तः निबोध (अवगच्छ) ।।

**भावार्थः** अस्मिन् संदर्भे विद्वांसः एकं पुरातनम् इतिहासम् उदाहरणरूपेण प्रस्तुवन्ति । तत् इन्द्रस्य काश्यपस्य च मध्ये संपन्नं संवादं हे युधिष्ठिर त्वं मत्सकाशात् अवगच्छ ।।

**वैश्यः कश्चिदृषिं तात काश्यपं संशितव्रतम् । रथेन पातयामास श्रीमान्दृप्तस्तपस्विनम् ।। 2 ।।**

**पदच्छेदः** वैश्यः (1.1) कश्चित् (अ.) ऋषिम् (2.1) तात (सम्बोधनम्) काश्यपम् (2.1) संशितव्रतम् (2.1) रथेन (3.1) पातयामास (पत् प्रेरक लिट् म. पु. ए. व.) श्रीमान् (1.1) दृप्तः (1.1) तपस्विनम् (2.1) ।।

**अन्वयः** तात कश्चित् श्रीमान् दृप्तः वैश्यः संशितव्रतम् तपस्विनम् ऋषिम् काश्यपम् रथेन पातयामास ।।

**पदार्थः** तात (हे पूज्य) कश्चित् श्रीमान् (श्रीसम्पन्नः तेन च दृप्तः (अभिमानी) वैश्यः संशितव्रतम् (संशितं प्रशंसनीयं व्रतम् यस्य सः तादृशम्) तपस्विनम् (तपसि संलग्नम्) ऋषिम् काश्यपम् रथेन (रथयानात् अधः) पातयामास ।।

**भावार्थः** एकदा कश्चित् धनेन उन्मतः वैश्यः यस्य प्रशंसनीयं व्रतम् अस्ति तादृशं तपसि संलग्नम् ऋषिम् काश्यपं रथेन अधः पातयामास ।।

**आर्त्तः स पतितः क्रुद्धस्त्यक्त्वाऽऽत्मानमथाब्रवीत् । मरिष्याम्यधनस्येह जीवितार्थो न विद्यते ।। 3 ।।**

**पदच्छेदः** आर्त्तः (1.1) सः (1.1) पतितः (1.1) क्रुद्धः (1.1) त्यक्त्वा (अ.) आत्मानम् (2.1) अथ (अ.) अब्रवीत् (ब्रू लङ् अ.पु.ए.व.) । मरिष्यामि (मृ लृट् उ.पु.ए.व.) अधनस्य (6.1) इह (अ.) जीवितार्थः (1.1) न (अ.) विद्यते (विद् लट् अ.पु.ए.व.) ।।

**अन्वयः** अथ आर्त्तः सः पतितः (तस्मात् च) क्रुद्धः ऋषिः अब्रवीत् यत् आत्मानम् त्यक्त्वा मरिष्यामि, इह अधनस्य जीवितार्थः न विद्यते ।।

**पदार्थः** अथ आर्तः (दुःखितः) सः (अधः) पतितः (तस्मात् कारणात् च) क्रुद्धः ऋषिः काश्यपः अब्रवीत् (अकथयत्) यत् आत्मानम् (स्वात्मानं) त्यक्त्वा (परित्यज्य) मरिष्यामि (मरणं प्राप्स्यामि), इह (अत्र संसारे) अधनस्य (नास्ति धनं यस्य सः तादृशस्य) जीवितार्थः न (जीवितेन किमपि प्रयोजनं न) विद्यते (अस्ति) ।।

**भावार्थः** रथेन पतितः तस्मात् च क्रुद्धः ऋषिः काश्यपः आत्मानं त्यक्त्वा अहं मरिष्यामि इति अकथयत् । तत्र कारणं प्रदर्शयन् स आह – इह अधनस्य अर्थात् यस्य धनं नास्ति, तादृशस्य जनस्य जीवितेन किमपि प्रयोजनं न अस्ति ।।

**तदा मुमूर्षुमासीनमकूजन्तमचेतसम् । इन्द्रः शृगालरूपेण बभाषे क्रुद्धमानसम् ।। 4 ।।**

**पदच्छेदः** तदा (अ.) मुमूर्षुम् (2.1) आसीनम् (2.1) अकूजन्तम् (2.1) अचेतसम् (2.1) इन्द्रः (1.1) शृगालरूपेण (3.1) बभाषे (भाष लिट् अ.पु.ए.व.) क्रुद्धमानसम् (2.1) ।।

**अन्वयः** तदा क्रुद्धमानसम् आसीनम् अकूजन्तम् अचेतसं मुमूर्षुम् (काश्यपं) शृगालरूपेण इन्द्रः बभाषे ।।

**पदार्थः** (यदा काश्यपेन मरणस्य इच्छा कृता) तदा (तस्मिन् समये) क्रुद्धमानसम् (क्रुद्धं मानसं यस्य सः, तम्) आसीनम् (उपविष्टम्) अकूजन्तम् (न किमपि वक्तारं) अचेतसम् (चेतनारहितं तं) मुमूर्षुम् (मरणाय इच्छा अस्ति यस्य तादृशं) कश्यपं शृगालरूपेण इन्द्रः बभाषे ।।

**भावार्थः** काश्यपेन यदा मरणाय मतिः प्रकटिता तदा क्रुद्धमानसं तं न किमपि वक्तारं चेतनारहितम् इव आसीनं तं मुमूर्षुं काश्यपं मृत्योः निवारणाय इन्द्रः यः खलु शृगालरूपेण आसीत् (अग्रं पद्यं) बभाषे ।।

**मनुष्ययोनिमिच्छन्ति सर्वभूतानि सर्वशः । मनुष्यत्वे च विप्रत्वं सर्व एवाभिनन्दति ।। 5 ।।**

**पदच्छेदः** मनुष्ययोनिम् (2.1) इच्छन्ति (इष् लट् अ.पु.ब.व.) सर्वभूतानि (1.3) सर्वशः (अ.) मनुष्यत्वे (7.1) च (अ.) विप्रत्वम् (2.1) सर्वः (1.1) एव (अ.) अभिनन्दति (अभि नन्द् लट् अ.पु.ब.व.) ।।

**अन्वयः** सर्वभूतानि मनुष्ययोनिम् इच्छन्ति । सर्वशः मनुष्यत्वे च विप्रत्वं सर्वः एव अभिनन्दति ।।

**पदार्थः** सर्वभूतानि (सर्वे प्राणिनः) मनुष्ययोनिम् (मानवस्य योनिं जन्म वा) इच्छन्ति (कामयन्ते) । सर्वशः मनुष्यत्वे च (मानवत्वे अपि) विप्रत्वम् (ब्राह्मणत्वम्) सर्वः (निखिलः अपि जनः) एव अभिनन्दति (सत्करोति) ।।

**भावार्थः** सर्वे प्राणिनः मनुष्ययोनिम् इच्छन्ति । अथ च मनुष्यत्वे अपि विप्रत्वं सर्वः जनः अभिनन्दति ।।

**मनुष्यो ब्राह्मणश्चासि श्रोत्रियश्चासि काश्यप । सुदुर्लभमवाप्यैतददोषान्मर्तुमिच्छसि ।। 6 ।।**

**पदच्छेदः** मनुष्यः (1.1) ब्राह्मणः (1.1) च (अ.) असि (अस् लट् म.पु.ए.व.) श्रोत्रियः (1.1) च (अ.) असि (अस् लट् म.पु.ए.व.) काश्यप (सम्बोधनम्) सुदुर्लभम् (2.1) अवाप्य (अ.) एतत् (2.1) अदोषात् (5.1) मर्तुम् (अ.) इच्छसि (इष् लट् म.पु.ए.व.) ।।

**अन्वयः** त्वम् मनुष्यः ब्राह्मणः श्रोत्रियः च असि । हे काश्यप ! एतत् सुदुर्लभम् (जन्म) अवाप्य अदोषात् (कथं) मर्तुम् इच्छसि (इति प्रश्नः) ।।

**पदार्थः** त्वम् (काश्यपः) मनुष्यः (नरः) ब्राह्मणः (विप्रः) श्रोत्रियः (राजन्यः) च असि । हे काश्यप ! एतत् (एतादृशं) सुदुर्लभम् (जन्म) अवाप्य (प्राप्य) अदोषात् (दोषं विना) (कथं) मर्तुम् (मरणाय) इच्छसि (कामनां करोषि) इति प्रश्नः ।।

**भावार्थः** हे काश्यप! त्वं मनुष्यः (तत्रापि) ब्राह्मणः श्रोत्रियः च असि । एतादृशं सुदुर्लभं जन्म प्राप्य विना दोषं कथं मरणाय सन्नद्धः असि इति इन्द्रस्य प्रश्नः ।।

**अहो सिद्धार्थता तेषां येषां सन्तीह पाणयः । पाणिमद्भ्यः स्पृहास्माकं यथा तव धनस्य वै ।। 7 ।।**

**पदच्छेदः** अहो (अ.) सिद्धार्थता (1.1) तेषाम् (6.3) येषाम् (6.3) सन्ति (अस् लट् अ.पु.ब.व.) इह (अ.) पाणयः (1.3) पाणिमद्भ्यः (5.3) स्पृहा (1.1) अस्माकम् (6.3) यथा (अ.) तव (6.1) धनस्य (6.1) वै (अ.) ।।

**अन्वयः** अहो इह येषां पाणयः सन्ति तेषां सिद्धार्थता (अस्ति) । यथा तव धनस्य स्पृहा अस्ति तथा अस्माकं पाणिमद्भ्यः स्पृहा (अस्ति) ।।

**पदार्थः** अहो (आश्चर्याभिव्यक्तिः) इह (अत्र जगति) येषां पाणयः (येषां प्राणिनां हस्ताः) सन्ति (वर्तन्ते) तेषाम् (तादृशानाम् प्राणिनाम् एव) सिद्धार्थता (जन्मनः सिद्धता) अस्ति । यथा तव (काश्यपस्य) धनस्य (वित्तस्य) स्पृहा अस्ति (वर्तते) तथा अस्माकं पाणिमद्भ्यः (हस्तवद्भ्यः) स्पृहा (कामना) (विद्यते) ।।

**भावार्थः** अहो अत्र जगति येषां प्राणिनां हस्ताः सन्ति, वस्तुतः तेषामेव सिद्धार्थता अस्ति । (न् अन्येषां हस्तैः विहीनानाम्) । यथा तव काश्यपस्य धनस्य विषये स्पृहा वर्तते, तथा अस्माकं (ये हस्तविहीनाः स्मः तेषां) पाणिमद्भ्यः स्पृहा विद्यते ।।

**न पाणिलाभादधिको लाभः कश्चन विद्यते । अपाणित्वाद्वयं ब्रह्मन्कण्टकान्नोद्धरामहे ।। 8 ।।**

**पदच्छेदः** न (अ.) पाणिलाभात् (5.1) अधिकः (1.1) लाभः (1.1) काश्चन (अ.) विद्यते (विद् लट् अ.पु.ए.व.) अपाणित्वात् (5.1) वयम् (1.3) ब्रह्मन् (सम्बोधनम्) कण्टकान् (2.3) न (अ.) उद्धरामहे (उत् हृ लट् उ.पु.ब.व.) ।।

**अन्वयः** पाणिलाभात् अधिकः लाभः कश्चन न विद्यते । हे ब्रह्मन् वयम् अपाणित्वात् कण्टकान् न उद्धरामहे ।।

**पदार्थः** (जन्तूनाम्) पाणिलाभात् (हस्तस्य लाभात्) अधिकः लाभः (अन्या श्रेष्ठा प्राप्तिः) कश्चन न विद्यते (नास्ति) । हे ब्रह्मन् (हे कश्यप) वयम् (शृगालादयः प्राणिनः) अपाणित्वात् (हस्तस्य अभावात्) कण्टकान् (शरीरे प्रविष्टान् सूचीतुल्यान् तीक्ष्णघासान्) न उद्धरामहे (उद्धर्तुं न शक्नुमः) ।।

**भावार्थः** यस्य कस्यापि जन्तोः पाणेः लाभात् अन्यः कश्चित् अधिकः लाभः नास्ति । यतोहि विना पाणिं शृगालादयः प्राणिनः स्वीये शरीरे प्रविष्टान् दुःखदायकान् कण्टकान् अपि उद्धर्तुं न शक्नुवन्ति ।।

**अथ येषां पुनः पाणी देवदत्तौ दशाङ्गुली । उद्धरन्ति कृमीनङ्गाद्दशतः निकषन्ति च ।। 9 ।।**

**पदच्छेदः** अथ (अ.) येषाम् (6.3) पुनः (2.2) पाणी (1.1) देवदत्तौ (1.2) दशाङ्गुली (1.2) उद्धरन्ति कृमीन् (2.3) अङ्गात् (5.1) दशतः (अ.) निकषन्ति (निकष् लट् प्र.पु.ब.व.) च (अ.) ।।

**अन्वयः** अथ येषां पुनः देवदत्तौ दशाङ्गुली पाणी (स्तः, ते) दशतः कृमीन् अङ्गात् उद्धरन्ति, निकषन्ति च ।।

**पदार्थः** अथ येषां (प्राणिनाम्) पुनः देवदत्तौ (देवेन भगवता प्रदतौ) दशाङ्गुली (दश अङ्गुलिमन्तौ) पाणी (द्वौ हस्तौ स्तः, ते) दशतः (दंशदायकान्) कृमीन् (क्षुद्रजन्तून्) अङ्गात् (स्वशरीरात्) उद्धरन्ति, (उद्धृत्य बहिः कुर्वन्ति) निकषन्ति च (आकृष्य च बहिः कुर्वन्ति) ।।

**भावार्थः** येषां प्राणिनां भगवता प्रदत्तौ दशाङ्गुलिमन्तौ द्वौ हस्तौ स्तः, ते दशतः कृमीन् स्वशरीरात् उद्धृत्य आकृष्य च बहिः कुर्वन्ति ।।

**हिमवर्षातपानां च परित्राणानि कुर्वते । चेलमन्नं सुखं शय्यां निवातं चोपभुञ्जते ।। 10 ।।**

**पदच्छेदः** हिमवर्षातपानाम् (6.3) च (अ.) परित्राणानि (2.3) कुर्वते (कृ लट् अ.पु.ब.व.) चेलम् (2.1) अन्नम् (2.1) सुखम् (2.1) शय्याम् (2.1) निवातम् (2.1) च (अ.) उपभुञ्जते (उप भुज् लट् अ.पु.ए.व.) ।।

**अन्वयः** (हस्तौ) हिमवर्षातपानां परित्राणानि कुर्वते (अथ) च चेलम् अन्नं सुखं शय्यां निवातं च उपभुञ्जते ।।

**पदार्थः** (हस्तौ) हिमवर्षातपानाम् (शीतस्य वर्षायाः आतपस्य च) परित्राणानि कुर्वते (परित्राणं कुर्वन्ति) (अथ) च चेलम् (वस्त्रम्) अन्नम् (धान्यम्) सुखं शय्यां (पर्यङ्कम्) निवातम् (एकान्तं) च उपभुञ्जते (सेवते)।।

**भावार्थः** हस्ताभ्यां मानवैः किं किम् उपभुज्यते तस्य अत्र वर्णनं कृतमस्ति । हस्तौ मानवस्य शीतात् वर्षायाः आतपात् च परित्राणं कुरुतः । अथ च वस्त्रम्, अन्नम्, सुखं शय्या, निवातं चेति बहुविधस्य उपयोगाय नरः समर्थो भवति ।।

**अधिष्ठाय च गां लोके भुञ्जते वाहयन्ति च । उपायैर्बहुभिश्चैव वश्यानात्मनि कुर्वते ।। 11 ।।**

**पदच्छेदः** अधिष्ठाय (अ.) च (अ.) गाम् (2.1) लोके (7.1) भुञ्जते (भुज् लट् अ.पु.ब.व.) वाहयन्ति (वह् प्रेरके लट् अ.पु.ब.व.) च (अ.) उपायैः (3.3) बहुभिः (3.3) च (अ.) एव (अ.) वश्यान् (2.3) आत्मनि (7.1) कुर्वते (कृ लट् अ.पु.ब.व.) ।।

**अन्वयः** (हस्तवन्तः जनाः) लोके गाम् अधिष्ठाय भुञ्जते, बहुभिः उपायैः च वाहयन्ति । एवं च वश्यान् आत्मनि कुर्वते ।।

**पदार्थः** (हस्तवन्तः जनाः) लोके (जगति) गाम् (वृषभद्वारा ऊह्यमानं शकटम्) अधिष्ठाय (स्थित्वा) भुञ्जते (यात्रासुखस्य भोगं कुर्वन्ति), बहुभिः उपायैः (अनेकैः उपायैः) च वाहयन्ति (भारं वोढुं प्रेरयन्ति) । एवं

च (अनेन प्रकारेण) (हस्तवान् मानवः) आत्मनि (स्वस्मिन्) वश्यान् (प्राणिनः वशीभूतान्) कुर्वते (कुर्वन्ति) ।।

**भावार्थः** ये खलु हस्तवन्तः जनाः सन्ति, ते लोके शकटे गां योजयित्वा तद् अधिष्ठाय यात्रासुखं भुञ्जते । अथ च अनेकैः उपायैः हस्तविहीनान् पशून् वाहयन्ति । अनेन प्रकारेण हस्तवान् मानवः हस्तविहीनान् प्राणिनः वशीभूतान् करोति ।।

**ये खल्वजिह्वाः कृपणा अल्पप्राणा अपाणयः । सहन्ते तानि दुःखानि दिष्ट्या त्वं न तथा मुने ।। 12 ।।**

**पदच्छेदः** ये (1.3) खलु (अ.) अजिह्वाः (1.3) कृपणाः (1.3) अल्पप्राणाः (1.3) अपाणयः (1.3) सहन्ते (सह् लट् प्र.पु.ब.व.) तानि (1.3) दुःखानि (1.3) दिष्ट्या (अ.) त्वम् (1.1) न (अ.) तथा (अ.) मुने (सम्बोधनम्) ।।

**अन्वयः** ये खलु अजिह्वाः, कृपणाः, अल्पप्राणाः, अपाणयः दुःखानि सहन्ते, तानि हे मुने त्वं दिष्ट्या (न सहसे) ।।

**पदार्थः** ये खलु अजिह्वाः (मूकाः दीनाः) कृपणाः (कृपापात्राणि) अल्पप्राणाः (दुर्बलाः) अपाणयः (पाणिभ्यां विहीनाः) दुःखानि सहन्ते (कष्टानां सहनं कुर्वन्ति), तानि (दुःखानि) हे मुने त्वं दिष्ट्या (भाग्यवशात् न (सहसे) ।।

**भावार्थः** अपाणयः यादृशं कष्टं सहन्ते तस्यात्र वर्णनम् अस्ति । दीनाः हीनाः दुर्बलाः च पाणिभ्यां विहीनाः प्राणिनः यानि दुःखानि सहन्ते, तानि दुःखानि हे मुने भाग्यवशात् त्वं न सहसे ।।

**दिष्ट्या त्वं न शृगालो वै न कृमिर्न च मूषकः । न सर्पो न च मण्डूको न चान्यः पापयोनिजः ।। 13 ।।**

**पदच्छेदः** दिष्ट्या (अ.) त्वम् (1.1) न (अ.) शृगालः (1.1) वै (अ.) न (अ.) कृमिः (1.1) न (अ.) च (अ.) मूषकः (1.1) न (अ.) सर्पः (1.1) न (अ.) च (अ.) मण्डूकः (1.1) न (अ.) अन्यः (1.1) पापयोनिजः (1.1) ।।

**अन्वयः** दिष्ट्या त्वं न शृगालः, न वै कृमिः, न च मूषकः, न च सर्पः, न च मण्डूकः, न च अन्यः (कश्चित्) पापयोनिजः (असि इति शेषः) ।।

**पदार्थः** दिष्ट्या (भाग्यक्रमेण) त्वं न शृगालः (मादृशः पशुः), न वै कृमिः (क्षुद्रजन्तुः) न च मूषकः (उन्दुरः/आखुः), न च सर्पः (सरीसृपः अहिः) न च मण्डूकः (दर्दुरः) न च अन्यः (कश्चित्) पापयोनिजः (पाप-योनौ जातः) असि ।।

**भावार्थः** शृगालरूपः इन्द्रः कश्यपम् उपदिशन् कथयति यत् भवान् हस्ताभ्यां युक्तः मनुष्यावतारधारी अस्ति । भाग्यक्रमेण त्वं शृगालः, कृमिः, मूषकः सर्पः, मण्डूकः चेति अन्यः कश्चित् पापयोनिजः न असि, अतः त्वं स्वात्मानं रक्ष।।

**एतावतापि लाभेन तोष्टुमर्हसि काश्यप । किं पुनर्योऽसि सत्त्वानां सर्वेषां ब्राह्मणोत्तमः ।। 14 ।।**

**पदच्छेदः** एतावता (3.1) अपि (अ.) लाभेन (3.1) तोष्टुम् (अ.) अर्हसि (अर्ह् लट् म.पु.ए.व.) काश्यप (सम्बोधनम्) किम् (अ.) पुनः (अ.) यः (1.1) असि (अस् लट् म.पु.ए.व.) सत्त्वानाम् (6.3) सर्वेषाम् (6.3) ब्राह्मणोत्तमः (1.1) ।।

**अन्वयः** हे काश्यप! एतावता लाभेन अपि (त्वं) तोष्टुम् अर्हसि । किं पुनः, (त्वं तु) यः सत्त्वानां सर्वेषां ब्राह्मणोत्तमः असि।।

**पदार्थः** हे काश्यप ! (अयि काश्यप) एतावता लाभेन (एतादृशेन हस्तयोः लाभेन) अपि (त्वं) तोष्टुम् (संतोषम् अनुभवितुम्) अर्हसि (शक्तः असि) । किम् पुनः, (त्वं तु) यः सत्त्वानाम् (प्राणिनाम्) सर्वेषां (निखिलानां) ब्राह्मणोत्तमः (ब्राह्मणेषु उत्तमः) असि ।।

**भावार्थः** अयि काश्यप! एतादृशेन हस्तयोः प्राप्तिरूपेण लाभेन अपि त्वं संतुष्टः भवितुम् अर्हसि । अथ च त्वं तु सर्वेषु प्राणिषु यः उत्तमः सः मानवः, तत्रापि उत्तमः ब्राह्मणः असि ।।

**इमे मां कृमयोऽदन्ति तेषामुद्धरणाय मे । नास्ति शक्तिरपाणित्वात्पश्यावस्थामिमां मम ।। 15 ।।**

**पदच्छेदः** इमे (1.3) माम् (2.1) कृमयः (1.3) अदन्ति (अद् लट् अ.पु.ब.व.) तेषाम् (6.3) उद्धरणाय (4.1) मे (6.1) न् (अ.) अस्ति (अस् लट् अ.पु.ए.व.) शक्तिः (1.1) अपाणित्वात् (5.1) पश्य (दृश् लोट् म.पु.ए.व.) अवस्थाम् (2.1) इमाम् (2.1) मम (6.1)

**अन्वयः** इमे कृमयः माम् अदन्ति । तेषाम् उद्धरणाय अपाणित्वात् मे शक्तिः न अस्ति । इमां मम अवस्थां पश्य ।।

**पदार्थः** इमे (एते मम शरीराङ्गे उत्पन्नाः) कृमयः (जन्तवः) माम् (शृगालम्) अदन्ति (खादन्ति) । तेषाम् (कृमीणाम्) उद्धरणाय (मम शरीरात् पृथक् करणाय) अपाणित्वात् (हस्तविहीनत्वात्) मे (मम) शक्तिः (सामर्थ्यम्) न अस्ति (न वर्तते) । इमाम् (ईदृशीं) मम (मामकीनाम्) अवस्थाम् (स्थितिं त्वं) पश्य (अवलोकय) ।।

**भावार्थः** हस्तवन्तं कश्यपं शृगालः कथयति यत् त्वं मदीयां दशां पश्य । शरीरे मे कृमयः जाताः सन्ति, ते च मां भक्षयन्ति, हस्तविहीनत्वात् तेषां कृमीणां शरीरात् पृथक्करणाय मदीयं सामर्थ्यं नास्ति । इमां मम (दुःखभरिताम्) अवस्थां त्वं पश्य ।।

**अकार्यमिति चैवेमं नात्मानं सन्त्यजाम्यहम् । नेतः पापीयसीं योनिं पतेयमपरामिति ।। 16 ।।**

**पदच्छेदः** अकार्यम् (2.1) इति (अ.) च (अ.) एव (अ.) इमम् (2.1) न (अ.) आत्मानम् (2.1) सन्त्यजामि (सम् त्यज् लट् उ.पु.ए.व.) अहम् (1.1) न (अ.) इतः (अ.) पापीयसीम् (2.1) योनिम् (2.1) पतेयम् (पत् विधिलिङ् उ.पु.ए.व.) अपराम् (2.1) इति (अ.) ।।

**अन्वयः** अहम् इतः अपरां पापीयसीं योनिं पतेयम् इति (विचार्य) इमम् आत्मानं न सन्त्यजामि, (एतत्) अकार्यम् एव इति च (स्वीकरोमि) ।

**पदार्थः** अहम् (शृगालः) इतः (अस्मात्) अपरां (अन्यां) पापीयसीं (अतिशयपापवर्तिनीं) योनिं (शरीरं) पतेयम् इति (विचार्य) इमम् आत्मानं न सन्त्यजामि (त्यक्तुं न इच्छामि), (एतत् आत्मत्यागं आत्महत्यां वा) अकार्यम् (न कर्तुं योग्यम्) एव इति च स्वीकरोमि) ।।

**भावार्थः** अहं शृगालः सन्नपि अस्मात् अपि अपरां पापीयसीं नीचयोनिं प्राप्स्यामि इति विचार्य इमम् आत्मानं (अद्यतनीयं शरीरं) न सन्त्यजामि । यतोहि एषः आत्मत्यागः तु अकार्यम् एव इति च स्वीकरोमि ।।

**अस्त्येव त्वयि शोको वै हर्षश्चास्ति तथा त्वयि । सुखदुःखे तथा चोभे तत्र का परिदेवना ।। 17 ।।**

**पदच्छेदः** अस्ति (अस् लट् अ.पु.ए.व.) एव (अ.) त्वयि (7.1) शोकः (1.1) वै (अ.) हर्षः (1.1) च (अ.) अस्ति तथा (अ.) त्वयि (7.1) सुखदुःखे (1.2) तथा (अ.) च (अ.) उभे (1.2) तत्र (अ.) का (1.1) परिदेवना (1.1) ।।

**अन्वयः** त्वयि शोकः वै अस्ति । त्वयि एव हर्षः च अस्ति । तथा (त्वयि) सुखदुःखे उभे (अपि स्तः) तत्र का परिदेवना (कर्तव्या) ।।

**पदार्थः** त्वयि (त्वयि मानवयोनौ स्थिते काश्यपे) शोकः (ग्लानिः) वै अस्ति (विद्यते) । त्वयि एव हर्षः (आनन्दः ह्लादः वा) च अस्ति (वर्तते) । तथा त्वयि सुखदुःखे उभे (अपि स्तः) तत्र का परिदेवना (शोकानुभूतिः) कर्तव्या ।।

**भावार्थः** मानवयोनौ स्थिते त्वयि काश्यपे शोकः हर्षः च स्तः । अथ च त्वयि सुखदुःखे उभे अपि स्तः । अतः एतस्यां स्थितौ का शोकानुभूतिः कर्तव्या अर्थात् अत्र कदापि शोकः न कर्तव्यः ।।

**ततः सम्पूजयामास काश्यपो हरिवाहनम् । अनुज्ञातश्च तेनाथ प्रविवेश स्वमाश्रमम् ।। 18 ।।**

**पदच्छेदः** ततः (अ.) सम्पूजयामास (सम् पूज् लिट् अ.पु.ए.व.) काश्यपः (1.1) हरिवाहनम् (2.1) अनुज्ञातः (1.1) च (अ.) तेन (3.1) अथ (अ.) प्रविवेश (प्र विश् लिट् अ.पु.ए.व.) स्वम् (2.1) आश्रमम् (2.1) ।।

**अन्वयः** ततः काश्यपः हरिवाहनम् (तम् इन्द्रम्) सम्पूजयामास । अथ तेन (इन्द्रेण) अनुज्ञातः च स्वम् आश्रमं प्रविवेश ।।

**पदार्थः** ततः (तदनन्तरम्) काश्यपः (आत्मानं हन्तुमुद्यतः) हरिवाहनम् (हरिः- अश्वःमेधो वा वाहनं यस्य तम् इन्द्रम्) सम्पूजयामास (पूजितवान्) । अथ तेन (इन्द्रेण) अनुज्ञातः (अनुज्ञां प्राप्य) च स्वम् (स्वीयम्) आश्रमं प्रविवेश (प्रवेशं कृतवान्) ।।

**भावार्थः** अनेन प्रकारेण यदा वार्तालापः जातः तदनन्तरं काश्यपः हरिवाहनं पूजितवान् । ततश्च तेन इन्द्रेण अनुज्ञातः च सः स्वम् आश्रमं प्रविवेश अर्थात् आत्मनः हननस्य विचारं परित्यज्य आश्रमं गतवान् ।।

## टिप्पणी

**सामासः** इन्द्रकाश्यपसंवादः- इन्द्रः च काश्यपः च इन्द्रकाश्यपौ (द्वन्द्वः) इन्द्रकाश्यपयोः संवादः (ष. तत्पु.) । जीवितार्थः जीवितेन/जीवितस्य अर्थः (तृ./ब. तत्पु.) । शृगालरूपः शृगालः रूपं यस्य सः (ब. व्री.) । मनुष्ययोनिः मनुष्याणां योनिः (ब. तत्पु.) दशाङ्गुली – दशानाम् अङ्गलीनां समाहारः दशाङ्गुलम् (द्विगुः), दशाङ्गुलम् अनयोः अस्तीति (ब.व्री.) । हिमवर्षातपानाम् हिमं च वर्षा च आतपश्च इति हिमवर्षातपाः (द्वन्द्वः), तेषाम् ।

**सन्धयः** अत्राप्युदारहरन्तीम् = अत्र + अपि + उदाहरन्तीम् । दृप्तस्तपस्विनम् = दृप्तः + तपस्विनम् । मरिष्याम्यधनस्येह = मरिष्यामि + अधनस्य + इह । श्रोत्रियश्चासि = श्रोत्रियः + च + अस्ति । कण्टकान्नोद्धरामहे = कण्टकात् + न + उद्धरामहे । मुमूर्षुमासीनमकूजन्तमचेतसम् = मुमूर्षम् + आसीनम् + अकूजन्तम् + अचेतसम् । खल्वजिह्वाः = खलु + अजिह्वाः ।

## स्वाध्यायः

1. **अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) काश्यपं रथेन कः पातयामास?

(क) वैश्यः (ख) विप्रः (ग) सारथिः (घ) क्षत्रियः

(2) कस्य जीवितार्थः न विद्यते?

(क) मूर्खस्य (ख) अधनस्य (ग) पापिनः (घ) नरस्य

(3) इन्द्रः केन रूपेण संवादं करोति?

(क) देवरूपेण (ख) मानवरूपेण (ग) ऋषिरूपेण (घ) शृगालरूपेण

(4) प्राणिनः कस्मादधिकः लाभः नास्ति?

(क) पाणिलाभात् (ख) जललाभात् (ग) जन्मलाभात् (घ) मानवयोनिलाभात्

(5) पाणी कीदृशौ स्तः?

(क) दशाङ्गुली (ख) पञ्चाङ्गुलिः (ग) पञ्चाङ्गुलयः (घ) दशाङ्गुलिः

(6) अपाणयः किं सहन्ते?

(क) दुःखम् (ख) सुखम् (ग) आनन्दम् (घ) अन्नम्

**2. एकवाक्येन उत्तरं लिखत ।**

(1) तन्निबोध युधिष्ठिर - अत्र निबोध क्रियायाः कर्ता कः?

(2) वैश्यः कीदृशः आसीत्?

(3) सर्वभूतानि कां योनिम् इच्छन्ति?

(4) मनुष्यत्वे अपि सर्वः किम् अभिनन्दति?

(5) केन कारणेन शृगालादयः कण्टकान् नोद्धरन्ति?

(6) येषां पाणी स्तः ते अङ्गात् कान् उद्धरन्ति?

(7) संवादस्य अन्ते काश्यपः किं करोति?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) कीदृशं किंरूपं च इतिहासम् उदाहरन्ति?

(2) कीदृशेन वैश्येन किं कृतम्?

(3) कस्य जीवितार्थः न विद्यते? किमर्थम्?

(4) काश्यपः कीदृशः अस्ति?

(5) पाणिमन्तः किं किं कर्तुं शक्नुवन्ति?

(6) अपाणयः किं किं सहन्ते?

**4. सामासिकपदानां परिचयं कारयत ।**

(1) इन्द्रकाश्यपसंवादः

(2) जीवितार्थः

(3) शृगालरूपः

(4) मनुष्ययोनिः

(5) दशाङ्गुली

(6) हिमवर्षातपानाम्

**5. सन्धिविच्छेदं कुरुत ।**

(1) अत्राप्युदाहरन्तीमम्

(2) दृप्तस्तपस्विनम्

(3) मरिष्याम्यधनस्येह

(4) श्रोत्रियश्चासि

(5) कण्टकान्नोद्धरामहे

**6. ससन्दर्भं टिप्पणी लेखनीया ।**

(1) मनुष्ययोनिः

(2) पाणिलाभः

(3) अपाणयः

(4) पापयोनिजः

(5) तत्र का परिदेवना

**7. पदानां परिचयं कारयत ।**

(1) निबोध

(2) संशितव्रतम्

(3) मुमूर्षुः

(4) बभाषे

(5) उद्धरामहे

(6) वाहयन्ति

●

# 10. भारतवर्णनम्

आधुनिके काले अपि संस्कृतसाहित्यस्य निर्माणं भवति । अधुनातने काले विरचितत्वात् केचन तत् साहित्यम् आधुनिकमस्ति इति कल्पयन्ति । वस्तुतः साहित्ये आधुनिकता तु कालेन न भवति अपितु साम्प्रतिकसमाजस्य परिस्थितेः प्रभावात् यत् नावीन्यम् आचरितं भवति कविभिः तदेव तत् काव्यम् आधुनिकं करोति । भवतु नाम । एष विषयः अत्र प्रस्तुतः नास्ति । परमत्र एतदवगन्तव्यं भवति यत् पुरातने काले यादृशं संस्कृतसाहित्यं कविभिः महाकविभिः वा रचितं तादृशं साहित्यमद्यापि रच्यते । अनेन संस्कृतस्य साहित्यनिर्माणविषयिणी प्राचीना परम्परा अद्यत्वे अपि प्रवर्तिता अस्तीति ज्ञायते ।

विगतायाम् एकोनविंशतितमायां शताब्द्याम् अस्माकं गुर्जरप्रान्ते अपि एतादृशाः बहवः कवयः स्वजन्मना गुर्जरभूमिम् अलङ्कृतां कृतवन्तः सन्ति, यैः पुरातनं साहित्यमिव नवीनं साहित्यं विरचितमस्ति । एतादृशेषु कविषु मेधाव्रतशास्त्रिणः प्रमुखाः सन्ति । एतेषां पूर्वजाः गुर्जरवासिनः आसन्, परन्तु व्यवसायवशात् ते नासिकनाम्ना सुप्रसिद्धं नगरमुषितवन्तः। अत्रैव मेधाव्रतस्य जन्म अभवत् । एतैः महाकविभिः विरचितं दयानन्ददिग्विजयाख्यं महाकाव्यम् आधुनिके संस्कृतसाहित्ये स्वीयम् उन्नतं स्थानं दधाति । वटोदरस्थाः श्री गो. ह. भट्टमहोदयाः अस्य महाकाव्यस्य विषये स्वीयमभिप्रायं ददन्तः कथयन्ति– दृश्यन्ते च पदे पदे प्रासादिगुणाः रूपकोपमाद्यलङ्कारा: शान्तवीरप्रभृतिरसाः प्रकृतिसौन्दर्यवर्णनं शब्दार्थगौरवं गीर्वाणभाषाप्रावीण्यं च।

किमधिकं ब्रूमः ? अस्मिन् पाठे यानि पद्यानि संगृहीतानि सन्ति तानि पाठकेभ्यः छात्रेभ्यः प्राचीनभारतस्य छायाचित्रं प्रस्तोष्यन्ति । वर्तमानं भारतं तु ते स्वचक्षुर्भ्यां पश्यन्तः सन्ति । अनेन काव्यचक्षुषा प्राचीनस्य भारतस्यापि ते दर्शनं कुर्युः इत्याशयेन पाठः अयं संकलितः अस्ति ॥

---

**हिमाद्रिविन्ध्याचललालिताभिर्नदीभिरामण्डितभूमिखण्डा ।**
**स्वपूर्वजानन्तयशःशशाङ्कैः शुक्लीकृता भारतभूश्चकास्ति ॥ 1॥**

**पदच्छेदः** हिमाद्रिविन्ध्याचललालिताभिः (3.3) नदीभिः (3.3) आमण्डितभूमिखण्डा (1.1) स्वपूर्वजानन्तयशःशशाङ्कैः (3.3) शुक्लीकृता (1.1) भारतभूः (1.1) चकास्ति (कास् लट् 1.1) ॥

**अन्वयः** हिमाद्रिविन्ध्याचललालिताभिः नदीभिः आमण्डितभूमिखण्डा स्वपूर्वजानन्तयशःशशाङ्कैः शुक्लीकृता भारतभूः चकास्ति ॥

**पदार्थः** हिमाद्रिविन्ध्याचललालिताभिः (सर्वोच्चहिमालयविन्ध्याचलपर्वतैः पोषिताभिः) नदीभिः (गंगा–यमुना–गोदावरीत्यादिभिः नदीभिः), आमण्डितभूमिखण्डा (अलङ्कृतः भूमिभागः यस्याः अस्ति तादृशी) स्वपूर्वजानन्तयशःशशाङ्कैः (स्वपूर्वजानाम् अनन्तकीर्तिरूपैः शशाङ्कैः – चन्द्रमोभिः) शुक्लीकृता (धवलीकृता) भारतभूः (भारतभूमिः) चकास्ति (प्रकाशते) ॥

**भावार्थः** सर्वोच्चैः हिमालय–विन्ध्याचलादिभिः पर्वतैः तथा च गङ्गा–यमुना–गोदावरी–नर्मदादिभिः नदीभिः एषा भारतभूमिः शोभते । अथ च अस्माकं पूर्वजानां कीर्तिरूपैः शशाङ्कैः धवलीकृता भारतभूमिः प्रकाशते ॥

**महार्हरत्नोदयशैलराजौ महाम्बुधी तुङ्गतरङ्गहस्तैः ।**
**आनीयमालां मणिमौक्तिकानां यस्या ददाते चरणारविन्दे ॥ 2॥**

**पदच्छेद:** महार्हरत्नोदयशैलराजौ (1.2) महाम्बुधी (1.1) तुङ्गतरङ्गहस्तैः (3.3) आनीय (अ.) मालाम् (2.1) मणिमौक्तिकानाम् (6.3) यस्याः (6.1) ददाते (दा, आ. लट् ल. 1.1) चरणारविन्दे (7.1)॥

**अन्वय:** महार्हरत्नोदयशैलराजौ महाम्बुधी तुङ्गतरङ्गहस्तैः मणिमौक्तिकानां मालाम् आनीय यस्याः चरणारविन्दे ददाते ॥

**पदार्थ:** महार्हरत्नोदयशैलराजौ (महार्हरत्नोत्पन्न-पर्वतराजौ), महाम्बुधी (महासागरौ), तुङ्गतरङ्गहस्तैः (महत्तरङ्गपाणिभिः), मणिमौक्तिकानाम् (रत्नमुक्तानाम्), मालाम् (मणिमालाम्) यस्याः (भारतमातुः), चरणारविन्दे (पादपद्मे) ददाते (अर्पयतः) ॥

**भावार्थ:** महामूल्यानां रत्नानाम् उत्पत्तिस्थानरूपौ पर्वतराजौ हिमालयविन्ध्याचलौ महासागरद्वयं च तरङ्गरुपिहस्तद्वारा अस्याः भारतभुवः पदकमले रत्नमुक्तामालां निर्माय यथा अर्पयतः ॥

**फलद्रुमालङ्कृतसस्यदेशा नानाविहंगारवगुञ्जिताशा ।**
**सर्वर्तुशर्मप्रदवायुतोया सर्वांशतो या सुरलोकसेव्या ॥3॥**

**पदच्छेद:** फलद्रुमालङ्कृतसस्यदेशा (1.1) नानाविहंगारवगुञ्जिताशा (1.1) सर्वर्तुशर्मप्रदवायुतोया (1.1) सर्वांशतः (अ.) या (1.1) सुरलोकसेव्या (1.1)

**अन्वय:** या फलद्रुमालङ्कृतसस्यदेशा नानाविहङ्गारवगुञ्जिताशा सर्वर्तुशर्मप्रदवायुतोया सर्वांशतो सुरलोकसेव्या (वर्तते) ।

**पदार्थ:** फलद्रुमालङ्कृतसस्यदेशा (पुष्पद्रुमशोभितसस्यदेशा), नानाविहङ्गारवगुञ्जिताशा (नैकपक्षिध्वनिगुञ्जितदिशा), सर्वर्तुशर्मप्रदवायुतोया (सर्वर्तुसुखप्रदातृवायुसलिला) सर्वांशतः (फलतः पूर्णतया) या (भारतमाता) सुरलोकसेव्या (देवलोकयोग्या) अस्ति इति ॥

**भावार्थ:** एषा भारतभूः पुष्पैः फलवृक्षैः तथा सस्यादिना सर्वदा शोभायमाना वर्तते । अस्मिन् भारते नैकप्रकारकाः खगाः अपि सन्ति । येषां मधुररवैः सर्वाः दिशः शब्दायमानाः सन्ति । अत्र प्रत्येकम् ऋतौ जलवायुः सुखदायकः भवति। सर्वांशतः एषा भारतभूमिः सुरभोग्या अस्ति ।

**वीरैकभोग्या शुभयज्ञयोग्या पुण्यात्मनां कल्पतरूपमेया ।**
**निःश्रेयसस्वभ्युदयोपलब्धौ सहायिका या सहधर्मिणीव ॥4॥**

**पदच्छेद:** वीरैकभोग्या (1.1) शुभयज्ञयोग्या (1.1) पुण्यात्मनाम् (6.3) कल्पतरूपमेया (1.1) निःश्रेयसस्वभ्युदयोपलब्धौ (7.1) सहायिका (1.1) या (1.1) सहधर्मिणि (1.1) इव (अ.)

**अन्वय:** या वीरैकभोग्या शुभयज्ञयोग्या पुण्यात्मनां कल्पतरूपमेया निःश्रेयसस्वभ्युदयोपलब्धौ सहधर्मिणी इव सहायिका (भवति) ।

**पदार्थ:** या (भारतभूमिः), वीरैकभोग्या (शूरवीरभोग्या), शुभयज्ञयोग्या (सुमखयोग्या), पुण्यात्मनाम् (पवित्रात्मनाम्), सज्जनानाम् (कृते) कल्पतरूपमेया (कल्पवृक्षसमाना), निःश्रेयसस्वभ्युदयोपलब्धौ (निःश्रेयस्वोन्नतिप्राप्तौ), सहधर्मिणी (अर्धाङ्गिनी) इव सहायिका (सहायताकर्त्री) अस्ति ॥

**भावार्थ:** अस्याः भारतभूमेः वीराः एव उपभोगं कर्तुं शक्नुवन्ति । यज्ञाय एषा भूमिः योग्या अस्ति । पवित्रात्मनां कृते एषा कल्पवृक्षसमाना अस्ति । सांसारिकसुखाय एवं मोक्षप्राप्तये एषा भार्या इव सहायतां करोति ।

**प्रकाशिका वेदरविप्रभाणां प्रभातवेलेव मुनीन्द्रवन्द्या ।**
**विद्याकलारत्नखनिर्वरेण्या गुरुस्थली याखिललोककाम्या ॥5॥**

**पदच्छेदः** प्रकाशिका (1.1) वेदरविप्रभाणाम् (6.3) प्रभातवेला (1.1) इव (अ.) मुनीन्द्रवन्द्या (1.1) विद्याकलारत्नखनिः वरेण्या (1.1) गुरुस्थली (1.1) या (1.1) अखिललोककाम्या (1.1)

**अन्वयः** या वेदरविप्रभाणां प्रकाशिका प्रभातवेला इव मुनीन्द्रवन्द्या वरेण्या विद्याकलारत्नखनिः गुरुस्थली अखिललोककाम्या (अस्ति) ।

**पदार्थः** वेदरविप्रभाणाम् (वेदसूर्यप्रकाशानाम्), या (भारतमाता), प्रकाशिका (प्रकटकर्त्री), प्रभातवेला (प्रातःकालः) इव (समाना) मुनीन्द्रवन्द्या (ऋषिभिः वन्द्या), वरेण्या (श्रेष्ठा), विद्याकलारत्नखनिः (विविधाः विद्यायाः कलायाः च निधिः), अस्ति गुरुस्थली (गुरुभूमिः) । ॥

**भावार्थः** वेदरूपिसूर्यस्य एषा भारतमाता प्रकाशिका अस्ति । प्रभातवेला इव मुनिवरैः निधिः एव अखिलं संसारं शिक्षादात्री प्रथमा एषा भारतभूमिः एव । अतः भारतमाता गुरुभूमिः अस्ति ।

**हिमालयो रम्यमहीरुहाणां, शाखाकराग्रैर्दलसम्पुटेषु ।**
**आदाय देव्यै सुफलोपहारान्, यस्यै सदा सेवकवत् प्रदत्ते ॥6॥**

**पदच्छेदः** हिमालयः (1.1) रम्यमहीरुहाणाम् (6.1) शाखाकराग्रैः (3.3) दलसम्पुटेषु (7.3) आदाय (अ.) देव्यै (4.1) सुफलोपहारान् (2.3) यस्यै (4.1) सदा (अ.) सेवकवत् (अ.) प्रदत्ते (लट्. 1.1)

**अन्वयः** हिमालयः सम्यमहीरुहाणां शाखाकराग्रैः दलसम्पुटेषु सदा सुफलोपहारान् आदाय सेवकवत् प्रदत्ते ।

**पदार्थः** हिमालयः (हिमाद्रिः), रम्यमहीरुहाणाम् (सुन्दरवृक्षाणाम्), शाखाकराग्रैः (शाखाहस्तैः), दलसम्पुटेषु (पर्णनिर्मितदोनेषु), सदा (सर्वथा), सुफलोपहारान् (मधुरफलस्य) उपहारान् आदाय (दत्वा), सेवकवत् (दासवत्), प्रदत्ते (उपस्थापयति) ॥

**भावार्थः** भारतमात्रे पर्वतराजहिमालयः सुन्दरः महीरुहाणां शाखारूपिहस्तैः पर्णसम्पुटेषु मधुरफलानां उपहारान् आदाय भृत्य इव उपस्थितः भवति ॥

**षण्णामृतूनां रमणीयरूपैरुपस्थिता भारतरङ्गमञ्चे ।**
**स्फूरद्विलासो प्रकृतिर्नटीयं, यस्याः मनो नन्दयति प्रकामम् ॥7॥**

**पदच्छेदः** षण्णाम् (6.3) ऋतुनाम् (6.3) रमणीरुपैः (3.3) उपस्थिता (1.1) भारतरङ्गमञ्चे (7.1) स्फूरद्विलासः (1.1) प्रकृतिः (1.1) प्रकामम् (2.1) नटी (1.1) इयं (1.1) यस्या (6.1) मनो (2.1) नन्दयति (अ.पु.ए.व.)

**अन्वयः** भारतरङ्गमञ्चे प्रकृतिः नटी षण्णाम् ऋतूनाम् रमणीयरूपैः उपस्थिता । इयं स्फुरद्विलासा यस्याः मनः प्रकामं नन्दयति ।

**पदार्थः** भारतरङ्गमञ्चे (भारतनाटकीयमञ्चे) प्रकृतिः नटी (नर्तकी), नाटककर्त्री, षण्णामृतूनाम् (हेमन्तवसन्तादि-ऋतूनाम्), रमणीयरूपैः (सुन्दररूपैः) मनोहररूपैः, उपस्थिता (आगता), इयम् (एषा) भारतमाता, स्फुरद्विलासा (सुन्दरविलासा) भारतमाता, यस्याः मनः (चित्तम्), प्रकामम् (अधिकम्) नन्दयति (मोदयति)॥

**भावार्थः** भारतस्य रंगमञ्चोपरि नटी समये समये ऋतूनां सुन्दररूपं धृत्वा उपस्थिता भवति । एवं भारतमातरं सुन्दरविलासैः मनः प्रसादयति ।

**यशोबलाभ्यां सितचामराभ्यां साम्राज्यलक्ष्मीस्सह शान्तिदेव्या ।**
**धर्मातपत्रां नयदण्डहस्तां यां पुण्यभूमिं सुचिरं सिषेवे ॥8॥**

**पदच्छेदः** यशोबलाभ्याम् (3.2) सितचामराभ्याम् (3.2) साम्राज्यलक्ष्मीः (1.1) सह (अ.) शान्तिदेव्या (3.1) धर्मातपत्राम् (1.1) नयदण्डहस्ताम् (1.1) याम् (2.1) पुण्यभूमिम् (2.1) सुचिरम् (अ) सिषेवे (लट्, ल. 1.1)

**अन्वयः** साम्राज्यलक्ष्मीः शान्तिदेव्या सह यशोबलाभ्यां सितचामराभ्यां धर्मातपत्रां नयदण्डहस्तां यां सुचिरं पुण्यभूमिं सिषेवे ।

**पदार्थः** साम्राज्यलक्ष्मीः (साम्राज्यधनम्), शान्तिदेव्या (शान्तिरूपदेव्या) सह (साकम्), यशोबलाभ्याम् (कीर्तिशक्तिभ्याम्), सितचामराभ्याम् (श्वेतचामराभ्याम्), धर्मातपत्रम् (धर्मछत्रम्), नयदण्डहस्ताम् (नीतिदण्डधृताम्) याम् (भारतमातरम्), सुचिरं (दीर्घकालपर्यन्तम्), पुण्यभूमिम् (भारतभूमिम्) सिषेवे (सेवितवती) ॥

**भावार्थः** साम्राज्यलक्ष्मीः शान्तिदेव्याः सार्धं यशोरूपिभिः एवं च बलरूपिभिः श्वेतचामरैः धर्मछत्रधर्त्र्याः एवं च नीतिदण्डधर्त्र्याः भारतमातुः चिरकालं यावत् सेवनं कृतवती ॥

## स्वाध्यायः

**1. अधोलिखितानाम् प्रश्नानां उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) कीदृशी भारतभूः चकास्ति?
(क) शुक्लीकृता (ख) हरितवर्णा (ग) पीतवर्णा (घ) सस्यश्यामला

(2) शैलराजः चरणारविन्दे किं ददाते?
(क) धनम् (ख) रत्नम् (ग) मालाम् (घ) सुखम्

(3) केषां कृते भारतभूमिः कल्पतरूपमेया अस्ति?
(क) देशवासिनां कृते (ख) सज्जनानां कृते (ग) पुण्यात्मनां कृते (घ) प्राणिनां कृते

(4) पूर्वजानां कीर्तिः कैः धवलीकृता अस्ति?
(क) सूर्यमयूखैः (ख) विद्युद्भिः (ग) यशःशशाङ्कैः (घ) रत्नैः

(5) भारतरंगमञ्चे नटी केन रूपेण मनो नन्दयति?
(क) षण्णामृतूनाम् रूपैः (ख) नदीरूपैः (ग) लतारूपैः (घ) कीर्तिरूपैः

(6) सदा सेवकवत् कः प्रदत्ते?
(क) सागरः (ख) वनदेवता (ग) नद्यः (घ) हिमालयः

**2. एकवाक्येन उत्तरं लिखत ।**

(1) नद्यः कैः लालिताः सन्ति?
(2) महाम्बुधी कौ स्तः?
(3) कविना भारतभुवः वायुतोये कीदृशे वर्णिते?
(4) भारतभूः का इव मुनीन्द्रैः वन्द्या अस्ति?
(5) सुफलोपहारान् कः प्रदत्ते?
(6) प्रकृतिनटीयं किं नन्दयति?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) कीदृशी शुक्लीकृता भारतभूः चकास्ति ?

(2) भारतचरणारविन्दे कः किं ददाते ?

(3) भारतभूः सहधर्मिणीव कुत्र सहायिका अस्ति ?

(4) भारतभूः कथं गुरुस्थली वर्तते ?

(5) हिमालयः केन प्रकारेण सेवकवत् किं प्रदत्ते ?

**4. समासिकदानाम् परिचयं कारयत ।**

(1) आमण्डितभूमिखण्डा

(2) तुङ्गतरङ्गहस्तैः

(3) सुरलोकसेव्या

(4) कल्पतरूपमेया

(5) विद्याकलारत्नखनिः

(6) शाखाकराग्रैः

**5. विवरणात्मिका टीप्पणी लेखनीया ।**

(1) शैलराजः

(2) चरणारविन्दम्

(3) सुरलोकसेव्या

(4) सहधर्मिणी

(5) पुण्यभूमिः

**6. पदानां परिचयं कारयत ।**

(1) चकास्ति

(2) ददाते

(3) सर्वांशतः

(4) आदाय

(5) नन्दयति

(6) सिषेवे

●

# 11. सेवकस्य सेवाधर्मः

महाभारतं नाम सुप्रसिद्धं महाकाव्यम् । व्यासेन ऋषिणा कृतमस्ति इत्यतः तत् आर्षकाव्यत्वेन अपि प्रसिद्धं वर्तते । अस्य नाम्नि यत् महत् - शब्दः वर्तते सः तद्गतानां विषयानां संदर्भे अपि विद्यते । अर्थात् अस्मिन् महाभारते बहवः विषयाः संगृहीताः सन्ति । एतेषां विषयाणां परिगणनं शिरसि स्थितानां बालानां परिगणनमिव सुदुष्करम् अस्ति । विषयानां वैविध्यवशात् यदत्र अस्ति तदेव सर्वत्र प्रवर्तते, यदत्र नास्ति तत् अन्यत्र न विद्यते - इत्यादीनि बहुप्रकारकाणि विदुषाम् अभिप्राय-वचनानि परम्परायां प्रसृतानि सन्ति ।

सामान्यतः कौरव-पाण्डवयोः पारस्परिकस्य युद्धस्य कथा अत्र विशेषतः वर्णिता अस्ति, इत्यतः अयं व्यासेन रचितः ग्रन्थः युद्धस्य ग्रन्थः इति मत्वा जनाः स्वीये गेहे तस्य स्वाध्यायम् अपि रुचिकरं न मन्यन्ते । परन्तु एतादृशानां जनानां मध्ये एषः विचारः प्रवर्तनीयः प्रतिभाति यत् विभिन्नानां विषयानां यदि ज्ञानम् अपेक्षते चेत् महाभारतम् अवश्यमेव एकवारं पठनीयम् इति । यतोहि समाजे स्थितः को नाम जनः अस्ति, यस्य कृते साक्षात् उपयोगिनी विचारसामग्री अत्र न दृश्यते । अस्यैव परमसत्यस्य प्रदर्शनाय अत्र राजपरिवारे सेवारतानां जनानां कृते यादृशम् उपयोगि मार्गदर्शनं महाभारते उपदिष्टमस्ति तादृशम् अत्र द्वादशभिः पद्यैः प्रस्तूयते ।

एषः विषयः महाभारते विराटपर्वणि चतुर्थाध्याये युधिष्ठिर-धौम्ययोः संवादे आगच्छति । यद्यपि तत्र अस्य विषयस्य बहूनि पद्यानि सन्ति, तथापि अत्र केवलमुदाहरणरूपेण द्वादश पद्यानि स्वीकृतानि सन्ति । पाठमिमं पठित्वा छात्राः राजसभायां राजपरिवारे (अधुनातने समाजे सर्वकारस्य मन्त्रिणाम् अधिकारिणां च सन्निधौ) केन प्रकारेण व्यवहारः करणीयः भवति, इत्ये तस्य परिज्ञानं प्राप्स्यन्ति ।

(संदर्भः - महाभारतम्, विराटपर्व, चतुर्थः अध्यायः ॥)

---

धौम्य उवाच ॥

**विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः । अतोऽहमपि वक्ष्यामि हेतुमात्रं निबोधत ॥ 1॥**

**पदच्छेदः** विदिते (7.1) च (अ) अपि (अ) वक्तव्यम् (1.1) सुहृद्भिः (3.3) अनुरागतः (अ) अतः (अ) अहम् (1.1) अपि (अ) वक्ष्यामि (वच् लृट् भविष्यकाल, म.पु.ए.व.) हेतुमात्रम् (2.1) निबोधत (नि बुध् लोट् म.पु.ब.व.) ॥

**अन्वयः** विदिते (सति) च अपि सुहृद्भिः अनुरागतः वक्तव्यम् । अतः अहम् अपि हेतुमात्रम् वक्ष्यामि, (यूयं) निबोधत ॥

**पदार्थः** विदिते (ज्ञाते सति) च (तथा) अपि (एवञ्च) सुहृद्भिः (मित्रैः) अनुरागतः (प्रेम्णा) वक्तव्यम् (वदनीयम्) । अतः (अस्मात् कारणात्) अहम् (धौम्यः) अपि (एवञ्च) हेतुमात्रम् (निमित्तमात्रम्) वक्ष्यामि (कथयिष्यामि) (यूयम्) निबोधत (अवगच्छत) ॥

**भावार्थः** विदिते सति च अपि मित्रजनैः अनुरागतः (ज्ञातव्यम् वस्तु) वक्तव्यम् भवति । अतः अहम् धौम्यः अपि तव समक्षं हेतुमात्रं वक्ष्यामि । मम वचनानि यूयं निबोधत ॥

**नास्य यानं न पर्यङ्कं न पीठं न गजं रथम् । आरोहेत्संमतोऽस्मीति स राजवसतिं वसेत् ॥2॥**

**पदच्छेदः** न (अ) अस्य (6.1) यानम् (2.1) न (अ) पर्यङ्कम् (2.1) न (अ) पीठम् (2.1) न (अ) गजम् (2.1) रथम् (2.1) आरोहेत् (आ रुह् लोट् अ.पु.ए.व.) संमतः (1.1) अस्मि (अस् लट् अ.पु.ए.व.) इति (अ) सः (1.1) राजवसतिम् (2.1) वसेत् (वस् लोट् अ.पु.ए.व.) ॥

**अन्वयः** अस्य यानं पर्यङ्कं पीठं गजं रथं च संमतः असि□म इति न आरोहेत् । सः (सेवकः) राजवसतिं वसेत् ॥

**पदार्थः** अस्य (राज्ञः) यानम् (वाहनम्) पर्यङ्कम् (शयनम्) पीठम् (आसनम्) गजम् (हस्तिनम्) रथम् (स्यन्दनम्) च (अहं) संमतः अस्मि इति (विचार्य) न आरोहेत् (आरोहणं न कुर्यात्) । सः (सेवकः) राजवसतिम् (राज्ञः निवासे) वसेत् (उषितुं शक्नोति) ॥

**भावार्थः** राजसेवकः यदि राज्ञः यान-पर्यङ्कादि संमतः सन् अपि तं न आरोहेत्, तदा एव सेवकः राजवसतिम् उषितुं शक्नोति ॥

**असूयन्ति हि राजानो जनाननृतवादिनः । तथैव चावमन्यन्ते मन्त्रिणं वादिनं मृषा ॥3॥**

**पदच्छेदः** असूयन्ति (असूया ना.धा. लट् अ.पु.ब.व.) हि (अ) राजानः (1.3) जनान् (2.3) अनृतवादिनः (2.3) तथैव (अ) च (अ) अवमन्यन्ते (अव मन् लट् अ.पु.ब.व.) मन्त्रिणम् (2.1) वादिनम् (2.1) मृषा (अ) ॥

**अन्वयः** राजानः हि अनृतवादिनः जनान् असूयन्ति । तथैव च मृषा वादिनं मन्त्रिणम् अवमन्यन्ते ॥

**पदार्थः** राजानः (नृपाः) हि (निश्चयार्थे) अनृतवादिनः (मृषाभाषिणः) जनान् (नरान्) असूयन्ति (असूयां कुर्वन्ति) । तथैव च (एवं प्रकारेण एव) मृषा (असत्यस्य) वादिनं (वक्तारम्) मन्त्रिणम् (सचिवम्) अवन्यन्ते (अवमानं कुर्वन्ति) ॥

**भावार्थः** राजानः अनृतवादिनः जनान् प्रति असूयां कुर्वन्ति, एवम् एव असत्यवादिनं मन्त्रिणम् अपि अवमन्यन्ते ॥ (अतः राज्ञः समीपे असत्यम् न वक्तव्यम् ।)

**यत्नाच्चोपचरेदेनमग्निवद्देववच्च ह । अनृतेनोपचीर्णो हि हिंस्यादेनमसंशयम् ॥4॥**

**पदच्छेदः** यत्नात् (5.1)च (अ) उपचरेत् (वि.लि. 1.1)एनम् (इदम् 2.1) अग्निवत् (अ) देववत् (अ)च (अ)ह(अ) अनृतेन (3.1) उपचीर्णः (1.1) हि (अ) हिंस्यात् (वि./आ.लि.1.1)एनम् (इदम् 2.1)असंशयम् (अत्र (अ)-अव्यवयम्) ॥

**अन्वयः** एनम् (राजानम्) अग्निवत् देववत् च यत्नात् उपचरेत् । अनृतेन उपचीर्णः हि एनम् असंशयम् हिंस्यात् (एव) ॥

**पदार्थः** एनम् (राजानम) अग्निवत् (हुताशनः इव) देववत् (देवता इव) च यत्नात् (प्रयत्नेन) उपचरेत् (सेवेत) । अनृतेन (मृषा) उपचीर्णः (उपचारः क्रियते चेत्) हि (नूनम्) एनम् (इमं सेवकं सः) असंशयम् (विना संशयम् अर्थात् अवश्यमेव) हिंस्यात् (हन्यात्) ॥

**भावार्थः** सेवकः राजानम् अग्निवत् देववत् च प्रयत्नेन उपचरेत् । (प्रयत्नं विना) यदि सः अनृतेन उपचारं करोति चेत् तं सेवकं राजा अवश्यमेव हिंस्यात् ॥

**अनुकूलो भवेच्चास्य सर्वार्थेषु कथासु च । अप्रियं चाहितं यत्स्यात्तदस्मै नानुवर्णयेत् ॥5॥**

**पदच्छेदः** अनुकूलः (1.1)भवेत् (भू.वि.लि.1.1)च (अ) अस्य (इदम् ६.1) सर्वार्थेषु (७.3)) कथासु (७.3)

च (अ) अप्रियम् (1.1) च (अ) अहितम् (1.1) यत् (1.1) स्यात् (अस् वि.लि.1.1) तत् (२.1) अस्मै (इदम् ४.1) न (अ) अनुवर्णयेत् (वि.लि.1.1)॥

**अन्वयः** अस्य (नृपस्य) अनुकूलः भवेत् । (अथ) च सर्वार्थेषु कथासु च यत् अप्रियम् अहितम् च यत् स्यात् तत् अस्मै न अनुवर्णयेत् ॥

**पदार्थः** अस्य (नृपस्य) अनुकूलः (समानम् एव) भवेत् (वर्तेत) । (अथ) च सर्वार्थेषु (सर्वप्रकारकेषु) कथासु (वार्तासु) च यत् अप्रियम् (प्रियं नास्ति तादृशम्) अहितम् (हितम् नास्ति तादृशम्) च यत् स्यात् (यत् भवेत्) तत् अस्मै (नृपाय) न अनुवर्णयेत् (न कथयेत्) ॥

**भावार्थः** सेवकः सदा नृपस्य अनुकूलः भवेत् । सः कदापि अप्रियम् अहितं च नृपाय न निवेदयेत् ॥

**दक्षिणं वाथ वामं वा पार्श्वमासीत पण्डितः । रक्षिणां ह्यात्तशस्त्राणां स्थानं पश्चाद्विधीयते ॥ 6 ॥**

**पदच्छेदः** दक्षिणम्(२.१) वा (अ) अथ (अ) वामम् (२.१) वा (अ) पार्श्वम् (२.१)आसीत (आ.प.वि.लि.१.१) पण्डितः (१.१) । रक्षिणाम् (६.१) हि (अ) आत्तशस्त्राणां (६.१) स्थानम् (१.१) पश्चात् विधीयते ॥

**अन्वयः** अथ पण्डितः दक्षिणं वा वामं वा पार्श्वम् आसीत । रक्षिणां हि आत्तशस्त्राणां स्थानं पश्चात् विधीयते ॥

**पदार्थः** अथ पण्डितः (बुद्धिमान् सेवकः) दक्षिणम् (दक्षिणतः) वा वामम् (वामतः) वा पार्श्वम् (पार्श्वभागे) आसीत (आसनं गृह्णीयात्) । रक्षिणाम् (रक्षापुरुषाणाम्) हि आत्तशस्त्राणाम् (शास्त्रधारिणाम्) स्थानम् (आसनम्) पश्चात् (तदनन्तरम्) विधीयते (निश्चितं क्रियते) ॥

**भावार्थः** यः खलु पण्डितः सेवकः अस्ति सः दक्षिणं वामं वा पार्श्वं तिष्ठति । रक्षिणां स्थानं तु पश्चात् (नृपस्य पृष्ठभागे) विधीयते ॥

**न मृषाभिहितं राज्ञो मनुष्येषु प्रकाशयेत् । यं चासूयन्ति राजानः पुरुषं न वदेच्च तम् ॥ 7 ॥**

**पदच्छेदः** न (अ) मृषाभिहितम् (२.१) राज्ञः(६.१) मनुष्येषु (७.३) प्रकाशयेत् (वि.लि.१.१)। यम् (२.१) च (अ) असूयन्ति (लट् १.३) राजानः पुरुषम् (२.१) न (अ) वदेत् (वि,लि,१.१) च (अ) तम् (२.१)॥

**अन्वयः** राज्ञः मृषाभिहितं मनुष्येषु न प्रकाशयेत् । राजानः यं पुरुषं च असूयन्ति तं न वदेत् ॥

**पदार्थः** राज्ञः (नृपस्य) मृषाभिहितं (असत्यभाषणम्) मनुष्येषु (सामान्यजनेषु) न प्रकाशयेत् (प्रकाशितं न कुर्यात्) । राजानः (नृपाः) यं पुरुषम् (जनम्) च असूयन्ति (असूयाभावेन पश्यन्ति) तम् (पुरुषम्) न वदेत् (न कथयेत्) ॥

**भावार्थः** राज्ञः मृषाभिहितम् जनेषु प्रकाशितं न कुर्यात् । अथ च राजानः यं जनम् असूयन्ति, तं जनं (राज्ञः असूयाभावं) न वदेत् ॥

**शूरोऽस्मीति न दृप्तः स्याद्बुद्धिमानिति वा पुनः । प्रियमेवाचरन् राज्ञः प्रियो भवति भोगवान् ॥ 8 ॥**

**पदच्छेदः** शूरः (१.१) अस्मि (लट् १.१) इति (अ) न (अ) दृप्तः (१.१) स्यात् (वि.लि.१.१) बुद्धिमान् (१.१) इति (अ) वा (अ) पुनः (अ)। प्रियम् (१.१) एव (अ) आचरन् (१.१) राज्ञः (६.१) प्रियः (१.१) भवति (लट् १.१) भोगवान् (१.१)॥

**अन्वयः** शूरः अस्मि इति बुद्धिमान् (अस्मि) इति वा पुनः दृप्तः न स्यात् । राज्ञः प्रियम् एव आचरन् भोगवान् प्रियः भवति ॥

**पदार्थः** शूरः (पराक्रमी) अस्मि इति न दृप्तः (अभिमानी) स्यात् । बुद्धिमान् (मतिमान् अस्मि) इति वा पुनः

(दृप्तः न स्यात्) । राज्ञः (नृपस्य) प्रियम् (प्रीतियुक्तम्) एव आचरन् (समाचारन्) भोगवान् (भोगी, सेवकः) (राज्ञः - नृपस्य) प्रियः (प्रीतिपात्रम्) भवति (सम्पद्यते) ॥

**भावार्थः** भवतु नाम सेवकः शूरः बुद्धिमान् वा । परन्तु सः कदापि राज्ञः समक्षं दृप्तः न स्यात् । राज्ञः भोगी (सेवकः) तु नृपस्य प्रियम् एव आचरन् नृपस्य प्रियः भवति ॥

**ऐश्वर्यं प्राप्य दुष्प्रापं प्रियं प्राप्य च राजतः । अप्रमत्तो भवेद्राज्ञः प्रियेषु च हितेषु च ॥9॥**

**पदच्छेदः** ऐश्वर्यम् (२.१) प्राप्य (अ) दुष्प्रापम् (२.१) प्रियम् (२.१) प्राप्य (अ) च (अ) राजतः (अ) अप्रमत्तः(१.१) भवेत् (वि.लि.१.१) राजः(६.१) प्रियेषु (७.३) च (अ) हितेषु (७.३) च (अ)॥

**अन्वयः** राजतः (दुष्प्रापम्) ऐश्वर्यं प्राप्य दुष्प्रापं प्रियं च प्राप्य राजः प्रियेषु च हितेषु च (कार्येषु) अप्रमतः भवेत् ॥

**पदार्थः** राजतः (नृपात्) (दुज्ञापम् अतिकष्टेन प्राप्यम्) ऐश्वर्यम् (धनादिकम्) प्राप्य (लब्ध्वा), दुष्प्रापं प्रियम् (स्नेहम्) च प्राप्य (लब्ध्वा) राज्ञः (नृपस्य) प्रियेषु (इष्टेषु) च हितेषु (कल्याणकारिषु) च (कार्येषु) अप्रमतः (प्रमादरहितः सावधानः वा) भवेत् ॥

**भावार्थः** राजतः दुष्प्रापम् अर्थात् सामन्यतः अप्राप्यम् ऐश्वर्यं प्रियम् (स्नेहम्) च प्राप्य राजः प्रियेषु हितेषु च कार्येषु सेवकः सदा अप्रमत्तः भवेत् ॥

**न चोष्ठौ निर्भुजेज्जातु न च वाक्यं समाक्षिपेत् । सदा क्षुतं च वातं च ष्ठीवनं चाचरेच्छनैः ॥10॥**

**पदच्छेदः** न (अ) च (अ) ओष्ठौ (२.२) निर्भुजेत् (वि.लि.१.१) जातु (अ) न (अ) च (अ) वाक्यम् (२.१) समाक्षिपेत् (वि.लि. १.१)। सदा (अ) क्षुतम् (२.१) च (अ) वातम् (२.१) च (अ) ष्ठीवनम् (२.१) च (अ) आचरेत् (वि.लि.१.१) शनैः(अ) ॥

**पदार्थः** ओष्ठौ (मुखगतौ अधरोष्ठौ - दन्तच्छदौ) च न निर्भुजेत् (बलेन चाञ्चल्ययुतौ न कुर्यात्) । न जातु (न च कदापि) संवादस्य मध्ये, वाक्यम् समाक्षिपेत् (सेवकः ब्रूयात्) । क्षुतम् (छक्कारः) च वातम् (अपानवायुः) च ष्ठीवनम् (निष्ठ्युतम्) च सदा शनैः (मन्दम्) आचरेत् (समाचरेत्) ॥

**भावार्थः** (राजसभायाम् यदा उपस्थितः स्यात् तदा सेवकस्य) ओष्ठौ संम्मिलितौ भवेताम् । संवादस्य मध्ये किमपि वाक्यम् न ब्रूयात् । क्षुतं वातं ष्ठीवनं छिक्कारः कफादयः च प्राकृतिकाः वेगाः स्युः, तदा सदा शनैः आचरेत् ॥

**हास्यवस्तुषु चाप्यस्य वर्तमानेषु केषुचित् । नातिगाढं प्रहृष्येत न चाप्युन्मत्तवद्धसेत् ॥11॥**

**पदच्छेदः** हास्यवस्तुषु (७.३) च (अ) अपि (अ) अस्य (इदम् ६.१) वर्तमानेषु (७.३) केषुचित् (अ) न (अ) अतिगाढम् (अ) प्रहृष्येत (वि.लि.१.१) न (अ) च (अ) अपि (अ) उन्मत्तवत् (अ) हसेत् (वि,लि.१.१)॥

**अन्वयः** अस्य केषुचित् वर्तमानेषु हास्यवस्तुषु अतिगाढं न प्रहृष्येत । न च अपि उन्मत्तवत् हसेत् ॥

**पदार्थः** अस्य (नृपस्य) केषुचित् वर्तमानेषु (उपस्थितेषु जनेषु) हास्यवस्तुषु (हास्यकथासु हास्यप्रसङ्गेषु वा) अतिगाढम् (अतिशयम्) न प्रहृष्येत (हर्षं न प्रदर्शयेत्) । न च अपि (अथ च न हि) उन्मत्तवत् (उन्मतः जनः इव) हसेत् (परिहासं कुर्यात्) ॥

**भावार्थः** नृपस्य केषुचित् जनेषु वर्तमानेषु (प्रसंगतः यदि) हास्यवस्तु उपस्थितं भवति, चेत् सेवकः अतिगाढं हर्षं न प्रदर्शयेत् । न च अपि उन्मत्तः जनः इव परिहासं कुर्यात्) ॥

**न चातिधैर्येण चरेद्गुरुतां हि व्रजेत्तथा । स्मितं तु मृदुपूर्वेण दर्शयेत प्रसादजम् ॥ 12 ॥**

**पदच्छेदः** न (अ) च (अ) अतिधैर्येण (३.१) चरेत् (वि.लि.१.१) गुरुताम् (२.१) हि (अ) व्रजेत् (वि.लि.१.१)तथा (अ) स्मितम् (२.१) तु (अ) मृदुपूर्वेण (३.१) दर्शयेत (आ.प.वि.लि. १.१) प्रसादजम् (२.१) ॥

**पदार्थः** अतिधैर्येण (अतिशयेन धैर्येण अर्थात् शीथिलतया) च न चरेत् (आचरणं न कुर्यात्) । गुरुतां हि (अतिशयं गौरवम्) न व्रजेत् (गच्छेत्) । तथा प्रसादजम् (प्रसन्नतां ददाति तादृशम्) स्मितम् (मन्दहास्यम्) तु मृदुपूर्वेण (कोमलताम्) दर्शयेत (प्रदर्शयेत्) ॥

**भावार्थः** अतिशयेन धैर्येण न आचरेत् । तथैव गुरुताम् अपि अर्थात् अतिशयं गौरवमपि न व्रजेत् । परन्तु प्रसादजं स्मितं तु मृदुपूर्वेण दर्शयेत एव ॥

## टिप्पणी

**समासः** – अनृतम् (न ऋतम् – नञ्त) । असंशयम् (न संशयः तम् – नञ्त) आत्तशास्त्राणाम् (आत्तानि शास्त्राणि यैः, तेषाम् – बहु) । अप्रमतः (न प्रमतः – तत्पु.) । हास्यवस्तुषु (हास्यस्य वस्तु, तेषु – ष. तत्पु.) । मृदुपूर्वेण (मृदुः पूर्वम् यस्य सः, तेन – बहु.) ॥

## स्वाध्यायः

1. **अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) सुहृद्भिः अनुरागतः कदा वक्तव्यम्?

(क) अविदिते सति (ख) विदिते सति (ग) प्रसन्ने सति (घ) अप्रसन्ने सति

(2) संमतः अपि कं न आरोहयेत्?

(क) पर्यङ्कम् (ख) गृहम् (ग) वृक्षम् (घ) गिरिम्

(3) राजानः कीदृशं मन्त्रिणम् अवमन्यन्ते?

(क) धर्मवादिनम् (ख) सत्यवादिनम् (ग) मृषावादिनम् (घ) गिरिम्

(4) सेवकः अग्निवत् देववत् च कम् उपचरेत्?

(क) पितरम् (ख) मातरम् (ग) राजानम् (घ) गुरुम्

(5) राज्ञः मृषाभिहितं केषु न प्रकाशयेत्?

(क) मनुष्येषु (ख) मन्त्रिषु (ग) सैनिकेषु (घ) धार्मिकेषु

(6) कीदृशं स्मितं दर्शयेत्?

(क) प्रसादजम् (ख) शान्तिकरम् (ग) कर्कशम् (घ) प्रशंसनीयम्

**2. एकवाक्येन उत्तरं लिखत ।**

(1) अतोऽहमपि वक्ष्यामि - अत्र अहम् इति कः ?

(2) राजानः कान् असूयन्ति ?

(3) राज्ञः समक्षम् कीदृशं न अनुवर्णयेत् ?

(4) राजसभायां पण्डितः कुत्र आसीत ?

(5) कीदृशम् आचरन् सेवकः राज्ञः प्रियो भवति ?

(6) हास्यवस्तुषु वर्तमानेषु किं न कुर्यात् ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) राज्ञः कं कं पदार्थं न आरोहेत् ?

(2) सेवकः राजानं केन प्रकारेण उपचरेत् ?

(3) राजसभायां स्थानं केन क्रमेण विधीयते ?

(4) कः भोगवान् सन् सेवकः राज्ञः प्रियः भवति ?

(5) प्राकृतिक-वेगविषये सेवकेन किं ध्यातव्यम् ?

**4. सामासिकपदानाम् परिचयं कारयत ।**

(1) अनृतम्

(2) असंशयम्

(3) आत्तशास्त्राणाम्

(4) अप्रमत्तः

(5) हास्यवस्तुषु

(6) मृदुपूर्वेण

**5. सन्धिविच्छेदं कुरुत ।**

(1) आरोहेत्संमतोऽस्मीति

(2) यत्नाच्चोपचरेदेनम्

(3) न चोष्ठौ निर्भुजेज्जातु

(4) चाचरेच्छनैः

(5) चाप्युन्मत्तवद्धसेत्

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) धौम्यः

(2) राजवसतिः

(3) मन्त्री

(4) सेवकः

(5) देववत् उपचारः

●

# 12. पम्पासरोवरः

वाल्मीकिना विरचितं रामायणं महाकाव्यं संस्कृतसाहित्ये सुप्रसिद्धम् अस्ति । संस्कृतसाहित्यम् अधीयानः न कोऽपि जनः स्यात् यदेनं न जानाति । अस्य खलु महाकाव्यस्य रचयिता साक्षात् ऋषिः वाल्मीकिः अस्ति, अतः इदं काव्यम् आर्षकाव्यत्वेन अपि ख्यातिप्राप्तम् अस्ति । अथ च लौकिकच्छन्दसा इदमेव सर्वप्रथमं काव्यं रचितमस्ति इतिकृत्वा संस्कृतसाहित्ये इदं काव्यम् आदिकाव्यत्वेन स्थितमस्ति अस्य रचयिता वाल्मीकिः च आदिकवित्वेन स्थितः अस्ति ।

रामायणे प्रमुखतः रामकथा वर्तते । अस्यां कथायां महर्षिणा कविप्रवरेण वाल्मीकिना प्रसङ्गतः विविधानां नगर-नदी-उद्यान-सरोवरादीनां विविधानां वृक्ष-पुष्प-लतादीनां वस्तूनां मनोहराणि वर्णनानि कृतानि सन्ति । रसिकाः तानि पाठं पाठं मोमुद्यन्ते । एतस्मात् कारणात् पाठकानां कृते इयं रामकथा सर्वदा रम्या प्रतीयते ।

रामायणे किष्किन्धाकाण्डे प्रथमसर्गे पम्पासरसः तत् परितः वर्तमानानां स्थानानां च विस्तरतः वर्णनमस्ति । यद्यपि वाल्मीकेः शोकमूलत्वं कवित्वमत्र प्रस्फुटितमस्ति, तेन इदं रमणीयं स्थानं संप्राप्य सीतावियोगदुःखितः रामः शोकाकुलः वर्णितः । तथापि रामस्य मनसि पम्पायाः शोभा शोभते इत्यपि वर्णितमत्र । संपादकैः तु अत्र केवलं पम्पासरोवरस्य सौन्दर्यं वर्णयन्ति कानिचित् पद्यानि संपाद्य संगृहीतानि सन्ति । अस्य वर्णनस्य पठनकाले छात्राः पशु-पक्षि-वृक्ष-लता-पुष्पादीनां नामतः अपि परिचिताः भविष्यन्ति ।

(सन्दर्भः - वाल्मीकिरामायणम्, किष्किन्धाकाण्डम्, प्रथमः सर्गः)

---

**सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् । यत्र राजन्ति शैलाभा द्रुमाः सशिखरा इव ॥ 1॥**

**पदच्छेदः** सौमित्रे (सम्बोधनम्) पश्य (दृश् लोट् म.पु.ए.व.) पम्पायाः (6.1) काननम् (2.1) शुभदर्शनम् (2.1) यत्र (अ.) राजन्ति (राज लट् अ.पु.ब.व.) शैलाभाः (1.3) द्रुमाः (1.3) सशिखराः (1.3) इव (अ.) ॥

**अन्वयः** (हे) सौमित्रे ! पम्पायाः शुभदर्शनं काननं पश्य । यत्र सशिखराः शैलाभाः इव द्रुमाः राजन्ति ॥

**पदार्थः** सौमित्रे ! (हे लक्ष्मण !) पम्पायाः शुभदर्शनं (शुभं दर्शनं यस्य तत्) काननं (वनम्) पश्य । यत्र (यस्मिन् पम्पा-परिसर-वर्तिनि कानने) शैलाभाः (पर्वताभाः) सशिखराः (शिखरेण सहिताः) इव (सदृशाः) द्रुमाः (वृक्षाः राजन्ति (भान्ति) ॥

**भावार्थः** रामः लक्ष्मणं संबोध्य कथयति - हे लक्ष्मण! त्वं पम्पायाः शुभदर्शनम् एतत् वनं पश्य । यस्मिन् पम्पा-परिसर-वर्तिनि वने शिखरवन्तः पर्वताः इव इमे द्रुमाः राजन्ति ॥

**मां तु शोकाभिसंतप्तमाधयः पीडयन्ति वै । भरतस्य च दुःखेन वैदेह्या हरणेन च ॥ 2॥**

**पदच्छेदः** माम् (2.1) तु (अ.) शोकाभिसंतप्तम् (2.1) आधयः (1.3) पीडयन्ति (पीड् लट् अ.पु.ए.व.) वै (अ.) भरतस्य (6.1) च (अ.) दुःखेन (3.1) वैदेह्याः (6.1) हरणेन (3.1) च (अ.) ॥

**पदार्थः** भरतस्य (तन्नामकस्य अनुजस्य) दुःखेन (मद्वियोगजनितस्य क्लेशस्य) च वैदेह्याः (सीतायाः) हरणेन (वियोगेन) च शोकाभिसंतप्तम् (शोकेन पीडितम्) माम् (रामम्) तु आधयः (मानसव्यथाः) वै पीडयन्ति (पीडितं कुर्वन्ति) ॥

**भावार्थः** पद्ये अस्मिन् रामः स्वीयां पीडां वक्ति - भरतस्य स्वीयानुजस्य राम-वियोगजनितस्य क्लेशेन, वैदेह्याः

हरणेन च उत्पन्नेन शोकेन पीडितं माम् (रामम्) मानसव्यथाः अपि पीडितं कुर्वन्ति ॥

**शोकार्त्तस्यापि मे पम्पा शोभते चित्रकानना । व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ॥ 3 ॥**
**नलीनैरपि संछन्ना ह्यत्यर्थशुभदर्शना । सर्पव्यालानुचरिता मृगद्विजसमाकुला ॥ 4 ॥**

**पदच्छेदः** शोकार्त्तस्य (6.1) अपि (अ.) मे (6.1) पम्पा (1.1) शोभते (शुभ लट् अ.पु.ए.व.) चित्रकानना (1.1) व्यवकीर्णा (1.1) बहुविधैः (3.3) पुष्पैः (3.3) शीतोदका (1.1) शिवा (1.1) ॥
नलीनैः (3.3) अपि (अ.) संछन्ना (1.1) हि (अ.) अत्यर्थशुभदर्शना (1.1) सर्पव्यालानुचरिता (1.1) मृगद्विजसमाकुला (1.1) ॥

**अन्वयः** (श्लोकद्वमेकान्वयि अस्ति । अतः उभयोः अन्वयः सहैव दीयते -) चित्रकानना बहुविधैः पुष्पैः व्यवकीर्णा, शीतोदका, शिवा, नलीनैः अपि संछन्ना, अत्यर्थशुभदर्शना, सर्पव्यालानुचरिता मृगद्विजसमाकुला पम्पा शोकार्त्तस्य अपि मे शोभते ॥

**पदार्थः** चित्रकानना (अनेकविधवनविशिष्टा) बहुविधैः (अनेकप्रकारकैः) पुष्पैः (कुसुमैः) व्यवकीर्णा (सर्वतः व्याप्ता), शीतोदका (शीतम् उदकं यस्याः सा), शिवा (कल्याणकारिणी), नलीनैः (कमलैः) अपि संछन्ना (भरिता), अत्यर्भशुभदर्शना (अतीव दर्शनीया), सर्पव्यालानुचरिता (सर्पैः व्यालैः - अजगरैः च अनुचरिता) मृगद्विजसमाकुला (पशु-पक्षिभिः पूरिता) पम्पा शोकार्त्तस्य (शोकेन दुःखितस्य) अपि मे (रमस्य) शोभते (सुखावहा वर्तते) ॥

**भावार्थः** पद्ये अस्मिन् रामस्य उद्गारः । चित्रकानना अर्थात् अनेकविधवनविशिष्टा पम्पा शोकेन दुःखितस्य अपि मम सुखावहा वर्तते । यतोहि सा बहुविधैः कुसुमैः व्याप्ता अस्ति । तस्यः उदकं शीतमस्ति । सा शिवा अस्ति । नलीनैः कमलैः संछन्ना अस्ति अतः एव सा अतीव दर्शनीया अस्ति । सर्पैः व्यालैः - अजगरैः च अनुचरिता, पशु-पक्षिभिः समाकुला च अस्ति ॥

**सौमित्रे पश्य पम्पायाश्चित्रासु वनराजिषु । नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥ 5 ॥**

**पदच्छेदः** सौमित्रे (सं.) पश्य (दृश् - पश्य् लोट् म.पु.ए.व.) पम्पायाः (6.1) चित्रासु (7.3) वनराजिषु (7.3) नलिनानि (2.3) प्रकाशन्ते (प्रकाश् लट् अ.पु.ब.व.) जले (7.1) तरुणसूर्यवत् (अ.) ॥

**अन्वयः** हे सौमित्रे पम्पायाः चित्रासु वनराजिषु तरुणसूर्यवत् जले नलिनानि प्रकाशन्ते ॥

**पदार्थः** हे सौमित्रे (अयि लक्ष्मण !) पम्पायाः चित्रासु (विविधासु) वनराजिषु (वृक्षेषु) तरुणसूर्यवत् (तारुण्यावस्थायां स्थितः भानुः इव) जले (सलिले) नलिनानि (कमलानि) प्रकाशन्ते (चकासते) ॥

**भावार्थः** (पम्पायाः परितः वर्तमानेषु) वनराजिषु पम्पायाः जले (वर्तमानानि) नलिनानि तरुण-सूर्यवत् प्रकाशन्ते - इति अत्र वर्णितम् ॥

**एषा प्रसन्नसलिला पद्मनीलोत्पलायता । हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ॥ 6 ॥**

**पदच्छेदः** एषा (1.1) प्रसन्नसलिला (1.1) पद्मनीलोत्पलायता (1.1) हंसकारण्डवाकीर्णा (1.1) पम्पा (1.1) सौगन्धिकायुता (1.1) ॥

**अन्वयः** एषा प्रसन्नसलिला पद्मनीलोत्पलायता हंसकारण्डवाकीर्णा सौगन्धिकायुता पम्पा (अस्ति) ॥

**पदार्थः** एषा (इयम्) प्रसन्नसलिला (प्रसन्नं सलिलम् यस्याः सा - बहु.), पद्मनीलोत्पलायता, (पद्मैः नीलोत्पलैः

च आयता - तृ.तत्पु.) हंसकारण्डवाकीर्णा (हंसैः कारण्डवैः च आकीर्णा - तृ.तत्पु.) सौगन्धिकायुता (सौगन्धिकैः आयुता - तत्पु.) पम्पा (अस्ति) ॥

**भावार्थः** अस्मिन् पद्ये पम्पायाः प्रसन्नसलिला, पद्मनीलोत्पलायता, हंसकारण्डवाकीर्णा, सौगन्धिकायुता - इति चतुर्भिः विशेषणैः वर्णनम् अस्ति ॥

**चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा । मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ॥ 7 ॥**

**पदच्छेदः** चक्रवाकयुता (1.1) नित्यम् (2.1) चित्रप्रस्थवनान्तरा (1.1) मातङ्गमृगयूथैः (3.3) नित्यं (2.1) शोभते (शुभ् लट् 1.1) ॥

**पदार्थः** (इयं पम्पा) चक्रवाकयुता (चक्रवाकनामकैः पक्षिभिः युता - तृ.तत्पु.) चित्रप्रस्थवनान्तरा (चित्रं प्रस्थवनम् अन्तरा यस्याः सा - बहु.) अस्ति, सा च) सलिलार्थिभिः (सलिलपानार्थ आगच्छद्भिः) मातङ्गमृगयूथैः मातङ्गानाम् मृगाणाम् च यूथैः) नित्यं (सदा) शोभते (शोभायमाना भवति) ॥

**भावार्थः** पम्पा चक्रवाकयुता चित्रप्रस्थवनान्तरा अत्र वर्णिता । सलिलार्थिभिः मातङ्गमृगयूथैः तस्याः शोभा सदा भवति - इत्यपि वर्णितमत्र ॥

**पद्मकेसरसंसृष्टो वृक्षान्तरविनिःसृतः । निःश्वास इव सीताया वाति वायुर्मनोहरः ॥ 8 ॥**

**पदच्छेदः** पद्मकेसरसंसृष्टः (1.1) वृक्षान्तरविनिःसृतः (1.1) पद्मकेसरसंसृष्टः (1.1) मनोहरः (1.1) वायुः (1.1) वाति (वा लट् 1.1) ॥

**पदार्थः** सीतायाः (रामस्य पत्न्याः) निश्वासः इव (श्वासवत्) वृक्षान्तरविनिःसृतः (वृक्षान्तरात् निःसृतः) पद्मकेसरसंसृष्टः (पद्मानां केसरैः संयुक्तः) मनोहरः (चेतोहारी) वायुः (पवनः) वाति (वहति) ॥

**भावार्थः** अस्मिन् पद्ये वायोः वर्णनम् अस्ति । रामः मनोहरे वायौ सीतायाः निश्वासस्य अनुभवं करोति इति कवेः कल्पना । अस्मिन् वर्णने कविना उपमालंकारः प्रयुक्तः ॥

**सौमित्रे पश्य पम्पाया दक्षिणे गिरिसानुनि । पुष्पितां कर्णिकास्य यष्टिं परमशोभनाम् ॥ 9 ॥**

**पदच्छेदः** सौमित्रे (सं.) पश्य (दृश् पश्य् लोट् म.पु.ए.व.) पम्पायाः (6.1) दक्षिणे (7.1) गिरिसानुनि (7.1) पुष्पिताम् (2.1) कर्णिकारस्य (6.1) यष्टिम् (2.1) परमशोभनाम् (2.1) ॥

**अन्वयः** हे सौमित्रे पम्पायाः दक्षिणे गिरिसानुनि कर्णिकारस्य पुष्पितां परमशोभनां यष्टिं पश्य ॥

**पदार्थः** हे सौमित्रे (अयि लक्ष्मण !) पम्पायाः (एतन्नामिकायाः नद्याः) दक्षिणे (दक्षिणस्यां दिशि) गिरिसानुनि (गिरेः सानुनि) कर्णिकारस्य पुष्पिताम् (कुसुमिताम्) परमशोभनाम् (अतीवसुन्दरीं) यष्टिं (दण्डं) पश्य ॥

**भावार्थः** अत्र सौमित्रं सम्बोध्य रामः तं पम्पायाः दक्षिणस्यां दिशि स्थितस्य गिरेः सानुनि पुष्पितां कर्णिकारस्य अतीवसुन्दरीं यष्टिं दर्शयति ॥

**अधिकं शैलराजोऽयं धातुभिस्तु विभूषितः । विचित्रं सृजते रेणुं वायुवेगविघट्टितम् ॥ 10 ॥**

**पदच्छेदः** अधिकम् (2.1) शैलराजः (1.1) अयम् (1.1) धातुभिः (3.3) तु (अ) विभूषितः (1.1) विचित्रम् (2.1) सृजते (सृज् लट् अ.पु.ए.व.) रेणुम् (2.1) वायुवेगविघट्टितम् (2.1) ॥

**अन्वयः** अयम् शैलराजः धातुभिः तु अधिकम् विभूषितः । (सः) वायुवेगविघट्टितम् विचित्रम् रेणुं सृजते ॥

**पदार्थः** अयम् (पम्पायाः दक्षिणस्यां दिशि स्थितः) शैलराजः (पर्वतः) धातुभिः (विविधैः खनीजैः पदार्थैः) तु अधिकम् (अतिशयम्) विभूषितः (अलङ्कृतः) अस्ति । (सः) वायुवेगविघट्टितम् (वायोः वेगेन यत् विघट्टितम् अस्ति तादृशम्) विचित्रम् (सविशेषम्) रेणुं (रजः) सृजते (जनयति) ॥

**भावार्थः** अस्मिन् श्लोके पम्पायाः दक्षिणस्यां दिशि स्थितस्य शैलराजस्य वर्णनम् अस्ति । सः धातुभिः विभूषितः अस्ति । अथ च तस्मात् वायुवेगविघट्टितं विचित्रं रेणुं सृजते – इत्यपि कल्पितम् अस्ति ॥

**गिरिप्रस्थास्तु सौमित्रे सर्वतः संप्रपुष्पितैः । निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः ॥ 11॥**

**पदच्छेदः** गिरिप्रस्थाः (1.3) तु (अ.) सौमित्रे (सम्बो) सर्वतः (अ.) संप्रपुष्पितैः (3.3) निष्पत्रैः (3.3) सर्वतः (अ.) रम्यैः (3.3) प्रदीप्ताः (1.3) इव (अ.) किंशुकैः (3.3) ॥

**अन्वयः** (हे) सौमित्रे ! गिरिप्रस्थाः सर्वतः संप्रपुष्पितैः (अत एव) निष्पत्रैः (विभूषिताः सन्ति) (अथ च) सर्वतः (च) रम्यैः किंशुकैः प्रदीप्ताः इव (सः दृश्यते) ॥

**पदार्थः** (हे) सौमित्रे ! (अयि लक्ष्मण !) गिरिप्रस्थाः (शैलप्रदेशाः) सर्वतः (चतुर्भ्यः दिग्भ्यः) संप्रपुष्पितैः (सम्यक् पुष्पितैः – पुष्पयुक्तैः) (अत एव) निष्पत्रैः (पत्रैः विहीनैः) (अत एव) रम्यैः (रमणीयैः) किंशुकैः (पलाशपुष्पैः) सर्वतः (चतुर्भ्यः दिग्भ्यः) प्रदीप्ताः (प्रज्वलिताः) इव (भान्तिः इति शेषः) ॥

**भावार्थः** हे लक्ष्मण ! गिरिप्रस्थाः सर्वतः संप्रपुष्पितैः अत एव पत्रैः विहीनैः वृक्षैः, अत एव रम्यैः पलाशपुष्पैः सर्वतः प्रदीप्ताः प्रज्वलिताः इव भान्ति ॥

**विविधा विविधैः पुष्पैस्तैरेव नगसानुषु । विकीर्णैः पीतरक्ताभाः सौमित्रे प्रस्तराः कृताः ॥ 12॥**

**पदच्छेदः** विविधाः (1.3) विविधैः (3.3) पुष्पैः (3.3) तैः (3.3) एव (अ.) नगसानुषु (7.3) विकीर्णैः (3.3) पीतरक्ताभाः (1.3) सौमित्रे (सम्बोधनम्) प्रस्तराः (1.3) कृताः (1.3) ॥

**अन्वयः** हे सौमित्रे ! नगसानुसु विविधैः तैः विकीर्णैः पुष्पैः एव विविधाः प्रस्तराः पीतरक्ताभाः विस्तीर्णाः कृताः (सन्ति) ॥

**पदार्थः** हे सौमित्रे ! (हे लक्ष्मण !) नगसानुषु (गिरिसानुषु) विविधैः (अनेकप्रकारकैः) तैः विकीर्णः (इतः ततः स्वयं पतितैः) पुष्पैः (कुसुमैः) विविधाः (अनेकविधाः) पीतरक्ताभाः (पीतेन रागेण रक्तेन रागेण च भासमानाः) प्रस्तराः (शय्याः) कृताः (सन्ति) (इति उत्प्रेक्षा) ॥

**भावार्थः** रामः लक्ष्मणं संबोध्य सौन्दर्यं वर्णयति – हे लक्ष्मण ! गिरिसानुषु अनेकप्रकारकैः ततः स्वयं पतितैः पुष्पैः पीतेन रागेण रक्तेन रागेण च भासमानाः प्रस्तराः अर्थात् शय्याः कृताः सन्ति इति प्रतीयते । (इति उत्प्रेक्षा) ।

**हिमान्ते पश्य सौमित्रे वृक्षाणां पुष्पसंभवम् । पुष्पमासे हि तरवः संघर्षादिव पुष्पिताः ॥ 13॥**

**पदच्छेदः** हिमान्ते (7.1) पश्य (दृश् लोट् म.पु.ए.व.) सौमित्रे सम्बोधनम्) वृक्षाणाम् (6.3) पुष्पसंभवम् (1.1) पुष्पमासे (7.1) हि (अ.) तरवः (1.3) संघर्षात् (5.1) इव (अ.) पुष्पिताः (1.3) ॥

**अन्वयः** हे सौमित्रे ! हिमान्ते पुष्पमासे हि तरवः संघर्षात् इव पुष्पिताः वृक्षाणां पुष्पसंभवं पश्य ॥

**पदार्थः** हे सौमित्रे ! (अयि अनुज लक्ष्मण !) हिमान्ते (शिशिरावसाने अर्थात् वसन्ते) पुष्पमासे (चैत्रे मासे) तरवः (वृक्षाः) हि (यतः) संघर्षात् (परस्पराभिभवेच्छया) इव पुष्पिताः (कुसुमिताः) सन्ति । (अतः एषां) वृक्षाणाम् (तरुणां) पुष्पसंभवम् (पुष्पसंपतिं पुष्पसमृद्धिं वा) पश्य ॥

**भावार्थः** अस्मिन् पद्ये रामः लक्ष्मणं वसन्ते पुष्पमासे परस्पराभिभवेच्छया इव ये वृक्षाः पुष्पिताः सन्ति तान् द्रष्टुं प्रेरयति ॥

**निरीक्षमाणः सहसा महात्मा**
**सर्वं वनं निर्झरकन्दरं च ।**
**उद्विग्नचेताः सह लक्ष्मणेन**
**विचार्य दुःखोपहतः प्रतस्थे ॥ 14॥**

**पदच्छेदः** निरीक्षमाणः (1.1) सहसा (अ.) महात्मा (1.1) सर्वम् (2.1) वनम् (2.1) निर्झरकान्दरम् (2.1) च (अ.) उद्विग्नचेताः (1.1) सह (अ.) लक्ष्मणेन (3.1) विचार्य (अ.) दुःखोपहतः (1.1) प्रतस्थे (प्र + स्था लिट् आत्मनेपदम् अ.पु.ए.व.) ॥

**अन्वयः** उद्विग्नचेताः (अत एव) दुःखोपहतः महात्मा (रामः) लक्ष्मणेन सह वनं निर्झरकन्दरं च सर्वं निरीक्षमाणः विचार्य सहसा प्रतस्थे ॥

**पदार्थः** उद्विग्नचेताः (सीतावियोगेन उद्विग्नं चेतः यस्य सः) (अत एव) दुःखोपहतः (दुःखेन उपहतः – व्याप्तः) महात्मा (रामः) लक्ष्मणेन सह वनम् (काननं) निर्झरकन्दरम् (स्त्रोतसम् कन्दरं) च सर्वं (निखिलं) निरीक्षमाणः (पश्यन्) (सीतान्वेषणं कर्तव्यम् अस्ति इति) विचार्य (चिन्तयित्वा) सहसा (अकस्मादेव) प्रतस्थे (प्रस्थानम् अकरोत्) ॥

**भावार्थः** अस्मिन् पद्ये रामस्य अग्रे प्रस्थानं वर्णितमस्ति । सीतावियोगेन उद्विग्नं चेतः यस्य सः रामः (अत एव) दुःखोपहतः सन् लक्ष्मणेन सह वनं निर्झरकन्दरं च निखिलं सौन्दर्यमयं स्थानं निरीक्षमाणः अधुना सीतायाः अन्वेषणं कर्तव्यम् अस्ति इति चिन्तयित्वा ततः सहसा प्रस्थानम् अकरोत् ॥

## स्वाध्यायः

1. **अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) सौमित्रः कः ?
(क) लक्ष्मणः (ख) राक्षसः (ग) मुनिः (घ) हनुमान्

(2) रामः कस्य दुःखेन पीडितः ।
(क) सीतायाः (ख) भरतस्य (ग) मुनेः (घ) सुग्रीवस्य

(3) शोकार्त्तस्यापि रामस्य का शोभते ?
(क) नगरी (ख) भूमिः (ग) सीता (घ) पम्पा

(4) जले नलीनानि क इव प्रकाशन्ते ?
(क) रत्नमिव (ख) सूर्य इव (ग) तरुणसूर्यवत् (घ) चन्द्रवत्

(5) पम्पायाः सलिलार्थिनः के सन्ति ?
(क) मातङ्गमृगयूथाः (ख) वनवासिनः (ग) जलचराः (घ) राक्षसाः

(6) शैलराजः वायुवेगविघट्टितं कं सृजते ?
(क) गन्धम् (ख) रेणुम् (ग) धातुम् (घ) सौन्दर्यम्

(7) प्रदीप्ता इव किंशुकैः के सन्ति ?
(क) आश्रमाः (ख) गिरिप्रस्थाः (ग) नदीतटाः (घ) प्रदेशाः

(8) पुष्पमासः कः ?
(क) पौषमासः (ख) कार्तिकमासः (ग) चैत्रमासः (घ) वैशाखमासः

**2. एकवाक्येन उत्तरं लिखत ।**

(1) पम्पायाः वर्णनं रामायणे कुत्र आगच्छति ?

(2) भरतस्य दुःखम् किम् अस्ति ?

(3) शोकार्त्तस्यापि कस्य पम्पा शोभते ?

(4) सौगन्धिकायुता का अस्ति ?

(5) वृक्षान्तरविनिःसृतः मनोहरः वायुः कीदृशः वर्णितः ?

(6) कर्णिकारस्य पुष्पिता यष्टिः पम्पायाः कस्मिन् भागे अस्ति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) किं नाम आधयः ? रामस्य आधयः के सन्ति ?

(2) शैलराजः कीदृशः अस्ति ? सः कं सृजति ?

(3) प्रस्तराः कीदृशाः वर्णिताः सन्ति ?

(4) अस्मिन् पाठे रामेण कति वारं लक्ष्मणः सम्बोधितः ?

(5) अन्तिमे पद्ये रामस्य विशेषणानि कानि कानि सन्ति ?

**4. सामासिकपदानां परिचयं कारयत ।**

(1) शुभदर्शनम्

(2) शोकाभिसन्तप्तम्

(3) शीतोदका

(4) सर्पव्यालानुचरिता

(5) पद्मनीलोत्पलायता

(6) परमशोभनाम्

(7) उद्विग्नचेताः

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) पम्पायाः काननम्

(2) रामस्य पीडा

(3) पम्पायाः विशेषणानि

(4) काननस्य प्रकृतिवर्णनम्

(5) रामायणम्

**6. पदानां परिचयं कारयत ।**

(1) सशिखराः

(2) सौमित्रिः

(3) आधयः

(4) व्यवकीर्णा

(5) प्रकाशन्ते

(6) निःश्वासः

(7) शैलराजः

(8) प्रतस्थे

# 13. मतिर्दोलायते सत्यम्

विचित्रः अयं संसारः । अत्र विविधं व्यवहरन्ति जनाः । सामान्यतस्तु यद्हृदि तद्वाचि, यद्वाचि तद्कर्मणि स्यादिति सज्जनानां रीतिः । परन्तु मानवाकृतिमन्तः सर्वत्र सज्जनाः न सन्ति । आकृत्या मानवस्य प्रतीतिं कारयन्तः केचन धूर्ताः मानवाः अपि जगति प्रवर्तन्ते । स्वीयान् बालान् पितरौ सज्जनानां सत्करणं प्रशिक्षयन्ति तथैव दुर्जनानाम् उपेक्षामपि शिक्षयन्ति । परं कः सज्जनः कश्च दुर्जनः इति केन प्रकारेण ज्ञायते इत्यपि प्रशिक्षणीयं भवति ।

एतस्मादेव कारणात् संस्कृतनीतिशास्त्रिणः स्वीये नीतिबोधे सज्जनदुर्जनयोः प्रभेदमपि उपदिशन्ति । अथ च केन प्रकारेण सज्जनाः अन्यान् उपकुर्वन्ति केन च प्रकारेण दुर्जनाः अन्यान् वञ्चयन्ति इत्यपि बोधयन्ति । विष्णुशर्माविरचिते पञ्चतन्त्रनामके सुप्रसिद्धे कथाग्रन्थे अधस्तनी एका कथा समागच्छति । अस्यां कथायां सज्जन-दुर्जनयोः मध्ये सामान्यस्य जनस्य मतिः केन प्रकारेण दोलयमाना भवति इति सम्यक्तया वर्णितमस्ति । वस्तुतः दोलायमानायां मतौ कदाचित् सज्जनपक्षानुसरणं भवति कदाचित् च दुर्जनपक्षानुसरणं भवति । यदि भाग्यवशात् सज्जनपक्षानुसरणं भवति चेत् लाभः भवति । परं यदि दुर्जनपक्षानुसरणं भवति चेत् हानिरेव जायते ।

अतः दुर्जनाः केन केन प्रकारेण वञ्चनं कुर्वन्ति, तथा च तेषां व्यवहारेण जनस्य मतिः केन प्रकारेण दोलायमाना भवति इति उपदेष्टुं कथा एषा छात्रैः अवश्यमवधेया अस्ति । अस्यां कथायां बहवः धूर्ताः संमिल्य वारं वारम् एकमेव असत्यवचनमुक्त्वा असत्यमपि सत्यत्वेन प्रतिष्ठाप्य एकं सज्जनं वञ्चयन्ति । अनया कथया बोधः स्वीकर्तव्यो भवति यत् दुर्जनैः वारं वारम् उक्तं स्यात् तदापि तत्सत्यं न भवतीति । अयं नीतिबोधः छात्राः अवगच्छन्तु इत्यर्थम् अत्र एषा कथा प्रस्तुता अस्ति ॥

---

अथ अन्तरस्थितेन अन्येन धूर्तेन तथैव उक्तम् । तत् आकर्ण्य ब्राह्मणः छागं भूमौ निधाय मुहुः निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिः चलितः । यतः -

**मतिः दोलायते सत्यं सताम् अपि खलोक्तिभिः ।**

**ताभिः विश्वासितः चासौ म्रियते चित्रकर्णवत् ॥ 1॥**

राजा आह - कथम् एतत् ?

सः कथयति -

(कथा 10)

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः । तस्य सेवकास्त्रयः काको व्याघ्रो जम्बुकश्च । अथ तैर्भ्रमद्भिः सार्थ-भ्रष्टः कश्चिदुष्ट्रो दृष्टः पृष्टश्च ''कुतो भवानागतः?'' सार्थाद्भ्रष्टः?

स चात्मवृतान्तम् अकथयत् । ततस्तैः नीत्वा सिंहायासौ समर्पितः । तेन चाभयवाचं दत्त्वा, चित्रकर्ण इति नाम कृत्वा स्थापितः ।

अथ कदाचित्सिंहस्य शरीर-वैकल्याद्भूरि-वृष्टि-कारणाच्चाहारम् अलभमानास्ते व्यग्रा बभूवुः । ततः तैरालोचितम्, चित्रकर्णम् एव यथा स्वामी व्यापादयति तथानुष्ठीयताम् । किम् अनेन कण्टक-भुजा अस्माकम् ?

**व्याघ्र उवाच** - स्वामिनाभयवाचं दत्वानुगृहीतोऽयं, तत्कथम् एवं सम्भवति ?

**काको ब्रूते** – इह समये परिक्षीणः स्वामी पापम् अपि करिष्यति । यतः –

**त्यजेत्क्षुधार्ता महिला स्वपुत्रं**
**खादेत्क्षुधार्ता भुजगी स्वमण्डम् ।**
**बुभुक्षितः किं न करोति पापं**
**क्षीणा नरा निष्करुणा भवन्ति ॥ 2॥**

अन्यच्च–

**मत्तः प्रमत्तश्चोन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।**
**लुब्धो भीरुस्त्वरा युक्तः कामुकश्च न धर्मवित् ॥ 3॥**

इति सञ्चिन्त्य सर्वे सिंहान्तिकं जग्मुः ।

**सिंहेनोक्तम्** – आहारार्थं किञ्चित्प्राप्तम् ?

**तैरुक्तम्** – देव ! यत्नादपि न प्राप्तं किञ्चित् ?

**सिंहेनोक्तम्** – कोऽधुना जीवनोपायः ?

**काको वदति** – देव ! स्वाधीनाहार–परित्यागात्सर्व–नाशोऽयम् उपस्थितः ?

**सिंहेनोक्तम्** – अत्राहारः कः स्वाधीनः ?

**काकः कर्णे कथयति** – चित्रकर्ण इति ।

सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । अब्रवीच्च – अभयवाचं दत्त्वा धृतोऽयम् अस्माभिः । तत्कथम् एवं सम्भवति ? तथा हि –

**न भूत-दानं न सुवर्ण-दानं**
**न गो प्रदानं न तथान्न-दानम् ।**
**यथा वदन्तीह महा-प्रदानं**
**सर्वेषु दानेष्वभय-प्रदानम् ॥ 4॥**

अन्यच्च–

**सर्व-काम-समृद्धस्य अश्वमेधस्य यत्फलम् ।**
**तत् फलं लभते सम्यग्रक्षिते शरणागते ॥ 5॥**

**काको ब्रूते** – नासौ स्वामिना व्यापादयितव्यः । किन्त्वस्माभिरेव तथा कर्तव्यम्, यथा सः स्व–देह–दानम् अङ्गीकरोति ।

सिंहस्तच्छ्रुत्वा तूष्णीं स्थितः । ततोऽसौ लब्धावकाशः कूटं कृत्वा सर्वानादाय सिंहान्तिकं गतः । अथ काकेनोक्तम् – देव ! यत्नादप्याहारो न प्राप्तः । अनेकोपवास–क्लिष्टश्च स्वामी । तदिदानीं मदीयमांसम् उपभुज्यताम् । यतः–

**स्वामि-मूला भवन्त्येव सर्वाः प्रकृतयः खलु ।**
**समूलेष्वपि वृक्षेषु प्रयत्नः सफलो नृणाम् ॥ 6॥**

**सिंहेनोक्तम्** – भद्र ! वरं प्राण–परित्यागो, न पुनरीदृशे कर्मणि प्रवृत्तिः ।

**जम्बुकेनापि तथोक्तम् ।**

**ततः सिंहेनोक्तम्** – मैवम् ।

**अथ व्याघ्रेणोक्तम्** – मद्देहेन जीवतु स्वामी ।

सिंहेनोक्तम् – न कदाचिदेवम् उचितम् ।

अथ चित्रकर्णोऽपि जात विश्वासः तथैवात्म-देह-दानम् आह ।

ततः तद् वचनात् तेन व्याघ्रेणासौ कुक्षिं विदार्य व्यापादितः । सर्वैर्भक्षितश्च । अतोऽहं ब्रवीमि – मतिर्दोलायते सत्यम् – इत्यादि ॥

## टिप्पणी

**शब्दार्थः** – छागम् – अजम्, दोलायते – दोलावत्/प्रेङ्खवत् आचरति, (मतिः विचलिता अस्थिरा भवति इत्यर्थः), सार्थात् – सार्थवाहात्/सङ्घात्, अनुष्ठीयताम् – आयोज्यताम्, ब्रूते – वदति, परिक्षीणः – दुर्बलः/कृशः, क्षुधार्ताः – बुभुक्षापीडिताः, भीरुः – कातरः (बीकण/डरपोक), भुजगी – सर्पिणी, व्यापादयितव्यः – मृत्युं प्रापणीयः/मारणीयः अङ्गकरोति – स्वीकरोति, सर्वान् आदाय – समस्तान् गृहीत्वा/नीत्वा, उपभुज्यताम् – खाद्यताम्, प्रकृतयः – प्रजाः, खलु – हि, नृणाम् – मनुष्याणाम्, मैवम् – नेत्थम्, कुक्षिम् – उदरम्/जठरम्, विदार्य – विशीर्य ।

**समासः** – खलोक्तिभिः – खलानाम् उक्तयः इति खलोक्तयः (ष. तत्पु.) ताभिः । कण्टकभुजा – कण्टकं भुनक्ति इति कण्टकभुक् (उपपदतत्पु.) तेन । स्वाधीनाहारपरित्यागात् – स्वम् अधीनः स्वाधीनः (द्वि. तत्पु.) स्वाधीनः च असौ आहारः इति स्वाधीनाहारः (कर्मधारयः) तस्य परित्यागः इति (ष. तत्पु.) तस्मात् । अनेकोपवासक्लिष्टः – न एके इति अनेके (नञ्तत्पु.) तैः अनेकैः उपवासैः क्लिष्टः (तृ. तत्पु.) । समूलेषु – मूलेन सह सन्ति इति समूलाः (वृक्षाः, बहुव्रीहिः) तेषु । स्वामिमूलाः – स्वामी मूले यासां ताः (बहुव्रीहिः) । आत्मदेहदानम् – आत्मनः देहस्य दानम् (ष. तत्पु.) ।

**सन्धिः** – मतिर्दोलायते – मतिः+दोलायते । कस्मिंश्चिद्वनोद्देशे – कस्मिन्+चित्+वन+उद्देशे । मदोत्कटः – मद+उत्कटः । तैरालोचितम् – तैः+आलोचितम् । अलभमानास्ते – अलभमानाः+ते । क्षुधार्ता – क्षुधा+आर्ता । प्रमत्तश्चोन्मत्तः – प्रमत्तः+च+उन्मत्तः । भीरुस्त्वरायुक्तः – भीरुः+त्वरायुक्तः । धृतोऽयम् – धृतः+अयम् । सम्यग्रक्षिते – सम्यक्+रक्षिते । किन्त्वस्माभिरेव – किन्तु+अस्माभिः+एव । यत्नादप्याहारो न – यत्नात्+अपि+आहारः+न । तदिदानीम् – तत्+इदानीम् ।

## स्वाध्यायः

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) सिंहस्य सेवकाः सन्ति–

(क) पञ्च (ख) अष्टौ (ग) त्रयः (घ) एषु नैकमपि

(2) चित्रकर्णः कः ?

(क) काकः (ख) व्याघ्रः (ग) सिंहः (घ) एषु नैकमपि

(3) त्यजेत् क्षुधार्तो .......... इति कः वदति ?

(क) उष्ट्रः (ख) व्याघ्रः (ग) सिंहः (घ) एषु नैकमपि

(4) सर्वेषु दानेषु ................ प्रदानम् महाप्रदानं वदन्ति

(क) भूत- (ख) सुवर्ण- (ग) अन्न- (घ) अभय-

(5) सम्यग् रक्षिते शरणागते किं लभते ?

(क) अभयदानम् (ख) सर्वकामम् (ग) अश्वमेधस्य फलम् (घ) एषु नैकमपि

(6) मद्देहेन जीवतु स्वामी इति कः वदति ?

(क) उष्ट्रः (ख) व्याघ्रः (ग) सिंहः (घ) एषु नैकमपि

**2. एकवाक्येन उत्तरं लिखत ।**

(1) अयं पाठः कस्मात् ग्रन्थात् गृहीतः अस्ति?

(2) मदोत्कट इति कस्य नामधेयम्?

(3) क्षुधार्ता महिला कं त्यजेत्?

(4) क्षीणाः नराः कीदृशाः भवन्ति?

(5) कोऽधुना जीवनोपायः इति कः वदति?

(6) सर्वाः प्रकृतयः किंमूलाः?

(7) कुक्षिं विदार्य कः व्यापादितः?

(8) चित्रकर्णः कैः भक्षितः?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) सार्थाद् भ्रष्टः कः? तस्य विषये सिहादयः किं विचारविमर्शं कृतवन्तः?

(2) मतिर्दोलायते सत्यं ........... इत्यस्य पूर्तिं कृत्वा सरलभावार्थः लेख्यः ।

(3) सर्वकामसमृद्धस्य ........... इत्यस्य पूर्तिं कृत्वा सरलभावार्थः लेख्यः ।

(4) अस्याः कथायाः बोधपाठः कः इति पाठानुसारं लेख्यम् ।

**4. कस्य पात्रस्य उक्तिः इति संदर्भः लेख्यः ।**

(1) स्वामिनाऽभयवाचं दत्वानुगृहीतोऽयम् ।

(2) आहारार्थं किञ्चित् प्राप्तम्?

(3) अभयवाचं दत्त्वा धृतोऽयमस्माभिः ।

(4) मद्देहेन जीवतु स्वामी ।

**5. श्लोकपूर्तिः कर्तव्या ।**

(1) त्यजेत् क्षुधार्ता महिला स्वपुत्रं .............. ।

(2) न भूतदानं न सुवर्णदानं ................ ।

(3) सर्वकामसमृद्धस्य ............... ।

**6. पाठात् कानिचित् सन्धेः 5 उदाहरणानि पूर्वपठितपाठाधारेण अन्विष्य लेख्यानि ।**

### शिक्षकप्रवृत्तिः

- पञ्चतन्त्रस्य कथानां चित्रप्रदर्शनं कारयेत् ।
- चञ्चलमतेः परिणामः कः भवति ? इति विविधोदाहरणैः उपदिशेत् ।
- रोचकप्रसङ्गयुक्ताः अन्याः पशुकथाः सरलया सुरगिरा कथयेत् ।

### छात्रप्रवृत्तिः

- मित्रताविषयकसुभाषितानि परस्परं स्पर्धात्मकेन अभिगमेन वदेयुः ।
- वचनपालनस्य महत्त्वविषये रामायणसंदर्भः ग्रहणीयः ।
- हितोपदेशात् अन्याः विश्वासघातसंबद्धाः कथाः पठेयुः ।

●

# 14. प्रसन्नराघवम्

उत्तमोत्तमनाट्यकारस्य भवभूतेः करुणरसपूर्णम् उत्तररामचरितम् मनसि निधाय करुणरसान्ते प्रसादवितरणार्थं विहिता प्रसन्नराघवम् नाट्यरचना । सीतायाः प्रत्यानयनात् प्रसन्नः प्रसादयुक्तः राघवः रामचन्द्रः, तम् अनुलक्ष्य रचितं नाटकम् इति शीर्षकार्थः ।

नाटकस्यास्य रचयिता, मिथिलावास्तव्यः कौण्डिन्यगोत्रोत्पन्नः सुमित्रामहादेवयोस्तनयः प्रमाणप्रवीणः कविवरो जयदेवोऽस्ति । ईस्वीयचतुर्दशशताब्द्यां जातेन कविराजविश्वनाथेन साहित्यदर्पणे प्रसन्नराघवस्थमेकं पद्यं ध्वनिनिरूपणे उदाहृतम्, अतः साहित्यदर्पणकारात् विश्वनाथात् पूर्वम् अर्थात् प्रायशः ई. 13 शताब्द्याम् अयं जयदेवः सञ्जात इति संस्कृतसाहित्येतिहासकाराणां परामृष्टं मतम् ।

संस्कृतनाट्यसाहित्ये कवेरस्य सप्ताङ्क–परिमिताया उत्कृष्टनाट्यरचनायाः समहत्त्वः सङ्क्षिप्तः परिचयः प्रदर्शितोऽस्ति ।

---

**पात्रसृष्टिः**

मुख्यानि पुरुषपात्राणि (1) सूत्रधारः (2) नटः (3) रामः (4) लक्ष्मणः (5) विश्वामित्रः (6) जनकः (7) शतानन्दः (8) दाल्भ्यायनः (9) ताण्ड्यायनः (10) परशुरामः (11–12) मञ्जीरकः नूपुरकः (13) रामः (14) बाणासुरः (15) सागरः (16) रत्नेश्वरः (17) सुग्रीवः (18) हनुमान् (19) माल्यवान् (20) विभीषणः इत्यादीनां सप्तविंशतेः (17) रुप्याणाम्, तेनैव क्रमेण अन्यपात्राणि (1) प्रधाननटः (2) सूत्रधारस्य सहायकः (3) अस्य नाटकस्य नायकः (8) रामानुजः (5) रामलक्ष्मणगुरुः (महर्षिः) (6) मिथिलानगर्याः राजा (सीतापिता) (7) जनकस्य पुरोहितः (8) याज्ञवल्क्यस्य शिष्यः (9) शतानन्दस्य शिष्यः (10) ऋषेः जमदग्नेः पुत्रः (11–12) स्तुतिपाठकौ (13) अस्य नाटकस्य प्रतिनायकः लङ्कपुर्याः अधिपतिः (14) दैत्यराजः (बलिराजस्य पुत्रः) (15) नदीनां पतिः (समुद्रः) (16) ऐन्द्रजालिकः (17) वानराधिपतिः (18) सुग्रीवस्य मन्त्री (19) रावणस्य मन्त्री (20) रावणस्य अनुजः इत्यादिरुपैः नटैः कलहंसादिभिः च रुपकम् इदम् अभिनीयते ।

मुख्यानि स्त्रीपात्राणि (1) सीता (2) गङ्गा (3) यमुना (4) सरयू (5) गोदावरी (6) तुङ्गभद्रा (7) त्रिजटा (8) मन्दोदरी (9) विद्याधरी (10) सखी इत्यादीनां दशानां रुप्याणाम्, तेनैव क्रमेण (1) अस्य नाटकस्य नायिका (रामपत्नी) (2, 3, 4, 5, 6) नद्यः (7) सीतासखी राक्षसी (8) रावणपत्नी (9) विद्याधरस्य पत्नी (10) चेटी इत्यादिरुपाभिः नटीभिः रुपकम् इदम् अभिनीयते ।

**वस्तुसारः**

आशीर्वादात्मकमङ्गलम्, शार्दूलविक्रीडीतम् इति वृत्तेन तच्च

**चत्वारः प्रथयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः**
**श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः पाणयः ।**
**भालेष्वब्जभुवो लिखन्ति युगपद् ये पुण्यवर्णावलीः**
**कस्तूरीमकरीः पयोधरयुगे गण्डद्वये च श्रियः ॥**

**पदच्छेदः** चत्वारः (1.3) प्रथयन्तु (लोट् 1.3) विद्रुमलतारक्ताङ्गुलिश्रेणयः (1.3) श्रेयः (2.1) शोणसरोजकोरकरुचः

(1.3) ते (1.3) शार्ङ्गिणः (6.1) पाणयः (1.3) । भालेषु (7.3) अब्जभुवः (6.1) लिखन्ति (लट् 1.3) युगपत् (अ.) ये (1.3) पुण्यवर्णावलीः (2.3) कस्तूरीमकरीः (2.3) पयोधरयुगे (7.1) गण्डद्वये (7.1) च (अ.) ये (1.3) (7.1) च (अ.) श्रियः (6.1) ॥

**अन्वयः** विद्रुमलतारक्ताङ्गलिश्रेणयः शोणसरोजकोरकरुचः शार्ङ्गिणः ते चत्वारः पाणयः श्रेयः प्रथयन्तु, ये युगपद् अब्जभुवः भालेषु पुण्यवर्णावलीः (तथा) श्रियः पयोधरयुगे गण्डद्वये च कस्तूरीमकरीः लिखन्ति ॥

**पदार्थः** – चत्वारः वेदसंख्याकाः प्रथयन्तु विस्तारयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः प्रवालस्य वल्लीवत् लोहितानां कराणां शाखानां पङ्क्तयः श्रेयः कल्याणम् शोणसरोजकोरकरुचः रक्तकमलस्य कलिकावत् कान्तुयुक्ताः ते त्ये शार्ङ्गिणः शार्ङ्गधनुर्धररस्य (विष्णोः) पाणयः हस्ताः । भालेषु ललाटेषु अब्जभुवः पद्मात् जातस्य ब्रह्मदेवस्य लिखन्ति चित्रयन्ति युगपत् एकस्मिन् एव काले ये उपरिष्टाद् वर्णिताः (प्रख्याताः) पुण्यवर्णावलीः सुकृतानाम् अक्षराणां पङ्क्तीः कस्तूरीमकरीः मृगनाभिद्वारा नक्राकृतीः पयोधरयुगे स्तनयुगले गण्डद्वये कपोलयुगले च तथा श्रियः लक्ष्म्याः ॥

**भावार्थः** – इह समानकाले एव ब्रह्मदेवस्य चतुर्षु ललाटेषु पुण्याक्षरलेखनम् अर्थात् यः सर्वस्य भाग्यविधाता अस्ति । तस्य भाग्यं शार्ङ्गधनुर्धारी भगवान् चतुर्भुजः लिखति तथा च स्वपल्याः अङ्गेषु कस्तूरिकाद्वारा मत्स्यसदृशं चित्रमपि आलिखिति। अत्र हस्तेन धनुर्धारणम् इति क्रूरतां दर्शयति तेनैव हस्तेन ललितायाः चित्रकलायाः रचनम् इति मृदुतां माधुर्यं च सूचयति । एतादृशा अनुरागस्य सूचकाः लोहितानाम् अङ्गुलीनां श्रेणिभिः युक्ताः रक्तकमलैः सदृशाः हस्ताः (अस्माकं युष्माकं नाटकस्य दर्शकानां वा) कल्याणं तन्वन्तु ।

प्रस्तावनानन्तरं प्रथमाङ्के स्तुतिपाठकद्वारा सीतास्वयंवरसूचना, रावणबाणासुरद्वारा आत्मश्लाघापूर्वकं वाचिकसङ्घर्ष इत्यादिवर्णनम् । द्वितीयाङ्कारम्भदृश्ये सीता सखीभिः सह उद्याने विहरति तदानीं रामलक्ष्मणौ पुष्पावचयार्थं तत्रागच्छतः सीतां द्रष्टुं च प्रथमम् अवसरं प्राप्नुतः । तृतीयाङ्के विश्वामित्रः स्वयंवरमण्डपं प्रविश्य रामलक्ष्मणयोः परिचयं प्रस्तौति तं श्रुत्वा सूर्यवंशजयोः राजकुमारयोः क्षत्रतेजोयुतं सौन्दर्यं च विलोक्य राजा जनकः शिवधनुषः उत्थापनप्रतिज्ञाविषये चिन्ताकुलो भवति। एतदन्तराले एव रामचन्द्रः पिनाकं सज्यं कुर्वाणः तं भञ्जयति । सानन्दं विवाहोत्सवः सम्पन्नो भवति ।

चतुर्थाङ्के जामदग्न्यस्य (परशुरामस्य) प्रसङ्गः वर्णितः अस्ति । रामचन्द्रेण सह तस्य वाक्कलहो भवति । प्रथमं तु ताण्ड्यायनः रावणमेव चापभञ्जकत्वेन निरूपयतिः, किन्तु ततः तथ्यं प्रकाशितं भवति । यदा जामदग्न्यः रामचन्द्रं पृच्छति तदा सरलतया स उत्तरतिः –

**मया स्पृष्टं न वा स्पृष्टं कार्मुकं पुरवैरिणः ।**
**भगवन्नात्मनैवेदमभज्यत करोमि किम्? ॥४/२१॥**

**पदच्छेदः** मया (3.1) स्पृष्टम् (1.1) न (अ.) वा (अ.) स्पृष्टम् (1.1) कार्मुकम् (1.1) पुरवैरिणः (6.1) । भगवन् ! (सम्बो.) आत्मना (3.1) एव (अ.) इदम् (1.1) अभज्यत (कर्मणि लङ् 1.1) करोमि (लट् 1.1) किम् (2.1/अ.) ॥

**अन्वयः** – पुरवैरिणः कार्मुकं मया स्पृष्टं न वा स्पृष्टम् । भगवन् ! इदम् आत्मना एव अभज्यत । किं करोमि ! ॥

**पदार्थः** – मया – अहम् (रामेण), स्पृष्टम् – स्पृष्टवान्, न – नो, वा – उत, स्पृष्टम् – हस्तसात्कृतवान्, कार्मुकम् – धनुः, पुरवैरिणः – त्रिपुरासुरस्य शत्रोः शिवस्य, भगवन् ! – प्रभो ! आत्मना – स्वयम्, एव – निश्चितम्, इदम् – एतत् अभज्यत – अखण्ड्यत, करोमि – विदधामि, किम् – किंस्वित् ॥

**भावार्थः** - रामः परशुरामं प्रति सविनयं कथयतिः - भगवन् ! मया अस्य शिवधनुषः (पिनाकस्य) स्पर्शः अकृतः इव कृतः तथापि इदं तु स्वयमेव भग्नम्... अहं किं करवाणि ? ॥

इदं श्रुत्वा जामदग्न्यः सक्रोधं कुठारम् (परशुम्) उत्थापयति । ततः जामदग्न्यस्य लक्ष्मणेन सह अपि वाणीविलासो भवति । रामेण वैष्णवधनुषः सन्धाने कृते चतुर्थाङ्कोऽयं सुखान्तः भवति ।

पञ्चमाङ्केः गङ्गा-यमुना-सरयूनदीनां संवादद्वारा रामवनवासस्य दशरथदेहान्तस्य च कथावस्तु वर्णितम् अस्ति । कलहंसः केवलं सीताहरणपर्यन्तां कथामेव श्रावयति ।

षष्ठाङ्के पत्नीविरहिणः रामस्य अतीव मार्मिकं पात्रं वर्णितम् अनुभूयते । हनूमान् लङ्का गच्छति तत्र सीता आत्मदाहार्थम् अशोकवृक्षम् अङ्गारं याचते इति पश्यति.... तस्मिन्नेव समये कपिवरः रामनामाङ्कितां मुद्रिकां क्षिपति ।

अन्तिमे च सप्तमाङ्के मन्त्रिणः माल्यवतः परिचारकः करालकः प्रथमं विभीषणादीनां कृत्यं वर्णयति । ततो विद्याधरयुगलं रामरावणयोर्युद्धं वर्णयति । रावणस्य मृत्युः भवति । सुग्रीव-विभीषणौ चन्द्रोदये जाते भूरि मनोहारिणीः कल्पनाः श्रावयतः। उपान्ते पुष्पकविमानम् आरुह्य पत्नीसहितः मित्रसहितः परिवारसहितः रामचन्द्रः अयोध्यां प्रयाति । अन्ते च भरतवाक्यम्।

इत्थं प्रसन्नराघवम् इति प्रसन्नादि प्रसन्नान्तं च नाटकम् । सङ्क्षेपतः कवये बालकाण्डम् अधिकम् रोचत इति प्रतिभाति । यतः चतुर्थाङ्क पर्यन्तं तत्सम्बन्धिनां प्रसङ्गानाम् अधिकता अनुभूयते । विप्रलम्भश्रृङ्गारः अस्य नाटककस्य मुख्यो रसः ।

मध्यकालीनस्य भक्तकवेः तुलसीदासस्य रामचरितमानसे अस्य नाटकस्य अधिकः प्रभावः दृश्यते । विशेषतः अत्र याः सूक्तयः ता एव यथा तत्र अनूदिताः इति प्रतिभाति ।

## स्वाध्यायः

1. **बहुविकल्पप्रश्नाः**

(1) इदं नाटकं कम् आधारीकृत्य रचितम्?

(क) महाभारतम् (ख) उत्तररामचरितम् (ग) रावणवधम् (घ) एषु नैकमपि ।

(2) भट्टिकाव्यम् अस्तिः -

(क) दृश्यकाव्यम् (ख) नाटकम् (ग) उन्मत्तराघवम् (घ) एषु नैकमपि

(3) अस्य नाटकस्य रचयिता कः अस्ति?

(क) विष्णुदेवः (ख) ब्रह्मदेवः (ग) महादेवः (घ) जयदेवः

(4) ध्वनिविषये प्रसन्नराघवस्य पद्यं कुत्र उदाहरणरूपेण वर्तते?

(क) रामायणे (ख) महाभारते (ग) साहित्यदर्पणे (घ) एषु नैकमपि

(5) अस्मिन् नाटके कति अङ्काः सन्ति?

(क) सप्त (ख) पञ्च (ग) षट् (घ) अष्टौ

(6) अस्य नाटकस्य मङ्गलाचरणम् अस्ति,

(क) वस्तुनिर्देशात्मकम् (ख) रसनिर्देशात्मकम् (ग) प्रसन्नात्मकम् (घ) एषु नैकमपि ।

(7) अत्र पुरुषपात्राणि सन्ति,

(क) सप्त (ख) अष्ट (ग) सप्तविंशतिः (घ) एषु नैकमपि

(8) मञ्जीरकः अस्ति ।

(क) ऐन्द्रजालिकः (ख) रावणमन्त्री (ग) याज्ञवल्क्यशिष्यः (घ) एषु नैकमपि ।

(9) रामचन्द्रकथनानुसारं शिवधनुः भग्नम्,

(क) रामचन्द्रेण (ख) रावणेन (ग) स्वयम् (घ) बाणासुरेण ।

(10) कस्मिन् अङ्के नदीनां संवादो भवति?

(क) सप्तमे (ख) पञ्चमे (ग) द्वितीये (घ) एषु नैकमपि ।

(11) कस्मिन् अङ्के हनुमान् लङ्कां गच्छति?

(क) सप्तमे (ख) पञ्चमे (ग) द्वितीये (घ) एषु नैकमपि ।

**2. परस्परं समन्वयः करणीयः ।**

| क | ख |
|---|---|
| (1) जामदग्न्यः | (1) प्रस्तावनायाम् |
| (2) रामरावणयुद्धम् | (2) तृतीयाङ्के |
| (3) बाणासुरः | (3) षष्ठाङ्के |
| (4) सीतायाः प्रथमदर्शनम् | (4) सप्तमाङ्के |
| (5) धनुर्भङ्गः | (5) अष्टमाङ्के |
| (6) राममुद्रिकाक्षेपणम् | (6) प्रथमाङ्के |
| | (7) द्वितीयाङ्के |
| | (8) चतुर्थाङ्के |

**3. एकैकवाक्यद्वारा उत्तराणि ( अतिलघूत्तराणि ) लेख्यानि ।**

(1) मङ्गलाचरणं कस्मिन् वृत्ते?

(2) शार्ङ्गिणः अर्थात् किम्?

(3) जामदग्न्यः कः?

(4) इदं तु स्वयमेव भग्नम् इति कः कथयति?

(5) पुरवैरिणः इत्यस्य विभक्तिपरिचयः कः?

(6) कुठारः इत्यस्य कः पर्यायवाची शब्दः?

(7) कवये कतमत् काण्डम् अतीव रोचते?

(8) सूक्तिविषये कवेः अनुसरणं केन भक्तकविना कृतम् इति प्रतिभाति?

**4. सन्दर्भसहितं भावार्थो लेख्यः**

(1) चतुर्थाङ्कस्य अन्तः ।

(2) आत्मदाहार्थम् अङ्गारयाचना ।

**5. सविस्तरम् उत्तरं लेख्यम् ।**

(1) संस्कृतसाहित्ये दृश्यश्रव्यकाव्यानि ।

(2) नाटकेऽस्मिन् स्त्रीपात्राणि ।

**6. सूचनानुसारं लेख्यम् ।**

(1) कस्तूरीमकरी: (पदपरिचयो लेख्य:)

(2) ये (पदपरिचयो लेख्य:)

(3) पाणय: (समानार्थी लेख्य:)

(4) बाणासुर: (पात्रपरिचयो देय:)

(5) रावणमन्त्री (नाम लेख्यम्)

(6) रामानुज: (पात्रस्य नाम लेख्यम्)

(7) भालेष्वब्जभुव: (सन्धि: विच्छेद्य:)

**शिक्षकप्रवृत्ति:**

- शिक्षका: रामचरितमानसात् सूक्तिसम्बन्धिन्य: चौपाई वर्णयेयु: ।

  * प्रसन्नराघवे मुख्यानि सुभाषितानि :-
- आकारेणैव चतुरास्तर्कयन्ति परेङ्गितम् । गर्भस्थं केतकीपुष्पमामोदेनेव षट्पदा: ॥ 1.8 ॥
- चन्द्रे च रामचन्द्रे च नारीणाञ्च दृगञ्चले । नीलोत्पलसुहृत्कान्तौ कस्य नाऽऽमोदते मन: ॥ 1.10 ॥
- वार्ता च कौतुकवती विमला च विद्या लोकोत्तर: परिमलश्च कुरङ्गनाभे: ।

  तैलस्य बिन्दुरिव वारिणि दुर्निवारमेतत्त्रयं प्रसरति स्वयमेव भूमौ ॥ 2.2 ॥
- एतादृशानि अन्यानि पद्यानि वर्णयेयु: ।

**छात्रप्रवृत्ति:**

- पदपरिचयार्थं तुलनात्मकाभिगमेन यत्नं कुर्यु: ।
- उत्तररामचरितविषयकपाठात् अस्य नाटकस्य प्रसङ्गानां भिन्नतां जानीयु: ।

●

# 15. चौरस्यात्मसमर्पणम्

बृहति अस्मिन् संस्कृतसाहित्ये नीतिशास्त्रं महत्त्वपूर्णं स्थानं भजते । नीतिः अस्माकं जीवनयापनार्थम् अतीव उपयोगिनी भवति । नीतिशास्त्रे प्रविणाः आचार्याः शुक्राचार्य-विदुर-चाणक्यादयोऽस्माभिः संस्मर्यन्ते । एते स्पष्टतया विविधाः नीतयः निरूपितवन्तः । गच्छता कालेन केचन अल्पबुद्धयः जनाः अभवन् येषां कृते स्पष्टा नीतिः आचार्यप्रतिपादिता अपि कष्टेन बोधप्रदा अभवत् । तदर्थं नीतिसिद्धान्तान् कथासु संयोज्य सरलशैल्या रसप्रदरीत्या च नीतिज्ञानं प्रसारयितुम् आरब्धम् आचार्यैः । अतः संस्कृते नीतिकथासाहित्यस्य उदयः सञ्जातः । नीतिकथासङ्ग्रहेष्वपि पं.विष्णुशर्मा तथा नारायणपण्डितः इमौ द्वौ अतीव प्रसिद्धिमवाप्तवन्तौ । पं. विष्णुशर्मणः पञ्चतन्त्रेण प्रभावितः सन् नारायणपण्डितः हितोपदेशं निर्मितवान् ।

नारायणपण्डितस्य आश्रयदाता बङ्गप्रदेशस्य राजा धवलचन्द्रः आसीत् । नेपालतः हितोपदेशस्य हस्तलेखः 1373 ईसवीये वर्षे प्राप्ता । अतः तस्मात् पूर्वम् हितोपदेशस्य रचनाकालः मन्यते । प्रायः विद्वांसः अस्य कालम् एकादश-द्वादशशताब्द्यां मन्यन्ते ।

हितोपदेशे 41 कथाः तथा 679 पद्यानि सन्ति । एतैः पद्यैः एताभिः कथाभिश्च पूर्वाचार्याणां नीतिसिद्धान्ताः सरलसरसतया प्रतिबोधिताः सन्ति । अस्य ग्रन्थस्य चत्वारः भागाः सन्ति - मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः च । अस्मिन् पाठे हितोपदेशस्य एका नीतिकथा सरलसुगमभाषया छात्रेभ्यः प्रदत्ता वर्तते ।

---

अथ एकस्मिन् नगरे कश्चित् विद्वान् परन्तु पूर्वजन्मयोगेन चौरः विप्रः निवसति स्म । सः तस्मिन् नगरे एकदा अन्यनगरात् आगतान् चतुरः ब्राह्मणान् अपश्यत् । तान् ब्राह्मणान् अनेकानि वस्तूनि विक्रीणतः दृष्ट्वा चौरविप्रः अचिन्तयत् अहो ! एते बहु-धनवन्तः सन्ति । केन उपायेन अहम् एतेषां धनं प्राप्नोमि ? इत्थं विचार्य सः विप्रः तेषां पुरतः अनेकानि मधुरवचनानि जल्पन्, तेषां ब्राह्मणानां मनसि विश्वासं च उत्पाद्य सेवां कर्तुम् आरब्धवान् । उक्तं च -

**असती भवति सलज्जा क्षारं नीरं च शीतलं भवति ।**

**दम्भी भवति विवेकी प्रियवक्ता भवति धूर्तजनः ॥**

**भावार्थः** - चारित्र्यहीना स्त्री अधिकां लज्जां करोति । क्षारं जलं अधिकं शीतलं भवति । दम्भी जनः अधिकं विवेकं प्रकटयति तथा दुष्टः जनः अत्यन्तं प्रियं वदति ।

तदनन्तरं ते ब्राह्मणाः सर्वाणि वस्तूनि विक्रीय बहुमूल्यानि रत्नानि क्रीतवन्तः । रत्नानि क्रीत्वा ते ब्राह्मणाः चौरविप्रस्य समक्षम् एव तानि रत्नानि जङ्घामध्ये प्रक्षिप्तवन्तः । रत्नानां रक्षार्थमेतम् उपायं कृत्वा ते ब्राह्मणाः स्वदेशं प्रति गन्तुम् उद्यताः अभवन् । तान् गन्तुकामान् दृष्ट्वा चौरविप्रः व्यग्रमनसा अचिन्तयत् - अहो ! मया किञ्चिदपि धनं न प्राप्तम् । अहम् एभिः सह गच्छामि, मध्यमार्गे विषं दत्वा एतान् निहत्य धनं ग्रहीष्यामि इत्थं विचार्य सः तेषां पुरतः सकरुणं विलपन् अवदत् भो मित्राणि ! माम् एकाकिनं मुक्त्वा भवन्तः गन्तुम् उद्यताः । भवतां वियोगनाम्ना एव मम मनः आकुलं जातं, कुत्रापि धैर्यं न धरति । मयि अनुग्रहं विधाय माम् अपि सहायभूतं मत्वा सहैव नयन्तु इति । एतत् श्रुत्वा करुणया आर्द्रचित्ताः ते ब्राह्मणाः तेन सह स्वदेशं प्रति प्रस्थितवन्तः ।

मार्गे गच्छतः तान् दृष्ट्वा काकाः उच्चैः अवदन् रे किराताः ! धावत धावत । सपादलक्ष-रूप्यकाणां स्वामिनः गच्छन्ति । तान् निहत्य धनं नयत । काकानां वचनम् आकर्ण्य किराताः सत्वरं गत्वा लगुडप्रहारैः तान् विप्रान् जर्जरीकृत्य सूक्ष्मतया अवलोकितवन्तः किन्तु किञ्चिदपि धनं न प्राप्तम् । तदा ते किराताः अवदन् - भोः पान्थाः ! पूर्वं कदापि एते काकाः असत्यं

नोक्तवन्तः । भवतां सन्निधौ धनमस्ति तत् अर्पयन्तु अन्यथा सर्वेषामपि वधं कृत्वा, चर्म विदार्य, सर्वाङ्गं प्रेक्ष्य धनं नेष्यामः इति । किरातानाम् एतादृशं वचनम् आकर्ण्य सः चौरविप्रः मनसि अचिन्तयत् – यदा एते किराताः विप्राणां वधं कृत्वा अङ्गं विलोक्य रत्नानि प्राप्स्यन्ति तदा अरत्नं मामपि वधिष्यन्ति अतः पूर्वमेव अहम् आत्मानम् अरत्नं समर्प्य एतान् मुञ्चामि यतो हि उक्तम् ।

**मृत्योर्बिभेषि किं बाल ! न स भीतं विमुञ्चति ।**

**अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥**

**भावार्थः** – मृत्योः भयं किमर्थम् ? यः मृत्योः बिभेति, मृत्युः तम् अपि न मुञ्चति । अद्य अथवा केभ्यश्चित् वर्षेभ्यः अनन्तरं सर्वेषां मृत्युः भवत्येव ।

तथा इदमपि उक्तम् –

**गवार्थे ब्राह्मणार्थे च प्राणत्यागं करोति यः ।**

**सूर्यस्य मण्डलं भित्त्वा स याति परमां गतिम् ॥**

**भावार्थः** यः गवां कृते ब्राह्मणानां च कृते प्राणान् समर्पयति सः सूर्यस्य मण्डलं भित्वा परमां गतिं लभते ।

इत्थं साधु विचार्य सः विप्रः अवदत् – भोः किराताः! यदि एवमस्ति, पूर्वं मां निहत्य विलोकयत । किराताः तं निहत्य, तस्य चर्म विदार्य धनरहितं दृष्ट्वा अन्यान् चतुरः ब्राह्मणान् मुक्तवन्तः । एवं रीत्या चौरविप्रः आत्मसमर्पणेन अन्यविप्राणां रक्षाम् अकरोत् ।

## टिप्पणी

**शब्दार्थः** – पूर्वजन्मयोगेन – पूर्वजन्मफलेन, विक्रीणतः – विक्रयणं व्यापारं कुर्वतः, जल्पन् – वदन्, असती – चारित्र्यहीना स्त्री, दम्भी – पाखण्डी, धूर्तजनः – लम्पटः, दुष्टः, गन्तुकामान् – गन्तुम् इच्छायुक्तान्, निहत्य – मारयित्वा, विलपन् – विलापं कुर्वन्, अनुग्रहः – कृपाकटाक्षः, आर्द्रचिताः – करुणायुक्तचेतसः, लगुडप्रहारैः – दण्डप्रहारैः, जर्जरीकृत्य – अस्वस्थीकृत्य, सन्निधौ – समीपम्, प्रेक्ष्य – अवलोक्य, आकर्ण्य – श्रुत्वा, अब्दशतान्ते – वर्षशतान्ते, साधु – सम्यक् ।

## स्वाध्यायः

1. **अधोलिखितप्रश्नानाम् एकैकवाक्येन उत्तरं लिखत ।**

(1) नगरे कः निवसति स्म ?

(2) अन्यनगरात् कति विप्राः आगतवन्तः ।

(3) चौरविप्रः ब्राह्मणानां पुरतः कीदृशानि वचनानि उक्तवान् ?

(4) कीदृशं नीरं शीतलं भवति ?

(5) ब्राह्मणाः कुत्र रत्नानि प्रक्षिप्तवन्तः ?

(6) केषां वचनं श्रुत्वा किराताः आगतवन्तः ?

(7) कः आत्मसमर्पणं कृतवान् ?

**2. द्वि-त्रिवाक्यैः उत्तराणि लिखत ।**

(1) चौरः विप्रः ब्राह्मणान् दृष्ट्वा किम् अचिन्तयत् ?

(2) गन्तुकामान् ब्राह्मणान् प्रति चौरः विप्रः किम् अवदत् ?

(3) ब्राह्मणान् दृष्ट्वा काकाः किम् उक्तवन्तः ?

(4) मृत्युविषये चौरविप्रः किं चिन्तयति ?

**3. टिप्पणीं लिखत ।**

(1) चौरविप्रस्य आत्मसमर्पणकारणम् ।

(2) ब्राह्मणानां गमनकाले चौरस्य विचाराः ।

**4. पदानां विभक्तिं वचनं च लिखत ।**

(1) सलज्जा

(2) प्रियवक्ता

(3) ब्राह्मणाः

(4) वियोगनाम्ना

(5) माम्

(6) मार्गे

(7) विप्रान्

(8) मृत्योः

●

# 16 भक्तस्य चातुर्यम्

बुद्धिर्यस्य बलं तस्य, न हीङ्गितज्ञोऽवसरेऽवसीदति अर्थात् यः इङ्गितम्-उचितावसरं चेष्टाविहीनस्य अभिप्रायं वा जानाति सः योग्ये अवसरे प्राप्ते सति निश्चयेन उद्यमं करोति अवसरस्य पूर्णतया लाभं च गृह्णाति ।इत्यादिषु अनन्तासु संस्कृतसुभाषितरूपासु आकाशगङ्गासु अगणितासु सूक्तितारासु कथारत्नकणिकासु च काश्चन रजःकणरूपाः चकासति ।

प्रस्तुते पाठे कस्यचित् अन्धस्य भक्तस्य कथायाः माध्यमेन कया रीत्या बुद्धिमान् मनुष्यः, आपाततः वामनावतारवत् स्वल्पकायेनापि एकेन वाक्येन त्रैलोक्यवत् सर्वस्वं प्राप्तुं शक्नोति इति बोधकथायाः माध्यमेन प्रस्तुतम् अस्ति । उक्तं च पातञ्जलमहाभाष्ये ''एकः शब्दः सुष्ठुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके च कामधुग् भवति।''

भक्तस्य भक्तेः च विषये अस्मिन् पाठ्यपुस्तके अपरः अपि पाठः अस्ति तस्य सन्दर्भः ग्रहणीयः ।

---

कल्याणपुरम् इत्याख्ये कस्मिंश्चित् ग्रामे दिव्यदृष्टिनामकः एकः अन्धः दरिद्रः पत्नीपुत्रसहितः विष्णुभक्तः प्रतिवसति स्म । तस्य कण्ठे कोकिलस्वरवत् मधुरता आसीत् । प्रतिदिनं सः विविधानि भजनगीतानि स्तोत्राणि कर्णप्रियैः उद्गायति स्म । सः एकस्मिन् एकेन हस्तेन करतालं धृत्वा द्वितीयेन, कन्धरे वस्त्रोपनद्धां स्वरमञ्जूषाम् उद्धृत्य अग्रे सरतः विनयनामकस्य यूनः पुत्रस्य स्कन्धम् अवलम्ब्य समीपस्थं देवमन्दिरं गत्वा समागतान् ग्रामजनान् सन्तवाणी माध्यमेन विविधाः ध्रुवा गीतीः भजनानि च गापयित्वा भक्तिरसेन आप्लावितान् करोति स्म ।

यष्टिम् एव दृष्टिं मन्वानः कदाचित् एकाकी अपि स्खलत्पदः देवालयं परितः गृहमन्दिरपूजार्थं तुलसीपत्राणि अवचेतुं गच्छति ।

दर्शनार्थिभिः दयया प्रदीयमानः पुरस्कारः एव तस्य आजीविका भवति स्म । प्राप्तं फलान्नादिकं प्रभुप्रसादरूपेण स्वीकृत्य पत्नीपुत्राभ्यां सहितः जीवननिर्वाहं करोति स्म ।

यावत् प्रभुकृपया लब्धं तेनैव सन्तुष्टः सः यदृच्छालाभसन्तुष्टः कदापि भगवन्तं प्रभो ! मह्यम् इदं देहि, तद् देहि, कथं माम् अन्धं कृतवान्........ ? इत्येतादृशं परीवादं न करोति स्म । केवलं श्रद्धापूर्वकं प्रभुभक्तिम् एव करोति स्म । किन्तु तस्य पत्नी प्रियंवदा तं वारं वारं कञ्चित् उद्यमं करोतु, पुत्रस्य विनयस्य विवाहं कथं करिष्यति ! आवाभ्यां दायित्वं वोढव्यं भवति!! इत्यादिभिः वाक्यैः तं जाग्रतं कर्तुं प्रयत्नं कृतवती ।

तदा दिव्यदृष्टिः उत्तरति, भाग्यवति ! प्रभुः सर्वं जानाति, सर्वं पश्यति, सर्वं श्रृणोति च । तेन भक्तेभ्यः वचनं दत्तम् अस्ति यत् ''योगक्षेमं वहाम्यहम्'' इति । यदि वयं पुत्रार्थं यत्नं करिष्यामः चेत् सः (प्रभुः) चिन्तां न करिष्यति । अतः धैर्यं धृत्वा प्रभौ श्रद्धां बद्ध्वा भक्तिं कुरु । परमात्मा स्वभक्तान् स्वाभिमुखीकर्तुमनाः एव कष्टम् उत्पादयति परीक्षां च करोति.... किन्तु एकवारम् अवश्यमेव कृपादृष्टिवृष्टिं कृत्वा शुभावसरं यच्छति... इति ।

एवं गच्छत्सु दिवसेषु पुत्रः विनयः अपि विवाहयोग्यः भवति स्म । तथापि दिव्यदृष्टिः तु ''त्वमेव केवलं कर्तासि । त्वमेव सर्वं धर्तासि । त्वमेव सर्वं हर्तासि...'' इति भावनया पूर्णश्रद्धया प्रभुसेवापरः एव अभवत् ।

भक्तस्य परीक्षानन्तरमनाः एकदा दिव्यदृष्टेः अपेक्षानुसारं प्रभुणा कृपादृष्टिः कृता । भावेन भक्त्या सन्तुष्टः भूत्वा साक्षात् तस्मै वरदानाय आगत्य कथयति, वत्स, दिव्यदृष्टे ! तव भक्त्या अहं प्रसन्नः । किन्तु वत्स ! केवलम् एकमेव वरं याचस्व।

तदानीम् अहोभावेन सगद्गदम् अन्धेन दिव्यदृष्टिना कथितम्, ''धन्योऽस्मि, अनुगृहीतोऽस्मि... प्रभो! तव दर्शनं प्राप्य सन्तुष्टः.... कृतार्थश्च; भगवन्! मम जीवनं तु सार्थकमेव । तथापि पतित्वेन पितृत्वेन च मम यत् शास्त्रोक्तं सप्तपद्यां पूर्वप्रतिज्ञातं कर्तव्यम् अस्ति तत्परिपालयितुम् त्वाम् एकमेव वरं याचे ।'' प्रभुः कथयति ''याचस्व वत्स यथेच्छम् एकं वरं याचस्व।''

अधुना अन्धः दिव्यदृष्टिः किञ्चिदिव विचार्य ('च' रहितं) वरं याचते यत्;

''प्रभो! अहं प्रियंवदया (पत्न्या) सह मदीयस्य चतुरट्टालिकस्य हर्म्यस्य चतुर्थाट्टे स्वर्णशृङ्खलान्दोलितं प्रेङ्खपर्यङ्कम् आरूह्य मालां कुर्वाणः पत्न्या सह पौत्रं भोजयन्तं विनयं दृश्यासम् ।''

प्रभुः अपि तस्मै समन्दस्मितं ''तथाऽस्तु'' इत्युक्त्वा अन्तर्हितः । दिव्यदृष्टिः यथायाचनं सौख्यम् भुक्तवान् । सः भक्तः आसीत् अतः संयमेन पौत्रपर्यन्तम् एव सौख्यं याचितवान् अन्यथा अन्यत् बहु बहु चिरजीवित्वं पृथिवीराज्यादिकं याचितुम् अशक्ष्यत्; किन्तु परमात्मनः साक्षात्कारेण एव स जीवन्मुक्तः सञ्जातः ।

सखायः! अस्माभिः स्वयमेव विचारणीयं यत् अन्धेन दिव्यदृष्टिना किं किं याचितम् इति । परन्तु बालानाम् अध्ययनम् एव तपः। अध्ययनम् एव भक्तिः अस्ति । अतः विद्यार्थिभिः आजीविकाचिन्ता न करणीया अपि तु सद्विद्याचिन्तनं करणीयम् ।।

**टिप्पणी**

इङ्गितज्ञः – इङ्गितं–शरीराङ्गमुद्राभाषां जानाति इति । अवसरे – कार्यकाले (लक्ष्मीः तिलकं कुर्तुम् आगच्छेत् तदा मुखप्रक्षालनं कर्तुं न गन्तव्यम्)। अवसीदति – निषीदति / प्रमादेन उपविष्टः भवति / निष्क्रियः भवति । आपाततः – उपरि उपरिष्टात् । त्रैलोक्यवत् – भूः भुवः स्वः इति त्रिलोकी । (सर्व–) स्वम् – सम्पत्तिः / एश्वर्यम् / धनम् । पातञ्जलमहाभाष्ये– पाणिनिमुनिना विरचितायाः सूत्राष्टाध्याय्याः उपरि पतञ्जलिमुनिना महाभाष्यं लिखितम् अस्ति । सुष्ठु – चारु । कामधुक्– इच्छानुरूपं फलदायी (कामान् दोग्धि) । कर्णप्रियैः – श्रुतिमधुरैः । उद्गायति – उच्चैः गायति । करतालम् – करमञ्चीरकवाद्यम्। कन्धरे – स्कन्धे। वस्त्रोपनद्धाम् – पटच्चरेण बद्धाम् । स्वरमञ्जूषाम् – सभस्त्रिकस्वरपेटिकाम् । उद्धृत्य – उत्थाप्य । सरतः शनैः चलतः । यूनः – युवकस्य । अवलम्ब्य – आलम्बनं / आधारं गृहीत्वा । ध्रुवा – ध्रुवपङ्क्तीः (धून इति भाषायाम्)। गापयित्वा – अनुगानं कारयित्वा । आप्लावितान् – तल्लीनान् / निमग्नान् । यष्टिम् – लगुडम् / दण्डम् । स्खलत्पदः – रिङ्गितचरणः / पतनभयात् असमतुलगतिः । अवचेतुम् – त्रोटयितुम् । यदृच्छालाभसन्तुष्टः – प्रभोः इच्छानुसारं यत् लब्धं तेन सन्तोषं मन्वानः । परीवादम् – कुत्साम् / अपवादम् / प्रतारणाम् । दायित्वम् – कर्तव्यम् / उत्तरदायित्वम् । वोढव्यम्– वहनीयम् / पालनीयम् इति यावत् । उत्तरति – प्रतिवदति / प्रत्युत्तरं यच्छति । भाग्यवति! – पत्न्याः कृते प्राचीनं सम्बोधनम् इदम् 'सौभाग्यवति!' इत्यर्थः । योगक्षेमम् – अप्राप्तस्य प्रापणं योगः; प्राप्तस्य रक्षणं क्षेमः (कृष्णः कथयति; ममाश्रितस्य पार्श्वे यत् नास्ति तत् तस्मै ददामि तथा च यत् प्राप्तम् अस्ति तस्य रक्षणमपि अहमेव करोमि । स्वाभिमुखीकर्तुम् – (विक्षिप्तचित्तान् आत्मानं प्रति एकाग्रान् / कर्तुम् । गच्छत्सु दिवसेषु – यदा दिवसाः गताः तदा । संवृत्तः – संभूतः / स्थितः (परिवर्तितो न जातः) । साक्षात् – प्रत्यक्षम् । वरम् – वरदानम् इति सरलार्थः । सगद्गदम् – कण्ठरोधेन अस्पष्टाक्षरम् (भावाश्रुपूर्णत्वात्) । धन्यः – बहुमानपात्रम् । अनुगृहीतः – उपकृतः । कृतार्थः – धर्मः अर्थः कामः मोक्षः च इति चत्वारः पुरुषार्थः मया लब्धाः । सप्तपद्याम् – विवाहसंस्कारे 'सप्तपदी' वरकन्ययोः सप्त पर्वतरूपाणि प्रतिज्ञावाक्यानि भवन्ति । परिपालयितुम् – पूर्णतया रक्षणार्थम् । वत्स! – (अत्र) पुत्र! (अन्यत्र) धेनोः पोतकः । किञ्चिदिव – स्वल्पं (क्षणं यावत्)

यथा। 'च' रहितम् - अन्यथा वरद्वयं स्यात् । मदीयस्य - अस्माकं स्वामित्वेन युक्तस्य । चतुरट्टालिकस्य - यस्मिन् निकेतने चत्वारः अट्टाः तस्य । हर्म्यस्य - प्रासादस्य/महद्भवनस्य । चतुर्थाट्टे - तुरीये सुतले । स्वर्णशृङ्खलान्दोलितम्- हेममयनिगडैः दोलायमानम् । प्रेङ्खपर्यङ्कम् - खट्वा/पल्यङ्क एव हिन्दोलकः तम् । आरूढः - अधिष्ठितः (अत्र) उपविश्य दोलायमानः । पौत्रम् - पुत्रस्य पुत्रम् । दृश्यासम् - विलोक्यासम् (आशीर्वादग्रहणार्थम् अयं प्रयोगः । पश्येयम् इति सरलार्थः)। समन्दस्मितम् - स्वल्पं स्मयमानः (दन्तप्रदर्शनरहितं हास्यं कुर्वाणः इति सरलार्थः) । अन्तर्हितः - तिरोहितः/अदृश्यः जातः। अशक्ष्यत् - समर्थः अभविष्यत् । सखायः - मित्राणि ।

**स्वाध्यायः**

**1. बहुविकल्पप्रश्नाः ।**

(1) दिव्यदृष्टिः कः अस्ति?

(क) कल्याणभक्तः (ख) बधिरः भक्तः (ग) वामनः भक्तः (घ) एषु नैकमपि ।

(2) भक्तस्य कण्ठस्वरः केन तुल्यः आसीत्?

(क) मयूरेण (ख) गर्दभेन (ग) भजनेन (घ) एषु नैकमपि ।

(3) हस्ते 'करतालं' कः धरति?

(क) विनयः (ख) प्रियंवदा (ग) नारायणः (घ) एषु नैकमपि ।

(4) स्वरमञ्जूषां कः उत्थापयति?

(क) दिव्यदृष्टिः (ख) दर्शनार्थिनः (ग) प्रभुः (घ) विनयः ।

(5) दिव्यदृष्टिः कस्य देवस्य भक्तः?

(क) गणपतेः (ख) वामनस्य (ग) शिवस्य (घ) एषु नैकमपि ।

(6) ''तव दर्शनं प्राप्य सन्तुष्ट....'' इति कः वदति?

(क) नारायणः (ख) विनयः (ग) भगवान् (घ) एषु नैकमपि ।

(7) 'योगक्षेमं वहाम्यहम्' इति कस्य वचनम् कः वदति?

(क) पितुः वचनं पुत्रः (ख) पुत्रस्य वचनं पिता (ग) पत्न्याः वचनं पतिः (घ) एषु नैकमपि ।

(८) दिव्यदृष्टिना स्वस्य महाभवने कति अट्टालिकाः याचिताः?

(क) षट् (ख) सप्त (ग) अष्टौ (घ) एषु नैकमपि ।

(9) 'वत्स' इत्यस्य अपरः अर्थः कः?

(क) श्वानबालः (ख) सिंहबालः (ग) धेनुबालः (घ) एषु नैकमपि ।

**2. परस्परं समन्वयः करणीयः।**

| **वरवाक्यांशाः** | **सूचिता प्राप्तिः** |
|---|---|
| (1) अहं पत्न्या सह | (1) भक्तिः |
| (2) मदीयस्य चतुरट्टालिकस्य हर्म्यस्य | (2) नेत्रे (दृष्टिः) |

| | | | |
|---|---|---|---|
| (3) | सुवर्णशृङ्खलान्दोलितं | (3) | सन्ततिः साम्मनस्यं च |
| (4) | प्रेङ्खपर्यङ्कम् आरूढः | (4) | पुत्रविवाहः |
| (5) | पत्न्या सह विनयं | (5) | स्वास्थ्यम् |
| (6) | पौत्रं भोजयन्तं | (6) | धनं सम्पत्तिः च |
| (7) | दृश्यासम् | (7) | बृहद्भवनस्वामित्वम् |
| (8) | मालां कुर्वाणः | (8) | आयुष्यं सौभाग्यं च |
| (9) | (प्रभुसाक्षात्कारेण) | (9) | (मुक्तिम्) |

**3. एकैकवाक्यद्वारा उत्तराणि ( अतिलघूत्तराणि ) लेख्यानि ।**

(1) दिव्यदृष्टेः पत्न्याः नामधेयं किम् ?

(2) विनयः कः ?

(3) दिव्यदृष्टिः कस्य भक्तः ?

(4) भक्तः एकाकी कुत्र गच्छति ?

(5) दिव्यदृष्टिः अन्यत् किं किं याचितुम् अशक्ष्यत् ?

(6) बालानां कृते भक्तिः का ?

(7) विद्यार्थिभिः किं करणीयम् ? किं न करणीयम् ?

(8) प्रसन्नेन भगवता भक्ताय कति वराणि दत्तानि ?

**4. सन्दर्भसहितं भावार्थो लेख्यः ।**

(1) ''आवाभ्यां दायित्वं वोढव्यं भवति...''

(2) ''परमात्मा स्वभक्तान् स्वाभिमुखीकर्तुम् एव कष्टम् उत्पादयति ।''

(3) ''त्वमेव केवलं कर्तासि''

(4) ''तथाऽस्तु''

**5. सविस्तरम् उत्तरं लेख्यम् ।**

(1) दिव्यदृष्टेः जीवननिर्वाहः ।

(2) प्रियंवदायाः चिन्ता ।

(3) दिव्यदृष्टिना याचितं वरम् ।

**6. सूचनानुसारं लेख्यम् ।**

(1) शरीराङ्गमुद्राभाषां जानाति (शब्दसमूहार्थम् एकः शब्दः देयः)

(2) सप्तपदी (विवरणं लेख्यम्)

(3) अन्तर्हितः (समानार्थी लेख्यः)

(4) निकेतनम् (समानार्थी लेख्यः)

(5) पौत्रः (विवरणं देयम्)

(6) पाठस्थयोः द्वयोः वाद्ययन्त्रयोः नाम लेख्यम् ।

**शिक्षकप्रवृत्तिः**

- पूर्वकक्षासु पठितानां सुभाषितानाम् अनुसन्धानपूर्वकं परस्परं स्पर्धात्मकाभिगमम् उत्पादयेत् ।
- पाठान्ते बोधं दातुम् अधो लिखितम् इव इति ईदृशानि, उद्यमविषयकाणि च सुभाषितानि स्मारयेत् ।

  सद्विद्या यदि का चिन्ता वराकोदरपूरणे ।

  शुकोऽप्यशनमाप्नोति रामरामेति च ब्रुवन् ॥
- पौराणिककथानां सन्दर्भं गृह्णीयात् । (वामनबलिराजयोः कथा कथनीया) ।
- सङ्गीतविषये अभिरुचियुताः छात्राः भजनगायनार्थं प्रोत्साहनीयाः ।

**छात्रप्रवृत्तिः**

- चातुर्यविषये अन्याः कथाः कथयेयुः ।
- अभिनयार्थं प्रयत्नं कुर्युः ।

●

# 17. अन्योक्तय:

संस्कृतसाहित्ये अलङ्काराणां विशिष्टं स्थानमस्ति । अलङ्कारस्य त्रय: प्रकारा: भवन्ति शब्दालङ्कारा: अर्थालङ्कारा: उभयालङ्काराश्च । अर्थालङ्कारेषु अप्रस्तुतप्रशंसाया: विशेषं स्थानं वर्तते । अप्रस्तुतप्रशंसाया: एव अपरं नाम अन्योक्ति: । तल्लक्षणं यथा - अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया । का. प्र. 10.98

क्वचित् विशेष: सामान्यात् सामान्यं वा विशेषत: ।

कार्यान्निमित्तं कार्यं च हेतोरथ समात्समम् ॥

अप्रस्तुतात् प्रस्तुतं चेद् गम्यते पञ्चधा तत: ।

अप्रस्तुतप्रशंसा स्यात् ॥ सा. द. 10. 58-59

काव्यप्रकाशे, साहित्यदर्पणे च अस्यालङ्कारस्य पञ्च भेदा: निरूपिता: सन्ति । सामान्यरूपेण कथ्यते चेत् यस्य वर्णनं कविना क्रियते, तद्व्याजेन अप्रस्तुततस्य अन्यस्य वर्णनं भवति सा अन्योक्ति: । अन्यं प्रति उक्ति: अन्योक्ति: ।

अन्योक्ते: प्रयोग: कविभि: भूरिश: क्रियते । कवि: यावत् अन्योक्तिं न प्रयुङ्क्ते तावत् तत्कवित्वं न सिद्धयति । जगन्नाथादय: विद्वांस: कवय: अन्योक्ते: बाहुल्येन प्रयोगं कृतवन्त: । अस्मिन् पाठे विविधानां कवीनाम् उत्तमा: अन्योक्तय: सरसशैल्या प्रदत्ता: सन्ति ।

---

**कर्णे कर्ण विधीयतां मम वचो यत्रापि कुत्रापि सन्**
**इन्द्रं कुण्डलवर्मयाचनरतं मोहान्धपुत्रेषणम् ।**
**तं दानैस्त्वमतोषयस्तदपि नो नष्टा समस्या यत**
**इन्द्रा: सन्ति गृहे गृहे परमहो नैकोऽपि कर्णो भुवि ॥ 1॥**

**पदच्छेद:** कर्णे (7.1) कर्ण (संबोधनम्) विधीयताम् (लोट् प्र. पु. ए. व.) मम (6.1) वच: (1.1) यत्र (अ.) अपि (अ.) कुत्र (अ.) अपि (अ.) सन् (1.1) इन्द्रम् (2.1) कुण्डलवर्मयाचनरतम् (2.1) मोहान्धपुत्रेषणम् (2.1) तम् (2.1) दानै: (3.3) त्वम् (1.1) अतोषय: (लङ् म. पु. ए. व.) तदपि (अ.) नो (अ.) नष्टा (1.1) समस्या (1.1) यत: (अ.) इन्द्रा: (1.3) सन्ति (लट् प्र. पु. ब. व.) (7.1) गृहे (7.1) परम् (अ.) अहो (अ.) न (अ.) एक: (1.1) अपि (अ.) कर्ण: (1.1) भुवि (7.1)

**अन्वय:** हे कर्ण ! यत्रापि कुत्रापि सन् मम वच: कर्णे विधीयताम्, त्वं तं मोहान्धपुत्रेषणं कुण्डलवर्मयाचनरतम् इन्द्रं दानै: अतोषय: तदपि समस्या नो नष्टा, यत: इन्द्रा: गृहे गृहे सन्ति परम् अहो ! एक: अपि कर्ण: भुवि न ।

**पदार्थ:** हे कर्ण ! हे राधेय, यत्रापि कुत्रापि सन् - यत्र कुत्रापि वर्तमान: मम - कवे:, वच: वचनम्, कर्णे - श्रवणविषये, विधीयताम् - क्रियताम् । त्वम् - कर्ण: तम् - पुरा याचनार्थं समागतम्, मोहान्धपुत्रेषणम् - पुत्रप्रेमान्धम्, कुण्डलवर्मयाचनरतम् - कर्णाभरणं कवचं य याचमानम्, इन्द्रम् - देवराजम्, दानै: कवचकुण्डलदानेन्, अतोषय: - सन्तोषितवान, तदपि - तथापि, समस्या नो नष्टा - समस्या नष्टा न जाता,

यतः – कारणम्, इन्द्राः – याचकाः, गृहे गृहे – प्रतिगृहम्, सन्ति – वर्तन्ते, परम् – किन्तु, अहो – कष्टम्, एकः अपि कर्णः – दानवीरः, भुवि – जगति, नास्ति – न विद्यते ।

**भावार्थः** कर्णस्य दानवीरतां प्रशंसमाणः कविः कथयति हे कर्ण ! त्वं यत्र कुत्रापि वर्तसे, मम वचनं शृणु, पुरा पुत्रप्रेमान्धं देवराजम् इन्द्रं कवच-कुण्डलदानेन त्वं सन्तुष्टं कृतवान् तथापि समस्या न नष्टा । यतो हि इन्द्रसदृशाः याचकाः तु गृहे गृहे सन्ति, कर्णसदृशः दाता जगति नास्ति ।

**विशेषार्थः** कविः अत्र इन्द्रकर्णयोः प्रसङ्गद्वारा कथयति यत् पुरा अपि, इदानीमपि याचकानाम् अभावः नास्ति । इन्द्रः यथा पुत्रमोहान्धः कर्णं याचितवान् तथा अद्यापि मोहान्धाः इन्द्रसदृशाः लुब्धाः वर्तन्ते । कर्णः तदा दानम् अकरोत् तथापि समस्या तु तथैव वर्तते यतो हि याचकाः गृहे गृहे सन्ति, दाता कुत्रापि नास्ति अथवा दुर्लभः अस्ति इति भावः ।

**भुक्ता मृणालपटली भवता निपीता-**
**न्यम्बूनि यत्र नलिनानि निषेवितानि ।**
**रे राजहंस वद तस्य सरोवरस्य**
**कृत्येन केन भवितासि कृतोपकारः ॥ 2 ॥**

**पदच्छेदः** भुक्ता (1.1) मृणालपटली (1.1) भवता (3.1) निपीतानि (1.3) अम्बूनि (1.3) यत्र (अ.) नलिनानि (1.3) निषेवितानि (1.3) रे (अ.) राजहंस (सं. ए. व.) वद (लोट् म्. पु. ए. व.) तस्य (6.1) सरोवरस्य (6.1) कृत्येन (3.1) केन (3.1) भवितासि (लुट् म. पु. ए. व.) कृतोपकारः (1.1)

**अन्वयः** रे राजहंस ! – रे मरालश्रेष्ठ ! यत्र – यस्मिन् सरोवरे, भवता मृणालपटली – विसराशिः, भुक्ताः आस्वादिता, अम्बूनि – जलानि, निपीतानि – रसितानि, पीतानि, नलिनानि – कमलानि, निषेवितानि – उपभुक्तानि, तस्य सरोवरस्य – कासारश्रेष्ठस्य, केन कृत्येन – केन विशिष्टेन कर्मणा, कृतोपकारः – विहितोपकृतिः उपकारकः भवितासि – वर्तिष्यसे ? वद – ब्रूहि ।

**भावार्थः** चिरकालं यावत् एकस्मिन् एव सरोवरो सुखेन निवसन्तं राजहंसं प्रति कविः कथयति – हे राजहंस ! यत्र च भूयः जलं पीतवान्, यत्र कमलानि च उपभुक्तवान्, तस्य सरोवरस्य उपकारं भवान् कथं करिष्यति ? इति वदतु ।

**विशेषार्थः** राजहंसं प्रति एतादृशैः वचनैः कविः कथयति, वस्तुतः तत् कथनं मनुष्यान् प्रति वर्तते । यत्र मनुष्याः सुखेन भोजनादिकं सर्वं प्राप्नुवन्ति, आनन्देन च तत्रत्यानि वस्तूनि उपयुञ्जते, तस्य स्थानविशेषस्य कृते केन कर्मणा उपकारकाः भवितुं शक्नुवन्ति ? तादृशस्य स्थानस्य उपकारः महता अपि कर्मणा भवितुं न शक्यते अतः तत्स्थानं प्रति सदा निष्ठया भाव्यम् इति भावः ।

**पङ्कज पङ्कलग्नेन शशाङ्काङ्को विलोक्यते ।**
**स्वीयं पङ्कं विलोक्यादौ ततो म्लानं मुखं कुरु ॥ 3 ॥**

**पदच्छेदः** पङ्कज (सं. ए. व.) पङ्कलग्नेन (3.1) शशाङ्कअङ्कः (1.1) विलोक्यते (लट् प्र. पु. ए. व.) स्वीयम् (2.1) पङ्कम् (2.1) विलोक्य (अ.) आदौ (अ.) ततः (अ.) म्लानम् (2.1) मुखम् (2.1) कुरु (लोट् म. पु. ए. व.)

**अन्वयः** हे पङ्कज! पङ्कलग्नेन (त्वया) शशाङ्काङ्कः विलोक्यते । आदौ स्वीयं पङ्क विलोक्य ततः मुखं म्लानं कुरु ।

**पदार्थः** हे पङ्कज! हे सरसिज! पङ्कलग्नेन – पङ्कमग्नेन, त्वया शशाङ्काङ्कः – चन्द्रकलङ्कः विलोक्यते – अवलोक्यते, स्वीयम् – स्वशरीरलग्नम्, पङ्कम्, आदौ – प्रथमम्, विलोक्य – अवलोक्य, ततः – तत्पश्चात्, मुखम् – वदनम्, म्लानम् – खिन्नम् कुरु ।

**भावार्थः** हे कमल! तव शरीरं पङ्के मग्नम् अस्ति तथापि त्वं चन्द्रमसः कलङ्कं पश्यसि । पूर्वं स्वशरीरलग्नं पङ्कं पश्य, ततः मुखं खिन्नं कुरु । चन्द्रस्य कलङ्के एव दृष्टिं न स्थापय, स्वस्य शरीरे लग्नं पङ्कमपि पश्य इति भावः ।

**विशेषार्थः** केचन जनाः अन्येषामेव दोषान् पश्यन्ति, स्वस्य दोषेषु तेषां दृष्टिः न भवति । तादृशान् जनान् प्रति कविः वदति यत् अन्येषां दोषान् अपश्यन्तः पूर्वं स्वस्य दोषान् पश्यन्तु, ततः स्वमुखमपि म्लानं कुर्वन्तु – स्वदोषान् दृष्ट्वा मुखं खिन्नं कुर्वन्तु इति भावः ।

**कमलिनि मलिनीकरोषि चेतः**
**किमिति बकैरवहेलितानभिज्ञैः ।**
**परिणतमकरन्दमार्मिकास्ते**
**जगति भवन्तु चिरायुषो मिलिन्दाः ॥4॥**

**पदच्छेदः** हे कमलिनि (सं. ए. व.) मलिनीकरोषि (लट् म. पु. ए. व.) चेतः (2.1) किमिति (अ.) बकैः (3.3) अवहेलिता (1.1) अनभिज्ञैः (3.3) परिणतमकरन्दमार्मिकाः (1.3) ते (6.1) जगति (7.1) भवन्तु (लोट् प्र. पु. ए. व.) चिरायुषः (1.3) मिलिन्दाः (1.3)

**अन्वयः** हे कमलिनि ! अनभिज्ञैः बकैः अवहेलिता (सती) किमिति चेतः मलिनीकरोषि ते परिणतमकरन्दमार्मिकाः मिलिन्दाः जगति चिरायुषः भवन्तु ।

**पदार्थः** हे कमलिनि – हे नलिनि ! अनभिज्ञैः – अज्ञानिभिः, बकैः बकपक्षिभिः अवहेलिता – तिरस्कृता, चेतः – हृदयम्, किमिति – किमर्थम्, मलिनीकरोषि – दुःखी करोषि, परिणतमकरन्दमार्मिकाः – परिपक्वमकरन्दसुज्ञाः ते – तव, मिलिन्दाः – मधुकराः, जगति – संसारे, चिरायुषः – दीर्घायुषः, भवन्तु – सन्तु ।

**भावार्थः** बकैः तिरस्कृतां कमलिनीं प्रति कविः वदति हे कमलिनि ! एते बकाः अज्ञानिनः सन्ति । तैः तिरस्कृता त्वं हृदयं दुःखिनं न कुरु । तव परिपक्वस्य मकरन्दरसस्य ज्ञातारः मधुकराः सन्ति । ते मधुकराः तव महत्त्वं जानन्ति अतः ते चिरकालं यावत् जीवन्तु इति ।

**विशेषार्थः** अज्ञानिनः पुरुषाः श्रेष्ठस्य श्रेष्ठतां न जानन्ति । अतः श्रेष्ठैः हृदयं खिन्नं न कर्तव्यम् । ये जनाः तेषां श्रेष्ठतां जानन्ति ते दीर्घायुषः भवन्तु, बकसदृशेषु जनेषु ध्यानं न दातव्यम् इति ।

**याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां**
**गन्ता कं प्रति पान्थसन्ततिरसौ सन्तापमालाकुला ।**
**एवं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते**
**धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः ॥5॥**

**पदच्छेदः** याते (7.1) मयि (7.1) अचिरात् (अ.) निदाघमिहिरज्वालाशतैः (3.3) शुष्कताम् (2.1) गन्ता (लुट् प्र. पु. ए. व.) कम् (2.1) प्रति (अ.) पान्थसन्ततिः (1.1) असौ (1.1) सन्तापमालाकुला (1.1) एवम् (अ.) यस्य (6.1) निरन्तराधिपटलैः (3.3) नित्यम् (अ.) वपुः (1.1) क्षीयते (लट् प्र. पु. ए. व.) धन्यम् (1.1) जीवनम् (1.1) अस्य (6.1) मार्गसरसः (6.1) धिक् (अ.) वारिधीनाम् (6.3) जनुः (1.1)

**अन्वयः** निदाघमिहिरज्वालाशतैः मयि अचिरात् शुष्कतां याते (सति) सन्तापमालाकुला असौ पान्थसन्ततिः कं प्रति गन्ता? एवं निरन्तराधिपटलैः यस्य वपुः क्षीयते अस्य मार्गसरसः जीवनं धन्यम्, वारिधीनां जनुः धिक् ।

**पदार्थः** निदाघमिहिरज्वालाशतैः - ग्रीष्मकालीनातपशतैः, मयि अचिरात् - शीघ्रम्, शुष्कतां याते - क्षीणतां याते सति सन्तापमालाकुला - तीव्रतापाकुला, असौ - इयम्, पान्थसन्ततिः - पान्थपङ्क्तिः कं प्रति गन्ता? - कं प्रति गमिष्यति ? एवम् - इत्थं विचार्य, निरन्तराधिपटलैः - सततं दुःखैः यस्य वपुः - शरीरम्, क्षीयते - क्षयं प्राप्नोति, अस्य - एतादृशस्य, मार्गसरसः - मार्गे स्थितस्य कासारस्य, जीवनं धन्यम् - प्रशंसनीयम्, श्रेष्ठम्, वारिधीनाम् - समुद्राणाम्, जनुः जन्म, उत्पत्तिः धिक् - निन्दायोग्या अस्ति इति भावः ।

**भावार्थः** ग्रीष्मर्तौ सूर्यातपैः मयि शुष्के जाते सति एते सन्तापग्रस्ताः पथिकाः कुत्र यास्यन्ति ? इत्थं विचार्य दुःखैः यस्य शरीरं नित्यं क्षीणं भवति तस्य सरोवरस्य जीवनं धन्यम्, समुद्रजलं पातुं न योग्यम् अतः तस्य जन्म धिक्कारयोग्यम् एव ।

**विशेषार्थः** जगति केचन वैभवशालिनोऽपि समाजस्य कृते अनुपयुक्ताः भवन्ति । केचन दरिद्राः सन्तोऽपि समाजस्य महोपकारं कुर्वन्ति । ये दरिद्राः सन्तोऽपि अन्येषाम् उपकारार्थं विचारयन्ति, परोपकारकुर्वन्ति तेषां जीवनं धन्यम्, तद्विपरीतानां वैभवशालिनाम् अनुपयुक्तानां जन्म निरर्थकम् इति तात्पर्यम् ।

**रे रे शङ्कर नीलकण्ठ यदि नो रौद्राकृतिर्जायसे**
**किञ्चिन्मामकमानसस्थवचनं वच्मीति वाञ्छालवः ।**
**वीत्या वारिधिकालकूटमधुना रिक्तं गलान्तः कुरु**
**संसारे विषवर्धनं प्रतिपलं बोभूयते मानुषम् ॥6॥**

**पदच्छेदः** रे रे (अ.) शङ्कर (सं. ए. व.) नीलकण्ठ (सं. ए. व.) यदि (अ.) नो (अ.) रौद्राकृतिः (1.1) जायसे (लट् म. पु. ए. व.) किञ्चित् (अ.) मामकमानसस्थवचनम् (2.1) वच्मि (लट् उ. पु. ए. व.) इति (अ.) वाञ्छालवः (1.1) वीत्या (3.1) वारिधिकालकूटम् (2.1) अधुना (अ.) रिक्तम् (2.1) गलान्तः (अ.) कुरु (लोट् म. पु. ए. व.) संसारे (7.1) विषवर्धनम् (1.1) प्रतिपलम् (अ.) बोभूयते (लट् प्र. पु. ए. व.) मानुषम् (1.1)

**अन्वयः** रे रे शङ्कर! नीलकण्ठ! यदि रौद्राकृतिः न जायसे (तर्हि) मामकमानसस्थवचनं किञ्चित् वच्मि इति वाञ्छालवः (अस्ति) । अधुना गलान्तः वारिधिकालकूटं वीत्या रिक्तं कुरु (यतोहि) संसारे प्रतिपलं मानुषं विषवर्धनं बोभूयते ।

**पदार्थः** रे रे शङ्कर ! – शिव !, नीलकण्ठ ! – विषय, यदि रौद्राकृतिः – क्रोधाकृतिः, न जायसे – न भवसि तर्हि मामक – मानसस्थवचनम् – मम हृदयस्थितं वचनम्, किञ्चित् वच्मि – ब्रवीमि इति वाञ्छालवः – इच्छालवः काचित् वाञ्छा अस्ति । अधुना – सम्प्रति, गलान्तः – कण्ठस्य अन्तः वारिधिकालकूटम् – समुद्रमथनोत्थितं विषम्, वीत्या – प्रसूत्या, वमनेन, रिक्तम् – कुरु, यतोहि संसारे – जगति, प्रतिपलम् – सततम्, मानुषम् – मानवीयम्, मनः, विषवर्धनम् – विषवृद्धिः, विषसमन्वितम्, बोभूयते – पौनःपुन्येन भवति ।

**भावार्थः** पुरा शिवः विषपानं कृतवान् तद्विषये कविः वदति – हे नीलकण्ठ ! यदि क्रोधयुक्तः न भवसि तर्हि किञ्चित् मम हृदयस्थं वचनं वक्तुम् इच्छामि । अधुना त्वं कण्ठस्थं कालकूटं वमनेन त्यज, कण्ठं रिक्तं कुरु । यतोहि संसारे मानवीयं विषं प्रतिपलं भूयमानम् अस्ति । त्वया कण्ठे विषधारणेन कोऽपि लाभः नास्ति इति ।

**विशेषार्थः** शिवः समुद्रमन्थनसमये तस्मादुत्पन्नं विषं स्वकण्ठे दधौ, येन जगतः कल्याणं स्यात् । किन्तु अधुना जनानां मानसं विषवर्धनं भवति, अतः शिवेन इतोऽपि विषं कण्ठे न धारणीयम् । तदेव विषं जनाः मानसे धरन्ति इति तात्पर्यम् ।

## स्वाध्यायः

**1. बहुविकल्पप्रश्नाः ।**

(1) मोहान्धपुत्रेषणम् इति कस्य विशेषणम् अस्ति?

(क) कर्णस्य (ख) सूर्यस्य (ग) इन्द्रस्य (घ) अर्जुनस्य

(2) कीदृशाः जनाः गृहे गृहे सन्ति?

(क) दातारः (ख) वैभवशालिनः (ग) याचकाः (घ) धनिकाः

(3) भवितासि इति रूपम् ............ अस्ति?

(क) लुट् प्र. पु. ए. व. (ख) लृट् प्र. पु. ब. व.

(ग) लुट् म. पु. ए. व. (घ) लृट् म. पु. ए. व.

(4) निषेवितानि इत्यस्य कः अर्थः?

(क) उपभुक्तानि (ख) उपयुक्तानि (ग) खादितानि (घ) रसितानि

(5) पङ्कलग्नेन कः विलोक्यते?

(क) शशाङ्काङ्कः (ख) कमलपङ्कः (ग) तडागः (घ) पादपः

(6) कीदृशैः बकैः कमलिनी अवहेलिता अस्ति?

(क) बुद्धिमद्भिः (ख) पण्डितैः (ग) अनभिज्ञैः (घ) मार्मिकैः

(7) जगति के चिरायुषः भवन्तु?

(क) बकाः (ख) मिलिन्दाः (ग) मूर्खाः (घ) अज्ञाः

(8) कविः कस्य जीवनं धन्यं मनुते?

(क) समुद्रस्य (ख) वृक्षस्य (ग) पावकस्य (घ) मार्गसरसः

(9) मयि इति रूपम् ............. अस्ति ?

(क) पञ्चम्येकवचनम् (ख) प्रथमैकवचनम् (ग) सप्तम्येकवचनम् (घ) द्वितीयैकवचनम्

(10) संसारे विषवर्धनं किं बोभूयते ?

(क) मानसम् (ख) भोजनम् (ग) शयनम् (घ) पानम्

**2. अतिलघूत्तराणि लिखत ।**

(1) कुण्डलवर्मयाचनरतः कः अस्ति ?

(2) राजहंसेन किं भुक्तम् ?

(3) मिलिन्दाः कीदृशाः सन्ति ?

(4) सन्तापमालाकुला का अस्ति ?

(5) नीलकण्ठ इति कस्य विशेषणम् अस्ति ?

**3. विस्तरेण उत्तरं लिखत ।**

(1) नैकोऽपि कर्णो भुवि इत्यनेन किं तात्पर्यम् ?

(2) स्वस्य दोषदर्शन-विषये कविः किं कथयति ?

(3) धिग्वारिधीनां जनुः इत्यस्य कः आशयः ?

(4) कविः किमर्थं प्रति कालकूटं त्यक्तुं कथयति ?

**4. श्लोकपूर्तिं कुरुत ।**

(1) कर्णे कर्ण ............. कर्णो भुवि ।

(2) भुक्ता मृणालपटली ............. कृतोपकारः ।

(3) रे रे शङ्कर नीलकण्ठ .............. बोभूयते मानसम् ।

**शिक्षकप्रवृत्तिः**

- अन्यानि अन्योक्तिपद्यानि छात्रेभ्यः कथयेयुः ।
- अन्योक्तेः विशेषः अर्थः भवति, तं विशेषार्थम् अवश्यं कथयेयुः ।

**छात्रप्रवृत्तिः**

- भामिनिविलास-आदिग्रन्थेभ्यः अन्योक्तिपद्यानि पठेयुः ।
- एकम् एकम् अन्योक्तिपद्यं तात्पर्यसहितं वर्गे वदेयुः ।

●

# 18. न नीतिमार्गं परिलङ्घयन्ति

अस्मिन् जगति बहुप्रकारकाः जनाः वसन्ति । तेषु केचन स्वार्थिनः केचन परमार्थिनः भवन्ति । ये खलु स्वार्थिनः भवन्ति ते स्वयं मूढाः सन्तः अपि परमार्थिनां सज्जनानां सहयोगेन स्वीयं स्वार्थं साधयन्ति । एतत्पर्यन्तं तु न किमपि शोचनीयमस्ति, यतोहि परमार्थिनः परोपकारिणः सज्जनाः यं कमपि जनं सेवितुं कामयन्ते । ते न पश्यन्ति यद् अयं स्वार्थी मूढः वा अस्तीति । ते तु समक्षं समागतं प्रत्येकं जनं सदा उपकर्तुं सन्नद्धा भवन्ति ।

मनुष्यः मूढः सन्नपि आत्मने स्वपरिवाराय च किमपि विशिष्टं कार्यं कर्तुम् इच्छति एव । ये खलु परोपकारकरणे मतिं न धत्ते ते प्रायः एतादृशान् जनान् दूरतः एव नमस्कुर्वन्ति । परन्तु ये खलु दयालवः परोपकारिणः सन्ति ते एतादृशं जनं सहयोगं कर्तुं सदैव यतन्ते । परं शोचनीया दशा तदा आगच्छति यदा एतादृशाः स्वार्थिनः जनाः सिद्धे स्वार्थे परमार्थिनां सज्जनानाम् उपरि एव कुठाराघातं कुर्वन्ति । अथवा एवमपि भवति यत् यावत्पर्यन्तं स्वीयं कार्यं न सिद्ध्यति, तावत्पर्यन्तम् एते नीतिमार्गम् अनुसरन्तः स्वीयम् उदात्तचरितं प्रदर्शयन्ति । ततः सिद्धे कार्ये का नाम नीतिः कः नाम धर्मः । कः वा उपकर्ता कः वा स्वजनः । एवं विचार्य धर्मनीतिसम्बन्धं सर्वमपि परित्यजन्ति । कलिप्रभावतः एवं प्रकारकाः जनाः बहवः भवन्ति ।

वस्तुतः एतादृशाः जनाः अन्ते तु विनाशमेव प्राप्नुवन्ति । नीतिशास्त्रज्ञाः उपदिशन्ति यत् ये जनाः धर्ममार्गं नीतिमार्गं वा न त्यजन्ति, ते एव सदा सुखिनः भवन्ति । एतदेव मानवस्य उत्तमं जीवनमस्ति । एतादृशं जीवनम् अस्माभिः सर्वैः जीवितव्यम् इति उपदेशः बहुषु नीतिविषयकेषु सुभाषितेषु उपलभ्यते । अथ च तादृश्यः अनेकाः कथाः अपि सन्ति, याः उपदेशम् इमं ददति । कथाभिः प्रेरिताः जनाः नीतिमार्गे चलन्ति, जीवने च न कदापि दुःखम् प्राप्नुवन्ति । अस्यामेव परम्परायाम् अत्र विष्णुशर्मणा रचितात् पञ्चतन्त्रनामकात् सुप्रसिद्धात् कथाग्रन्थात् एका कथा प्रस्तुता वर्तते । अस्यां कथायां नीतिमार्गभ्रष्टानाम् का दशा भवति इति साधु उपदिष्टमस्ति ।

(सन्दर्भः - पञ्चतन्त्रम्, मित्रभेदतन्त्रे एकोनविंशतितमा कथा ।)

---

कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः । अथ कदाचित्पापबुद्धिना चिन्तितं यद्-अहं तावन्मूर्खो दारिद्रयोपेतश्च । तदेनं धर्मबुद्धिम् आदाय देशान्तरं गत्वा अस्याश्रयेणार्थोपार्जनं कृत्वैनम् अपि वञ्चयित्वा सुखीभवामि ।

अथान्यस्मिन्नहनि पापबुद्धिः धर्मबुद्धिं प्राह - भो मित्र ! वार्धक्यभावे किं त्वमात्मविचेष्टितं स्मरसि । देशान्तरम् अदृष्ट्वा कां शिष्टजनस्य वार्तां कथयिष्यसि ? उक्तं च -

**देशान्तरेषु बहु-विध-भाषा-वेषादि येन न ज्ञातम् ।**
**भ्रमता धरणी-पीठे तस्य फलं जन्मनो व्यर्थम् ॥ 1॥**

तथा च-

**विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।**
**यावद्व्रजति न भूमौ देशाद्देशान्तरं हृष्टः ॥ 2॥**

अथ तस्य तद्-वचनम् आकर्ण्य प्रहृष्ट-मनास्तेनैव सह गुरुजनानुज्ञातः शुभेऽहनि देशान्तरं प्रस्थितः । तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तम् आसादितम् । ततश्च तौ द्वावपि प्रभूतोपार्जितद्रव्यौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन प्रस्थितौ । उक्तं च -

**प्राप्त-विद्यार्थी-शिल्पानां देशान्तर-निवासिनाम् ।**

**क्रोश-मात्रोऽपि भू-भागः शत-योजनवद्भवेत् ॥3॥**

अथ स्व-स्थान-समीप-वर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः - भद्र । न सर्वम् एतद्धनं गृहं प्रति नेतुं युज्यते । यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ते । तदत्रैव वन-गहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्रम् आदाय गृहं प्रविशावः । भूयोऽपि प्रयोजने सञ्जाते तन्मात्रं समेत्यास्मात्स्थानान्नेष्यावः । उक्तं च -

**न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो ।**

**मुनेरपि यतस्तस्य दर्शनाच्चलते मनः ॥4॥**

तथा च -

**यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।**

**आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥5॥**

तदाकर्ण्य धर्मबुद्धिराह - भद्र ! एवं क्रियताम् ।

तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन संस्थितवन्तौ । अथान्यस्मिन्नहनि पापबुद्धिर्निशीथेऽटव्यां गत्वा तत्सर्वं वित्तं समादाय गर्तं पूरयित्वा स्व-भवनम् आजगाम ।

अथान्येद्युर्धर्मबुद्धिं समेत्य प्रोवाच - सखे बुहुकुटुम्बा वयं वित्ताभावात्सीदामः । तद्गत्वा तत्र स्थाने किंचिन्मात्रं धनम् आनयावः ।

सोऽब्रवीत् - भद्र ! एवं क्रियताम् ।

अथ द्वावपि गत्वा तत्स्थानं यावत्खनतः तावद्रिक्तं भाण्डं दृष्टवन्तौ । अत्रान्तरे पापबुद्धिः शिरः ताडयन्प्रोवाच - भो धर्मबुद्धे ! त्वया हृतं एतद्धनम्, नान्येन । यतो भूयोऽपि गर्तापूरणं कृतम् । तत्प्रयच्छ मे तस्यार्धम् । अन्यथा अहं राजकुले निवेदयिष्यामि ।

स आह - भो दुरात्मन् ! मा मैवं वद । धर्मबुद्धिः खल्वहम् । नैतच्चौरकर्म करोमि । उक्तं च -

**मातृवत्पर-दाराणि पर-द्रव्याणि लोष्टवत् ।**

**आत्मवत्सर्व-भूतानि वीक्षन्ते धर्म-बुद्धयः ॥6॥**

एवं द्वावपि विवदमानौ धर्माधिकारिणं गतौ प्रोचतुः च परस्परं दूषयन्तौ ।

अथ धर्माधिकरणाधिष्ठितपुरुषैः दिव्यार्थं यावन्नियोजितौ तावत्पापबुद्धिः आह - अहो न सम्यग्-दृष्टो न्यायः । उक्तं च -

**विवादे अन्विष्यते पत्रं तद्-अभावेऽपि साक्षिणः ।**

**साक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिणः ॥7॥**

तदत्र विषये मम वृक्षदेवताः साक्षिभूताः तिष्ठन्ति । ताः अपि आवयोः एकतरं चौरं साधु वा करिष्यन्ति । अथ तैः सर्वैः अभिहितम् - भो युक्तम् उक्तं भवता । उक्तं च -

**अन्त्यजोऽपि यदा साक्षी विवादे सम्प्रजायते ।**

**न तत्र युज्यते दिव्यं किं पुनर्वनदेवताः ॥8॥**

तदस्माकम् अप्यत्र विषये महत्कौतूहलं वर्तते । प्रत्यूषसमये युवाभ्याम् अप्यस्माभिः सह तत्र वनोद्देशे गन्तव्यम् इति । एतस्मिन्नन्तरे पापबुद्धिः स्वगृहं गत्वा स्वजनकम् उवाच - तात ! प्रभूतोऽयं मयार्थो धर्मबुद्धेः चोरितः । स च तव

वचनेन परिणतिं गच्छति । अन्यथास्माकं प्राणैः सह यास्यति ।

स आह - वत्स, द्रुतं वद येन प्रोच्य तद्द्रव्यं स्थिरतां नयामि ।

पापबुद्धिराह - तात, अस्ति तत्प्रदेशे महाशमी । तस्यां महत्कोटरम् अस्ति । तत्र त्वं सांप्रतं एव प्रविश । ततः प्रभाते यदा अहं सत्यश्रावणं करोमि, तदा त्वया वाच्यं यत् धर्मबुद्धिः चौरः इति ।

तथानुष्ठिते प्रत्यूषे स्नात्वा पापबुद्धिः धर्मबुद्धि-पुरःसरो धर्माधिकारकैः सह तां शमीम् अभ्येत्य तारस्वरेण प्रोवाच ।

**आदित्यचन्द्रावनिलोऽनलश्च**
**द्यौर्भूमिरापो हृदयं यमश्च ।**
**अहश्च रात्रिश्च उभे च सन्ध्ये**
**धर्मो हि जानाति नरस्य वृत्तम् ॥9॥**

भगवति वनदेवते ! आवयोः मध्ये यः चौरः तत्कथयत ।

अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच - भो, धर्मबुद्धिना हृतम् एतद्धनम् ।

तद् आकर्ण्य सर्वे ते राजपुरुषाः विस्मयोत्फुल्ललोचनाः यावद्धर्मबुद्धेः वित्तहरणोचितं निग्रहं शास्त्र-दृष्ट्या अवलोकयन्ति तावद्धर्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवेष्ट्य वह्निना सन्दीपितम् । अथ ज्वलति तस्मिन् शमीकोटरे अर्ध-दग्ध-शरीरः स्फुटितेक्षणः करुणं परिदेवयन् पापबुद्धिपिता निश्चक्राम ।

ततश्च तैः सर्वैः पृष्टः - भो किम् इदम् ?

इत्युक्ते इदं सर्वं कुकृत्यं पापबुद्धेः कारणाज्जातम् इत्युक्त्वा मृतः । ततस्ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलम्ब्य धर्मबुद्धिं प्रशंस्य इदम् उचुः -

**सदा सदाचाररताः भवन्ति**
**कदापि धर्मं न परित्यजन्ति ।**
**महाजनाः ज्ञानरताः सदैव**
**न नीतिमार्गं परिलङ्घयन्ति ॥ 10 ॥**

## टिप्पणी

**सन्धिः** कस्मिंश्चिद्देशे (कस्मिंश्चित् देशे) । तावन्मूर्खो दारिद्रयोपंतश्च (तावत् मूर्खः दारिद्र्योपेतः च) । अस्याश्रयेणार्थोपार्जनम् (अस्य आश्रयेण अर्थोपार्जनम्) कृत्वैनम् (कृत्वा एनम्) अथान्यस्मिन्नहनि (अथ अन्यस्मिन् अहनि) । तावन्नाप्नोति (तावत् न आप्नोति) । प्रहृष्टमनास्तेनैव (प्रहृष्टमनाः तेन एव) । शुभेऽहनि (शुभे अहनि) । क्रोश-मात्रोऽपि (क्रोशमात्रः अपि) । समेत्यास्मात्स्थानान्नेष्यावः (समेत्य अस्मात् स्थानात् नेष्यावः) । दर्शनाच्चलते (दर्शनात् चलते) । सोऽब्रवीत् (सः अब्रवीत्) द्वावपि (द्वौ अपि) नान्येन (न अन्येन) । यतो भूयोऽपि (यतः भूयः अपि) । स आह (सः आह) । नैतच्चौरकर्म (न एतत् चौरकर्म) यावन्नियोजितौ (यावत् नियोजितौ) । तद्-अभावेऽपि (तद्-अभावे अपि) । साक्ष्यभावात्ततो दिव्यम् (साक्ष्यभावात् ततः दिव्यम्) अन्त्यजोऽपि (अन्त्यजः अपि) अप्यत्र (अपि अत्र) अप्यस्माभिः (अपि अस्माभिः) एतस्मिन्नन्तरे (एतस्मिन अन्तरे) । पापबुद्धिराह (पापबुद्धिः आह) आदित्यचन्द्रावनिलोऽनलश्च (आदित्यचन्द्रौ अनिलः अनलः च) । द्यौर्भूमिरापो हृदयं यमश्च (द्यौः भूमिः आपः हृदयम् यमः च) । अहश्च रात्रिश्च (अहः च रात्रिः च) । कारणाज्जातम् (कारणात् जातम्) इत्युक्त्वा (इति उक्त्वा) ततस्ते (ततः ते) ॥

**समासः** – धर्मबुद्धिः (धर्मे बुद्धिः यस्य सः बहु.) । पापबुद्धिः (पापे बुद्धिः यस्य सः – बहु.) । दारिद्र्योपेतः (दारिद्र्येण उपेतः तृ. तत्पु.) । वार्धक्यभावे (वार्धक्यस्य भावः, तस्मिन् – ष. तत्पु.) । आत्मविचेष्टितम् (आत्मना विचेष्टितम् – तृ. तत्पु.) । शिष्टजनस्य (शिष्टः चासौ जनः – कर्म.)। धरणी–पीठे (धरण्याः पीठम्, तस्मिन् – स. तत्पु.) । प्रहृष्ट–मनाः (प्रहृष्टं मनः यस्य सः – बहु.) । गुरुजनानुज्ञातः (गुरुजनैः अनुज्ञातः – तृ. तत्पु.) । प्रभूतोपार्जितद्रव्यौ (प्रभूतम् उपार्जितं द्रव्यं येन – तौ बहु.) । प्राप्त–विद्यार्थ–शिल्पानाम् (प्राप्तानि विद्या अर्थः शिल्पानि यैः ते, तेषाम् – बहु.) । देशान्तर–निवासिनाम् (देशान्तरस्य निवासी, तेषाम् – ष.तत्पु.) । वन–गहने (वनस्य गहनम् – ष.तत्पु.) । गर्तापूरणम् (गर्तस्य आपूरणम् – ष.तत्पु.) । साक्ष्यभावात् (साक्ष्यस्य भावः, तस्मात् – ष.तत्पु.) । वृक्षदेवताः (वृक्षः रुपी देवता – कर्म.) ! वनदेवताः (वनम् रुपी देवता – कर्म.) । वनोद्देशे (वनस्य उद्देशः तस्मिन् – ष.तत्पु.) । तत्प्रदेशे (तस्मिन् प्रदेशे – स.तत्पु.) । महाशमी (महान चासौ शमी च – कर्म.) । महत्कोटरम् (महच्चादः कोटरं च – कर्म.) । सत्यश्रावणम् (सत्यस्य श्रावणम् – ष.तत्पु.) । धर्मबुद्धि–पुरःसरः (धर्मबुद्धिना पुरःसरः – तृ.तत्पु.) । धर्माधिकरणकैः (धर्मस्य अधिकरणकाः, तैः – ष.तत्पु.) । आदित्यचन्द्रौ (आदित्यः च चन्द्रः च – इ.द्व.) । पापबुद्धिपिता (पापबुद्धेः पिता – ष. तत्पु.)। विस्मयोत्फुल्ललोचनाः (विस्मयेन उत्फुल्ले लोचने येषाम् ते – बहु.) । वित्तहरणोचितम् (वित्तस्य हरणम् – ष.तत्पु., वित्तहरणाय उचितम् – च.तत्पु.) । शास्त्र–द्रव्यम्, तैः कर्म.) । अर्ध–दग्ध–शरीरः (अर्धं दग्धम् – तत्पु. अर्धदग्धं चादः शरीरं च – कर्म.)। स्फुटितेक्षणः (स्फुटिते इक्षणे यस्य सः – बहु.) । कुकृत्यम् (कुत्सितं कृत्यम् – तत्पु.) । शमीशाखायाम् (शमेः शाखा, तस्याम् – ष.तत्पु.) । सदाचाररताः (सताम् आचारः – ष.तत्पु. सदाचारे रताः – स. तत्पु.) । महाजनाः (महान्तः चामी जनाः – कर्म) । ज्ञानरताः (ज्ञाने रताः स.तत्पु.) । नीतिमार्गम् (नीतेः मार्गः, तम् – ष.तत्पु.) ॥

**शब्दार्थः** – वञ्चयित्वा (वञ्चनं कृत्वा) । भ्रमता (भ्रमणं कुर्वता) । हृष्टः (प्रसन्नः) । आकर्ण्य (श्रुत्वा) । प्रस्थितः (प्रस्थानं कृतवान) । प्रभूततरम् (अधिकतरम्) ।आसादितम् (प्राप्तम्) ।शत–योजनवत् (यथा शतं योजनम् तथा) ।अभिहितः (उक्तः) । नेतुम् (नयनं कर्तुम्) । युज्यते (योगं करोति) । प्रार्थयिष्यन्ते (प्रार्थनां करिष्यन्ति) । निक्षिप्य (निक्षेपं कृत्वा)। आदाय (आदानं कृत्वा) । समेत्य (समागत्य) । नेष्यावः (नयनं करिष्यावः) । दर्शयेत् (दर्शनं कारयेत्) । भक्ष्यते (खाद्यते)। श्वापदैः (पशुभिः) । गत्वा (गमनं कृत्वा) । संस्थितवन्तौ (संस्थानं कृतवन्तौ) । समादाय (गृहीत्वा) । पूरयित्वा (पूर्ण कृत्वा) । आजगाम (गच्छति स्म) । प्रोवाच (प्रवचनं चकार – कृतवान्) । सीदामः (अधितिष्ठामः) । आनयावः (आनयनं कुर्मः) । अब्रवीत् (अवदत्) । क्रियताम् (विधीयताम्) । खनतः (खननं कुर्वतः) । दृष्टवन्तौ (दृष्टिवन्तौ जातौ) । ताडयन् (पीडयन्) । हृतम् (नीतम्, गृहीतम्) । प्रयच्छ (देहि) । निवेदयिष्यामि (निवेदनं करिष्यामि) । आह (उवाच) । मा वद (वदनं मा कुरु, अलं वदनेन) । उक्तम् (कथितम्) । वीक्षन्ते (पश्यन्ति) । विवदमानौ (विवादं कुर्वन्तौ) । प्रोचतुः (उक्तवन्तः)। दूषयन्तौ (दूषणं कृतवन्तौ) । अन्विष्यते (अन्वेषणं करिष्यते) । प्रवदन्ति (कथयन्ति) । तिष्ठन्ति (स्थितिं करिष्यन्ति) । अभिहितम् (उक्तम्) । सम्प्रजायते (समुत्पद्यते) । युज्यते (योग्यं भवति) । वर्तते (अस्ति) । गन्तव्यम् (गमनं कर्तव्यम्) । चोरितः (चोरणं कृतम्) । परिणतिं गच्छति (परिणामं प्राप्नोति) । यास्यति (गमिष्यति) । वद (कथय)। प्रोच्य (उक्त्वा) । प्रविश्य (प्रवेशं कृत्वा) । प्रत्यूषे (प्रातःकाले) । स्नात्वा (स्नानं कृत्वा) । अभ्येत्य (समागत्य) । तारस्वरेण (उच्चस्वरेण) । जानाति (अवगच्छति) । कथयत (वदत) । आकर्ण्य (श्रुत्वा) । अवलोकयन्ति (पश्यन्ति) । परिवेष्ट्य (परिवेष्टनं कृत्वा)। सन्दीपितम् (प्रज्वलितम्) । ज्वलति तस्मिन् शमीकोटरे (यदा शमीकोटरः प्रज्वलितः तदा) । परिदेवयन् (दुःखस्य अनुभवं कुर्वन्) । निश्चक्राम (गतवान्) । प्रतिलम्ब्य (प्रतिलम्बनं कृत्वा) । प्रशंस्य (प्रशंसां कृत्वा) । परित्यजन्ति (परित्यागं कुर्वन्ति) । परिलङ्घयन्ति (अतिक्रमणं कुर्वन्ति) ॥

## स्वाध्यायः

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) धर्मबुद्धेः मित्रं कः अस्ति?

(क) पापबुद्धिः (ख) मूर्खबुद्धिः (ग) अर्धबुद्धिः (घ) कामबुद्धिः

(2) भ्रमता पापबुद्धिना प्रभूततरं किम् आसादितम्?

(क) सुखम् (ख) यशः (ग) वित्तम् (घ) ज्ञानम्

(3) तस्य दर्शनात् कस्य अपि मनः चलते?

(क) स्वस्य अपि (ख) मुनेः अपि (ग) स्वजनस्य अपि (घ) शत्रोः अपि

(4) जले मत्स्यैः किम् भक्ष्यते?

(क) आमिषम् (ख) अन्नम् (ग) धनम् (घ) सुखम्

(5) अन्यथा अहं ............. निवेदयिष्यामि ।

(क) राजसभायाम् (ख) जनानां मध्ये (ग) राजकुले (घ) तव गृहे

(6) आत्मवत्सर्वभूतानि के वीक्षन्ते?

(क) मुनयः (ख) पापबुद्धयः (ग) स्वार्थिनः (घ) धर्मबुद्धयः

**2. एकवाक्येन उत्तरं लिखत ।**

(1) मानवः सम्यक् वित्तं कदा यावत् न प्राप्नोति?

(2) तौ द्वौ कीदृशौ स्वगृहं प्रत्यौत्सुक्येन प्रस्थितौ?

(3) स्वात्मानं बहुकुटुम्बं कः कथयति?

(4) तदत्र विषये पापबुद्धेः के साक्षिभूताः तिष्ठन्ति?

(5) पापबुद्धिः स्वपितरं कुत्र प्रवेष्टुं प्रेषयति?

(6) शमीकोटरस्थः कः?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) पापबुद्धिना किं चिन्तितम्?

(2) आमिषं कुत्र कुत्र केन केन भक्ष्यते?

(3) पापबुद्धिः निशीथे कुत्र गतवान् किं किं च कृतवान्?

(4) पापबुद्धिः स्वगृहं गत्वा स्वजनकं किम् उवाच?

(5) नरस्य वृत्तं के जानन्ति?

(6) ज्वलति कोटरे किं जातम्?

**4. सामासिकपदानाम् परिचयं कारयत ।**

(1) धर्मबुद्धिः

(2) प्रहृष्टमनाः

(3) बहुकुटुम्बाः

(4) गर्तापूरणम्

(5) आदित्यचन्द्रौ

(6) वित्तहरणोचितम्

**5. सन्धिविच्छेदं कुरुत ।**

(1) तावन्मूर्खः

(2) अथान्यस्मिन्नहनि

(3) द्वावपि

(4) एतस्मिन्नन्तरे

(5) आदित्यचन्द्रावनिलोऽनलश्च

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) पञ्चतन्त्रम्

(2) आत्मविचेष्टितम्

(3) वित्तवान्

(4) धर्मबुद्धिः

(5) साक्षी

**7. पदानां परिचयं कारयत ।**

(1) वञ्चयित्वा

(2) आकर्ण्य

(3) नेतुम्

(4) दर्शयेत्

(5) संस्थितवन्तौ

(6) खनतः

**8. यथापाठं रिक्तस्थानानां पूर्तिः विधेया ।**

(1) धर्मबुद्धिः पापबुद्धिश्च द्वे ............... प्रतिवसतः ।

(2) विद्यां ............... शिल्पं तावन्नाप्नोति मानवः सम्यक् ।

(3) यतः कुटिम्बिनः ............. च प्रार्थयिष्यन्ते ।

(4) मुनेरपि यतस्तस्य ............. चलते मनः ।

(5) अत्रान्तरे पापबुद्धिः ................. ताडयन्प्रोवाच ।

(6) तात, अस्ति तत्प्रदेशे ............ ।

●

# 19. सुभाषितानि

संस्कृतसाहित्यं सुभाषितरत्नैः सुसम्पन्नमस्ति । वेदवचनानि निखिलं धर्मशास्त्रं च सुभाषितमेवास्ति । रामायणं महाभारतं चेति सुप्रसिद्धं काव्यद्वयं सुभाषितवचनैः प्रपूरितमस्ति । अत्र प्रतिप्रसङ्गं सुभाषितवचनानि निहितानि सन्ति । प्रशिष्टे संस्कृतसाहित्ये अपि एतेषां सुभाषितवचनानाम् उचितः आदरः दृश्यते । काव्यं स्यात् नाट्यं वा स्यात् यथाप्रसंगं कवयः सुभाषितवचनानि उच्चारयन्ति । काव्यशास्त्रिणः काव्यं कान्तासम्मिततया उपदेशयुजे भवति इति मन्यन्ते । अतः एव ते एतल्लक्ष्यं सुभाषितैः वचनैः स्वीये स्वीये महाकाव्ये रूपके वा स्थापयितुं समुत्सुकाः भवन्ति ।

केचन कवयस्तु स्वतन्त्रतया मुक्तकानि रचयन्तः संस्कृतसुभाषितसाहित्ये स्वीयं योगदानं दत्तवन्तः सन्ति । मुक्तककाराः कवयः एतादृशेन सुभाषितेन मानवैः स्वजीवनं केन प्रकारेण यापनीयम्, जीवने नीति–धर्म–विद्या–मैत्री–भाग्यादीनां किं स्थानमस्ति, अथ च एतेषां स्वरूपं किम् अस्ति – इत्यादि नैकविधं बोधयन्ति । केनचित् कविना उक्तम् यत् – संसारकटुवृक्षस्य द्वे एव मधुरे फले । सुभाषितरसास्वादः संगतिः सुजने जने ॥ अर्थात् संसारोऽयं कटुः अस्ति, तथापि अस्मिन् संसारे सुभाषितस्य रसास्वादः मधुरं फलमिव रुचिकरः भवितुमर्हति ।

अस्यैव अमृततुल्यस्य सुभाषितस्य रसास्वादनाय अस्य पाठस्य परिकल्पना कृता । यत्र यानि सुभाषितानि प्रदत्तानि सन्ति तानि गानेन पठनेन च छात्राणां मनः आर्द्रं करिष्यन्ति । अथ च गानपठनाभ्यां सह एतेषु निहितस्य तत्वस्य बोधः अपि करणीयो भवति । एवं कृते यथालंकारैः मानवस्य शरीरशोभा वर्धते तथैव एतैः सुभाषितैः पुरुषस्य आत्मनः शोभा वर्धते । अस्मिन् पाठे एकतः भाग्यादीनां स्वरुपपरिचयः अस्ति, अपरतः च मूर्खाणां दोषाः सज्जनानां च गुणाः वर्णिताः सन्ति । छात्राः एतैः सुभाषितैः सर्वदा प्रेरणां प्राप्स्यन्ति इति अस्मदीयानां दृढः विश्वासः ॥

---

**लभेत सिकतासु तैलमपि यत्नतः पीडयन्**
**पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।**
**कदाचिदपि पर्यटन् शशविषाणमासादयेत्**
**न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ 1॥**

**पदच्छेदः** – लभेत (वि.धि. 1.1) सिकतासु (7.1) तैलम् (2.1) अपि (अ.) यत्नतः (अ.) अपि (अ.) पर्यटन् (1.1) शशविषाणम् (2.1) आसादयेत् (वि.लि. 1.1) न (अ.) तु (अ.) प्रति–निविष्ट–मूर्खजनचितम् (2.1) आराधयेत् (आ + राध् वि.धि. 1.1) ॥

**अन्वयः** यत्नतः पीडयन् सिकतासु अपि तैलं लभेत, पिपासार्दितः मृगतृष्णिकासु सलिलं च पिबेत् पर्यटन् कदाचित् शशविषाणम् अपि आसादयेत्, न तु प्रतिनिविष्टमूर्खजनचित्तं माराधयेत् ।

**पदार्थः** (कोऽपि मनुष्यः) यत्नतः (प्रयत्नेन) पीडयन् (केनचित् यन्त्रेण सम्मर्दयन्) सिकतासु (बालुकासु) अपि तैलं (तिलान्तर्गतं सारम्) लभेत (लब्धुं शक्नुयात्), अथ च (कश्चित्) पिपासार्दितः (तृष्णातुरः सन्) मृगतृष्णिकासु (मरुस्थलीय–मरीचिकासु) सलिलम् (जलम्) पिबेत् (पातुं शक्नुयात्), पर्यटन् (वनान्तरे सञ्चरन्) कदाचित् (कस्मिंश्चित् काले) शशविषाणम् (शशशृङ्गम् अपि) आसादयेत् (अधिगन्तुं शक्नुयात्) तु (किन्तु) प्रतिनिविष्टमूर्खजनचित्तम् (प्रतिनिविष्टमूर्खमानवमानसम्) न आराधयेत् (प्रसादयितुं न शक्नुयात्) ॥

**भावार्थः** कोऽपि मनुष्यः दैववशात् बालुकायां तैलम्, मरुस्थले जलम् इत्यादि अशक्यं वस्तु शक्यं कर्तुं कदाचित् शक्नोति, परन्तु मूर्खस्य जनस्य चित्तम् अनुकूलं कर्तुं सदैव अशक्यं भवति इति ॥

**विशेषः** पिपासार्दितः (पातुम् इच्छा पिपासा, तया पिपासया आर्दितः सः) । प्रतिनिविष्टमूर्खजनचित्तम् (प्रतिनिविष्टः च असौ मूर्खजनः च इति प्रतिनिविष्टमूर्खजनः, तस्य चित्तं प्रतिनिविष्टमूर्खजनचित्तम्) ॥

**शशीदिवसधूसरो गलितयौवना कामिनी**
**सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।**
**प्रभुर्धनपरायणः सततदुर्गतः सज्जनो**
**नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ 2 ॥**

**पदच्छेदः** शशी (1.1) दिवसधूसरः (1.1) गलितयौवना (1.1) कामिनी (1.1) सरः (1.1) विगतवारिजम् (2.1) मुखम् (2.1) अनक्षरम् (2.1) स्वाकृतेः (6.1) प्रभुः (1.1) धनपरायणः (1.1) सततदुर्गतः (1.1) सज्जनः (1.1) नृपाङ्गणगतः (1.1) खलः (1.1) मनसि (7.1) सप्त (1.3) शल्यानि (1.3) मे (6.1) ॥

**अन्वयः** दिवसधूसरः शशी, गलितयौवना कामिनी विगतवारिजं सरः, स्वाकृतेः अनक्षरं मुखम्, धनपरायणः प्रभुः सततदुर्गतः सज्जनः, नृपाङ्गणगतः खलः सप्त मे मनसि शल्यानि (सन्ति)

**पदार्थः** दिवसधूसरः (दिनमलिनः) शशी (चन्द्रमाः) गलितयौवना (नष्टतारुण्या) कामिनी (कान्ता) विगतवारिजम् (कमलहीनम्) अनक्षरम् (अक्षरशून्यम्, विद्याविहीनं वा) मुखं (आननम्), धनपरायणः (वित्तलुब्धः) प्रभुः (स्वामी), नृपाङ्गणगतः (राजसभायाम् उपस्थितः) खलः (दुर्जनः) सप्त (एतानि सप्तसङ्ख्याकानि) मे (मम) मनसि (हृदये) शल्यानि (शूलानि) सन्ति इति ॥

**भावार्थः** अस्मिन् जगति सर्वमानवानां कृते एतानि सप्त दुःखकारणानि सन्ति । आह्लादरहितः चन्द्रमाः, तारुण्यहीना स्त्री, कमलं विना सरोवरम्, रूपवतः पुरुषस्य विद्याविहीनं मुखम्, वित्तोपार्जनरतः राजपुरुषः, सदा दुःखी सज्जनपुरुषः, राजभवनविहारी दुर्जनः च ॥

**विशेषः** दिवसधूसरः (दिवसे धूसरः इति दिवसधूसरः) । गलितयौवना (गलितं विद्यन्ते यौवनं यस्याः सा गलितयौवना) । विगतवारिजम् (विगतानि वारिजानि यस्मिन् तत् विगतवारिजम्) । अनक्षरम् (न अक्षराणि यस्मिन् तद् अनक्षरम्) । धनपरायणः (धने परायणः धनपरायणः) । नृपाङ्गणगतः (नृपस्य अङ्गणं नृपाङ्गणं तत्र गतः नृपाङ्गणगतः) ॥

**इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-**
**-मितश्च शरणार्थिना शिखरिणां गणाः शेरते ।**
**इतोऽपि वडवानलः सह समस्तसंवर्तकै**
**रहो ! विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ 3 ॥**

**पदच्छेदः** इतः (अ.) स्वपिति (लट् 1.1) केशवः (1.1) कुलम् (1.1) इतः (अ.) तदीयद्विषाम् (2.1) इतः (अ.) च (अ.) शरणार्थिनाम् (6.3) गणाः (1.3) शेरते (लट्. 1.1) इतः (अ.) अपि (अ.) वडवानलः (1.1) सह (अ.) समस्तसंवर्तकैः (3.3) अहो ! (अ.) विततम् (2.1) ऊर्जितम् (1.1) भरसहम् (2.1) सिन्धोः (6.1) वपुः (1.1) ॥

**अन्वयः** इतः केशवः स्वपिति, तदीयद्विषां कुलं इतः च शरणार्थिनां शिखरिणां गणाः शेरते इतः अपि समस्तसंवर्तकैः सह वडवानलः (तिष्ठति), अहो ! सिन्धोः वपुः विततम् ऊर्जितं भरसहं च ॥

**पदार्थः** इतः (एकस्मिन् प्रदेशे) केशवः (भगवान् विष्णुः) स्वपिति (शेते, निद्राति) इतः (अन्यस्मिन् प्रदेशे), तदीयद्विषाम् (दैत्यानाम्) कुलम् (समूहः) इतः च शरणार्थिनाम् (शरणाभिलाषिणाम्) शिखरिणाम् (पर्वतानाम्) गणाः (समूहाः) शेरते (स्वपन्ति) इतोऽपि (अपरस्मिन्प्रदेशे) समस्तसंवर्तकैः (सकलप्रलयकालीनैः) मेघविशेषैः सह (साकम्) वडवानलः (वडवानल-नामकः प्रलयाग्निः) वसति (तिष्ठति) अहो ! (आश्चर्यम्) सिन्धोः (समुद्रस्य) वपुः (शरीरम्) विततम् (विस्तृतम्) उचितम् (बलशालि) भरसहम् (भारधारणसमर्थम्) च वर्तते (अस्ति) ॥

**भावार्थः** समुद्रस्य शरीरं केशवादिनामाधारत्वे विस्तृतं वडवानलस्य आश्रयत्वेन अतिवर्द्धिष्णुः पर्वतभरणेन भारोद्वहनक्षमं च अप्रमेयानुभावत्वेन अत्यन्तम् आश्चर्यकरम् वर्तते । एवं समेषां शरणासमागतानाम् आश्रयदातारः महामहिमशालिनः महापुरुषाः अवर्णनीयत्वेन नूनं सन्ति महान्तः इति भावः ॥

**विशेषः** तदीयद्विषाम् (तस्य इमे तदीयाः, तदीयाश्च ते द्विषः तदीयद्विषः तेषां तदीयद्विषाम्) । समस्तसंवर्तकैः = समस्ताः च ते संवर्तकाः समस्तसंवर्तकाः, तैः समस्तसंवर्तकैः ॥

**पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्**
**नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ।**
**धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं**
**यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥4॥**

**पदच्छेदः** पत्रम् (1.1) न एव (अ.) यदा (अ.) करीरविटपे (7.1) दोषः (1.1) वसन्तस्य (6.1) किम् (1.1) न उलूकः (1.1) अपि (अ.) अवलोकते (लट्. 1.1) यदि दिवा (1.1) सूर्यस्य (6.1) किम् दूषणम् (2.1) धाराः (1.3) न एव (1.1) पतन्ति (लट्. 1.3) चातकमुखे (7.1) मेघस्य (6.1) किम् (अ.) दूषणम् यत् पूर्वम् (2.1) विधिना (3.1) ललाटलिखितम् (1.1) तत् (1.1) मार्जितुम् (अ.) कः (1.1) क्षमः (1.1) ॥

**अन्वयः** यदा करीरविटपे पत्रं नैव (भवति) । वसन्तस्य दोषः किम् ? यदि उलूकः दिवा अपि न अवलोकते (तर्हि) सूर्यस्य दूषणम् किम् ? यदि चातकमुखे धाराः नैव पतन्ति (तर्हि) मेघस्य दूषणं किम् ? पूर्वं विधिना यत् ललाटलिखितं तत् मार्जितुं कः क्षमः ?

**पदार्थः** यदा-यस्मिन् काले, करीरविटपे-करीरनामतरोः शाखायाम्, पत्रम्-पर्णम्, नैव-कदापि भवति । तर्हि वसन्तस्य-वसन्तऋतोः, दोषः-अपराधः, किम्-नास्तीत्यर्थः, यदि-चेत्, उलूकः - दिवान्धपक्षी, दिवाऽपि-दिनेऽपि, न अवलोकते-न पश्यति, तर्हि सूर्यस्य-भानोः, किम् दूषणम्-दोषः किम् ?, यदि चातकमुखे-सारङ्गपक्षिवदने, धाराः-जलधाराः, नैव पतन्ति । तर्हि मेघस्य-जलदस्य, दूषणम्-दोषः किम् ?, विधिना-विधात्रा, पूर्वम्, ललाटलिखितम्-भालेऽक्षररुपेण विन्यस्तम्, तत् मार्जितुम्-तत् प्रोञ्छितुम्, कः- को नाम पुरुषः, क्षमः सक्षमः ॥

**भावार्थः** सर्वेषां जनानां ललाटे पूर्वं विधात्रा यत् अङ्कितमस्ति तत् मार्जितुं कोऽपि समर्थः न भवति । यथा वर्षाकाले चातकमुखे जलं न पतति तर्हि जलदस्य दोषः नास्ति । वसन्तकाले करीरवृक्षे पत्रं न उत्पद्यते तत्र वसन्त ऋतोः दोषः न भवति । एवं विध्यनुसारं एव सर्वं भवति । भाग्यवशात् कोऽपि मनुष्यः दुःखी सुखी वा भवति, तदा स्वदुःखस्य आरोपः अन्योपरी न कर्तव्यः इति ॥

**रे रे चातक सावधानमनसा मित्र क्षणं श्रूयतां**
**अम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥5॥**

**पदच्छेदः** रे रे चातक (सं.ए.) सावधानमनसा (3.1) मित्र (सं.ए.) क्षणम् (2.1) श्रूयताम् (लोट्. 1.1) अम्भोदाः (1.3) बहवः (1.3) वसन्ति (लट्ल. 1.3) गगने (7.1) सर्वे (1.3) अपि न (अ.) एतादृशाः (1.3) केचिद् (अ.) वृष्टिभिः (3.1) आर्द्रयन्ति (लट्ल 1.3) वसुधाम् (2.1) गर्जन्ति (लट्ल 3.1) केचित् (अ.) वृथा (अ.) यं (2.1) यं पश्यसि (दृश् लट् 1.1) तस्य (6.1) तस्य (6.1) पुरतः (अ.) मा (अ.) ब्रूहि (लोट्ल. 2.1) दीनम् (1.1) वचः (1.1) ॥

**अन्वयः** रे रे मित्र चातक सावधानमनसा क्षणं श्रूयताम्, गगने अम्भोदाः बहवः वसन्ति सर्वे अपि तादृशाः न केचिद् वृष्टिभिः वसुधाम् आर्द्रयन्ति, केचित् वृथा गर्जन्ति, यं यं पश्यसि तस्य तस्य पुरतः दीनं वचः मा ब्रूहि ।

**पदार्थः** रे रे मित्र-हे सुहृद, चातक इत्यर्थः सावधानमनसा-ध्यानपूर्वकं चेतसा, क्षणम्-निमिषं यावत्, श्रूयताम्-आकर्ण्यताम्, गगने-आकाशे, बहवः - असंख्यकाः, अम्भोदाः - मेघाः, वसन्ति-वासं कुर्वन्ति, सर्वे-सकलाः, अपि एतादृशा-ईदृशाः, करुणाकरा न सन्ति । केचिद्-केचन मेघाः, वृष्टिभिः-वर्षाभिः, वसुधाम्-पृथ्वीम्, आर्द्रयन्ति-आर्द्रं कुर्वन्ति, केचित्-अपरे मेघाः, वृथा-व्यर्थम्, गर्जन्ति-महाघोषं कुर्वन्ति, त्वम्-भवान् । यं यम् - यं कञ्चन मेघम, पश्यसि-अवलोकयसि, तस्य तस्य-सर्वस्य, पुरतः अग्रे, दीनम्-दीनदशाप्रदर्शनम् वचः-वचनम्, मा ब्रूहि - न कथय ॥

**भावार्थः** अस्मिन् पद्ये कश्चन मित्रचातकं कथयति - अरे मित्र चातक आकाशे बहुषु मेघेषु केचन केवलं गर्जन्त्येव न वर्षन्ति, कतिपये च वर्षन्त्येव न गर्जन्ति । अतः जलेच्छया न सर्वे मेघाः अभ्यर्थनीयाः । एवं जगति द्विधा मनुष्याः सन्ति, केचन केवलं ब्रुवते एव, कार्यं न कुर्वन्ति । केचिच्च किञ्चित् अब्रूवन्तः अपि कार्यं कुर्वन्ति, अतः सामान्यतया सर्वे अभ्यर्थनीयाः न, अपि तु सम्यग् विचार्य एव स्वाभिप्रायः प्रकाशनीयः ॥

**नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः**
**स्वर्गो दुर्गमनुग्रहः किल हरेरैरावती वारणः ।**
**इत्यैश्वर्यबलान्वितोऽपि बलभिद् भग्नः परैः सङ्गरे**
**तद् व्यक्तं ननु दैवमेव शरणं धिग् धिग् वृथा पौरुषम् ॥6॥**

**पदच्छेदः** नेता (1.1) यस्य बृहस्पतिः (1.1) प्रहरणम् वज्रम् (2.1) सुराः (1.3) सैनिकाः (1.3) स्वर्गः (1.1)

दुर्गम् (2.1) अनुग्रहः किल हरेः (6.1) ऐरावती वारणः (1.1) इति ऐश्वर्यबलान्वितः (1.1) अपि (अ.) बलभित् (1.1) भग्नः (1.1) परैः (3.3) सङ्गरे (7.1) तद् व्यक्तं (1.1) ननु (अ.) दैवम् (2.1) एव (अ.) शरणम् (1.1) धिक् धिक् वृथा (अ.) पौरुषम् (1.1) ॥

**पदार्थः** यस्य-इन्द्रस्य, नेता-नायकः बृहस्पतिः देवगुरुः, प्रहरणम् - आयुधम्, वज्रम् - कुलिशम्, सैनिकाः - योद्धारः, सुराः - देवाः, दुर्गम्-अगम्यं रक्षास्थानम्, स्वर्गं - नाकः, अनुग्रहः - कृपापरिपालनम्, हरेः - विष्णोः, वारणः - गजः, ऐरावतः दिग्गजेन्द्रः, इति - एवम्, ऐश्वर्यान्वितः असाधारणशक्तियुक्तः, बलभिद् - इन्द्रः, सङ्गरे-युद्धे, भग्नः - पराजितः, तत् - तस्मात् कारणात्, व्यक्तम् - स्फुटम्, यत् ननु - निश्चयेन, दैवमेव - भाग्यमेव, शरणम् - रक्षकम्, वृथा - निरर्थकम्, पौरुषम् - पुरुषकारम्, धिक् धिक् - पुनः पुनः धिक्कारम् अस्तु ॥

**भावार्थः** उपदेष्टा स्वयं बृहस्पतिः, पर्वतपक्षच्छेदने अपि कुण्ठितधाठितधारं कुलिशं, बलवत्तरान् सैनिकान् लब्ध्वा स्वर्गदुर्गे स्थितः विष्णोः अनुग्रहभागपि ऐरावतारुढो महेन्द्रो देवासुरसंग्रामे असुरैः सह यत् पराभवं प्राप्तवान्, तेन अवभासते यत् दैवे अनुकूले सत्येव सदुद्योगः सफलो भवति, नान्यथा ।

**मनसि वचसि काये पुण्यपीयूषपूर्णा-**
**-स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥7॥**

**पदच्छेदः** मनसि (7.1) वचसि (7.1) पुण्यपीयुषपूर्णाः (1.3) त्रिभुवनम् (1.1) उपकारश्रेणिभिः (3.3) प्रीणयन्तः (1.3) परगुणपरमाणून् (2.3) पर्वतीकृत्य नित्यम् निजहृदि (7.1) विकसन्तः (1.3) सन्ति (लट्ल. 1.3) सन्तः (1.3) कियन्तः ॥

**अन्वयः** मनसि वचसि काये पुण्यपीयुषपूर्णाः उपकारश्रेणिभिः त्रिभुवनं प्रीणयन्तः परगुणपरमाणून् पर्वतीकृत्य निजहृदि नित्यं विकसन्तः सन्तःकियन्तः सन्ति ।

**पदार्थः** मनसि-चित्ते, वचसि-वचने कार्ये-शरीरे, पुण्यपीयुषपूर्णाः - मनोवाक्कायैः, उपकारश्रेणिभिः - हिताचरणपरम्पराभिः, त्रिभुवनम्-जगत्त्रयम् त्रिभुवनस्थं जनम्, प्रीणयन्तः सन्तोषयन्तः, परगुणपरमाणून्-लोकान् अत्यल्पगुणानपि, पर्वतीकृत्य-अल्पान् गुणान् महत्तरान् विज्ञाय, निजहृदि-स्वान्तःकरणे, नित्यम्-सततम्, विकसन्तः - हर्षं प्राप्नुवन्तः, सन्तः सज्जनाः, कियन्तः - कतिसंख्याकाः सन्ति ।

**भावार्थः** मनोवाक्कायकर्मभिः उपकारं कुर्वन्तः अन्येषाम् अत्याल्पान् अपि गुणान् अतिबृहद्रूपान् मत्वा प्रसन्नताम् अभिव्यञ्जन्तः विरलाः एव महात्मानः सकललोककल्याणपरायणाः दृश्यन्ते ॥

**अधिगतपरमार्थान् पण्डितान् माऽवमंस्थाः**
**तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि ।**
**अभिनवमदलेखाश्यामगण्डस्थलानां**
**न भवति बिसतन्तुर्वारणं वारणानाम् ॥8॥**

**पदच्छेदः** अधिगतपरमार्थान् (2.3) पण्डितान् (2.3) मा (अ.) अवमंस्थाः (1.3) तृणम् (1.1) इव (अ.)

लघु लक्ष्मीः (1.1) न एव (अ.) तान् (2.3) संरुणद्धि (सम्+ रुध्. लट् 1.1) अभिनवमदलेखाश्यामगण्डस्थलानाम् (6.3) न भवति (लट्ल. 1.1) बिसतन्तुः (1.1) वारणम् (1.1) वारणानाम् (6.3) ॥

**अन्वयः** अधिगतपरमार्थान् पण्डितान् मा अवमंस्थाः, लघु तृणम् इव लक्ष्मीः तान् नैव संरुणद्धि बिसतन्तुः अभिनवमदलेखाश्यामगण्डस्थलानां वारणानां वारणं न भवति ॥

**पदार्थः** अधिगतपरमार्थान् – विज्ञाततत्वार्थान्, पण्डितान् – विदुषः, मा अवमंस्थाः – न अवमानय, लघु – तुच्छम्, तृणमिव – घासमिव, लक्ष्मीः – श्रीः, संपत्तिः, तान् – पण्डितान् नैव संरुणद्धि – ईषदपि नैव संरोद्धुं शक्नोति बिसतन्तुः – कमलनालसूत्रम्, अभिनवमदलेखाश्यामगण्डस्थलानाम्, वारणानाम् – गजानाम्, वारणम् – बन्धनीययुक्तम्, न भवति – न जायते ॥

**भावार्थः** ज्ञाततत्वार्थानां विदुषां कदापि अवमानं न कर्तव्यम् । यथा दुर्बलेन कमलसूत्रेण वारणानां बंधनं न सम्भवति तथा एव निःसारतृणतुल्या लक्ष्म्या लोभरहिताः ज्ञानसंपन्नाः विद्वांसः वशीकर्तुं न शक्या भवितुमर्हति । अतः पण्डितेषु बहुमानाचरणतत्परत्वेन वर्तितव्यम् ॥

**विशेषः** अभिनवमदलेखाश्यामगण्डस्थलानाम् अभिनवा या मदलेखा अभिनवमदलेखा, अभिनवमदलेखया श्यामानि – कृष्णवर्णानि, गंडस्थलानि–कपोलभित्तयः, येषां ते अभिनवमदलेखाश्यामगण्डस्थलाः, तेषां अभिनवमदलेखाश्यामगण्डस्थलानाम् ॥

**लाङ्गूलचालनमधश्चरणावपातं**
**भूमौ निपत्य वदनोदरदर्शनं च ।**
**श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु**
**धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ 10॥**

**पदच्छेदः** लाङ्गूलचालनम् (2.1) अधः (अ.) चरणावपातम् (2.1) भूमौ (7.1) निपत्य वदनोदरदर्शनम् (2.1) च (अ.) श्वा (1.1) पिण्डदस्य (6.1) कुरुते (लट्ल. 1.1) गजपुङ्गवः (1.3) तु धीरम् विलोकयति (लट्ल. 1.1) चाटुशतैः (3.3) च (अ.) भुङ्क्ते (लट्ल. 1.1) ॥

**अन्वयः** श्वा पिण्डदस्य (अग्रे) लाङ्गूलचालनम् अधः चरणावपातम्, भूमौ निपत्य वदनोदरदर्शनं च कुरुते । गजपुङ्गवः तु धीरं विलोकयति चाटुशतैः च भुङ्क्ते ॥

**पदार्थः** श्वा–सारमेयः, पिण्डदस्य–भोजयितुः (अग्रे) लाङ्गुलचालनम् – पुच्छविवर्तनम्, अधः – नीचैः, चरणावपातम् – पादयोः पतनम् भूमौ पृथिव्याम्, निपत्य – पतित्वा, वदनोदरदर्शनम् – मुखजठरप्रदर्शनम्, च कुरुते – विधत्ते, नीचनिजचेष्टामाविष्कुरुते, गजपुङ्गवः – हस्तिश्रेष्ठः तु – पुनः, पिण्डदस्य अग्रे, धीरम् – गंभीरम् यथा स्यात् तथा, विलोकयति – पश्यति, चाटुशतैः अनेकप्रयोक्तिभिः च भुङ्क्ते – खादति।

**भावार्थः** यथा सारमेयः भोजनदातुः पुरस्तात् अग्रे निपत्य पुच्छं चालयन् वदनमुदरं च प्रदर्शयन् स्वां प्रसन्नतां प्रकटयति तथा एव अधमप्रकृतिकः मानवः आश्रयदातुः अग्रे क्षुद्रतां दर्शयन् तदनुकुलम् एव अभिभाषते । किन्तु उत्तमप्रकृतिकाः मानवाः सस्नेहं गम्भीरतामात्रमेव व्यनक्ति ॥

**नैवाकृतिः फलति नैव कुलं न शीलं**
**विद्याऽपि नैव न च यत्नकृताऽपि सेवा ।**
**भाग्यानि पूर्वतपसा खलु सञ्चितानि**
**काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ 11॥**

**पदच्छेदः** न एव (अ.) आकृतिः (1.1) फलति (लट्ल. 1.1) न एव कुलम् (1.1) न शीलम् (1.1) विद्या (1.1) अपि (अ.) न एव न यत्नकृता अपि सेवा भाग्यानि (1.3) पूर्वतपसा (1.3) खलु सञ्चितानि (1.3) काले (7.1) फलन्ति (लट्ल. 1.3) पुरुषस्य (6.1) यथा एव वृक्षाः (1.3) ।

**अन्वयः** आकृतिः – नैव फलति कुलं नैव फलति, शीलं न, विद्याऽपि न, यत्नकृताऽपि सेवा न फलति, किन्तु पूर्वतपसा सञ्चितानि पुरुषस्य भाग्यानि खलु यथा एव वृक्षाः काले फलन्ति ।

**पदार्थः** आकृति : आकारः, रूपसम्पत्तिः, नैव फलति – न फलं निष्पादयति, कुलम् – निर्मलो वंशः, नैव फलति जनयति, शीलम् – सदाचरणम् सत्स्वभावः, विद्याऽपि न – वेदशास्त्रादिज्ञानमपि नैव फलति, यत्नकृता – प्रयत्नानुष्ठिता, सेवा – राजादिपरिचर्या अपि न फलति, किन्तु पूर्वतपसा – पूर्वसुकृतेन, सञ्चितानि – सम्पादितानि, पुरुषस्य – मानवस्य, भाग्यानि – दैवम्, वृक्षाः – तरवः, काले – समये, फलन्ति – फलं ददाति ॥

**भावार्थः** पुरुषस्य रूपकुलशीलविद्याराजसेवादिकं जगति सम्मानादिकं न जनयति । किन्तु केवलं पूर्वसुकृतमेव समये रसालादिवृक्षाः इव अभिलषितं मनोरथं सम्पादयितुं प्रभवति । अतः लोके नरैः सुकृतैः एव अभीप्सितं साधयितुं प्रयत्नः विधेयः ॥

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।**
**अद्यैव वा मरणमस्तु युगान्तरे वा**
**न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥ 12॥**

**पदच्छेदः** निन्दन्तु (लोट्ल 1.3) नीतिनिपुणाः (1.3) यदि (अ.) वा स्तुवन्तु (लोट्ल 1.3) लक्ष्मीः (1.1) समाविशतु (लोट्ल. 1.1) गच्छतु (लोट्ल 1.1) वा यथा (अ.) इष्टम् (1.1) अद्य (अ.) एव वा मरणम् (1.1) अस्तु (लोट्ल. 1.1) युगान्तरे (7.1) वा न्याय्यात् (5.1) पथः (5.1) प्रविचलन्ति (लट्ल. 1.3) पदम् (1.1) न धीराः (1.3) ॥

**अन्वयः** नीतिनिपुणाः निन्दन्तु यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु वा यथेष्टम् गच्छतु, मरणमद्यैव वा अस्तु युगान्तरे वा (अस्तु), धीराः न्याय्यात् पथः पद्म (अपि) न प्रविचलन्ति ॥

**पदार्थः** नीतिनिपुणाः – नयशास्त्रविशारदाः, निन्दन्तु – कथञ्चिद् दुष्यन्तु, यदि वा – अथवा, स्तुवन्तु – स्तुतिं कुर्वन्तु, लक्ष्मीः – सम्पत्तिः, समाविशतु – समीपमागच्छतु, वा – यद्वा यथेष्टम् – स्वेच्छानुसारम्, गच्छतु – दूरे भवतु, मरणम् – मृत्युः, अद्यैव – अस्मिन्नेव काले वा, अस्तु – भवतु, वा – अथवा, युगान्तरे – अन्यस्मिन् युगे, अस्तु – भवतु, धीराः – धैर्यशालिनः पुरुषाः न्याय्यात् – न्यायोचितात्, पथः – मार्गात्, पदमपि – एकचरणमपि, न प्रविचलन्ति – न गच्छति न्यायमार्गमेव अनुसरन्ति ॥

**भावार्थः** धीराः पुरुषाः निन्दास्तुत्यादिकं किमपि अपेक्ष्य कदापि न्यायमार्गात् पराङ्मुखाः न भवन्ति, अपि तु सर्वदा न्यायसङ्गतमेव कार्य कुर्वन्ति । तेषां परमार्थः न्यायमार्गापरित्याग एव परमार्थः, न स्तुत्यादि इति भावः ॥

**क्वचित् भूमौ शय्यः क्वचिदपि च पर्यङ्कशयनः**
**क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।**
**क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो**
**मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ 13 ॥**

**पदच्छेदः** क्वचित् भूमौ (7.1) शय्यः क्वचित् अपि (अ.) च पर्यङ्कशयनः (1.1) क्वचित् शाकाहारः (1.1) क्वचित् अपि च शाल्योदनरुचिः (1.1) क्वचित् कन्थाधारी (1.1) क्वचित् अपि च दिव्याम्बरधरः (1.1) मनस्वी (1.1) कार्यार्थी (1.1) न गणयति (लट्ल. 1.1) सुखम् न च दुःखम् ॥

**अन्वयः** कार्यार्थी मनस्वी (पुरुषः) क्वचित् भूमौ शय्यः अपि च क्वचित् पर्यङ्कशयनः क्वचित् शाकाहारः, अपि च क्वचित् शाल्योदनरुचिः, क्वचित् कन्थाधारी, अपि च क्वचित् दिव्याम्बरधरः दुःखं न गणयति सुखं च न गणयति ।

**पदार्थः** कार्यार्थी – कार्यनिष्पत्यभिलाषी, मनस्वी – स्थिरचित्तः, (पुरुषः), क्वचित् – कुत्रचित्, भूमौ – पृथिव्याम्, शय्यः – शयानः, अपि च – किञ्च, क्वचित् – कुत्रचित्, पर्यङ्कशयनः – मृदुलतरशय्याशायी, क्वचित् शाकाहारः – नीरसाहारः, अपि च क्वचित् शाल्योदनरुचिः – कलमाद्यस्पृहः रुचिकरभोजनम् इत्यर्थः, क्वचित् कन्थाधारी – जीर्णशीर्णवस्त्रखण्डनिर्मितं धारयति इति कन्थाधारी, अपि च क्वचित् दिव्याम्बरधरः – अलौकिकवस्त्रधरः दुःखम् – पृथ्वीशयनादिना व्यथाम्, सुखम् – पर्यङ्कशयनादिना शर्म च न गणयति – न अपेक्षिते ॥

**भावार्थः** दृढतया कार्यसाधने प्रवृत्तः पुमान् समयानुसारं कुसुमकोमले पर्यङ्के तृणाङ्कुरपूर्णायां भूमौ वा शयानः सरसं शाल्यान्नं नीरसं शाकं वा भुञ्जानः, कनकपीताम्बरं जीर्णं शीर्णं च वस्त्रं दधानः न सुखी नापि दुःखी भवतीति ॥

**वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-**
**प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।**
**तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे**
**न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥ 14 ॥**

**पदच्छेदः** वरम् (1.1) पक्षच्छेदः (1.1) समदमघवन्मुक्तकुलिशप्रहारैः (3.3) उद्गच्छद्बहुल-दहनोद्गारगुरुभिः (3.3) तुषाराद्रेः (6.1) सूनोः (6.1) अहह ! पितरि (7.1) क्लेशविवशे (7.1) न च (अ.) असौ (1.1) सम्पातः पयसि (7.1) पयसाम् (6.3) पत्युः (6.1) उचितः ।

**अन्वयः** तुषाराद्रेः सूनोः उद्गच्छद्बहुलदहनोद्गारगुरुभिः समदमघवन्मुक्तकुलिशप्रहारैः पक्षच्छेदः वरम् (किन्तु) अहह ! पितरि क्लेशविवशे (सति) पयसां पत्युः पयसि असौ सम्पातः न च उचितः ।

**पदार्थः** तुषाराद्रेः – हिमालयपर्वतस्य, सूनोः – पुत्रस्य, उद्गच्छद्बहुलदहनोद्गारगुरुभिः – शीलासङ्घर्षजनित-वह्निः – निःसरण-दुःसहैः, समदमघवन्मुक्तकुलिशप्रहारैः – सदर्पदेवेन्द्रप्रयुक्तवज्रायुधविदारणैः पक्षच्छेदः –

पक्षविदारणम्, वरम् – श्रेष्ठम् (किन्तु) अहह ! – कष्टम्, पितरि – जनके हिमालये, क्लेशविवशे – वज्रप्रहारजनितदुःखविह्वले (सति) पयसा – जलानाम्, पत्युः स्वामिनः समुद्रस्य, पयसि – सलिले, असौ सम्पातः अयं प्रवेशः निजप्राणरक्षार्थं निमज्ज्यावस्थानम्, न च उचितः – न योग्यः ॥

**भावार्थः** वज्रेण पर्वतानां पक्षान् भेत्तुं प्रवृत्तं देवराजम् इन्द्रं दृष्ट्वा हिमालयपुत्रमैनाकः स्वजनके समागतामापदं दृष्ट्वा स्वरक्षार्थं समुद्रे प्रच्छन्नः जातः । तत् उचितं नास्ति, तदा इन्द्रस्य समक्षं स्थित्वा पितुः साहाय्यं कर्तव्यम् इति । एवं मानशौर्यसम्पन्नपुरुषस्य स्वप्राणरक्षा एव स्वकर्तव्यं नास्ति । स्वप्राणत्यागेनापि मानशौर्यं प्रतिष्ठापनीयम् इति ॥

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(1) पिपासार्दितः मृगतृष्णिकासु किं पिबेत्?

(क) दुग्धम् (ख) तक्रम् (ग) तैलम् (घ) सलिलम्

(2) केचिद् जलदाः वृष्टिभिः काम् आर्द्रयन्ति?

(क) गाम् (ख) वसुधाम् (ग) चातकम् (घ) अम्भोदम्

(3) दिवसधूसरः कः शल्यम् इव अस्ति?

(क) चन्द्रमाः (ख) सूर्यः (ग) नक्षत्रम् (घ) तारकम्

(4) कस्य शरीरं विततम् उर्जितम् भरसहं च वर्तते?

(क) समुद्रस्य (ख) गजेन्द्रस्य (ग) पर्वतस्य (घ) केशवस्य

(5) कस्य खगस्य मुखे मेघस्य धारा पतति?

(क) चातकस्य (ख) मयूरस्य (ग) कपोतस्य (घ) काकस्य

(6) सिकतासु इत्यस्य कः अर्थः?

(क) चन्द्रमासु (ख) मृगतृष्णिकासु (ग) वालुकासु (घ) पिपासासु

(7) सुराः कस्य सैनिकाः आसन्?

(क) बृहस्पतेः (ख) इन्द्रस्य (ग) दानवानाम् (घ) हरेः

(8) परगुणपरमाणून् नित्यं के पर्वती कुर्वन्ति?

(क) दुर्जनाः (ख) सन्तः (ग) पण्डिताः (घ) विद्वांसः

(9) किदृशान् पण्डितान् न अवमानयेत्?

(क) संस्कृतज्ञान् (ख) शस्त्रज्ञान् (ग) बलवत्तरान् (घ) अधिगतपरमार्थान्

(10) न्याय्यात् पथः के न प्रविचलन्ति?

(क) खलाः (ख) तेजस्विनः (ग) धीराः (घ) वाक्कीलाः

**2. अधस्तनानां प्रश्नानां लघूत्तरं ददतु ।**

(1) कीदृशस्य जनस्य चित्तं न आराधयेत्?

(2) सिन्धौ कैः सह वडवानलः स्थितः?

(3) हिमालयपुत्रः स्वरक्षार्थं कुत्र प्रच्छन्नः अभवत्?

(4) पुरुषस्य किं यथाकाले फलन्ति?

**3. विस्तरेण उत्तरं ददत ।**

(1) सुभाषितकारस्य मनसि शल्यानि इव सप्त कानि सन्ति?

(2) मनस्वी कार्यार्थी किदृशी अवस्थायां दुःखं सुखं न गणयति?

(३) हिमालयपुत्रेण किं सम्यक् नाचरितम्?

**4. श्लोकपूर्ति कुरुत ।**

(1) रेरे चातक ................. दीनं वचः ॥

(2) क्वचित् भूमौ ................. न च सुखम् ॥

(3) मनसि वचसि ................. सन्तः कियन्तः

●

# 20. नवधा भक्तिः

भज सेवायाम् धातुना रचितस्य भक्तिप्रातिपदिकस्य विविधेषु अर्थेषु प्रयोगो भवति । वस्तु तस्य अतीव प्रचलितः सरलार्थः भक्तस्य भजनीयस्य च अभिन्नतया क्रियमाणासु सर्वासु क्रियासु तल्लीनत्वस्य प्रापकं साधनं भक्तिः इति वर्तते । तथा हि यः विभक्तः नास्ति सः भक्तः । भक्त इत्यस्य कोषगतः एकः अर्थः ओदनः अपि भवति । यथा ओदने विक्लिन्नाः तण्डुलस्य कणाः (अक्षताः) परस्परम् ओतप्रोताः संश्लिष्टाः वा भवन्ति तथैव भक्ताः भजनीयाः च परस्परं भावयन्तः तादात्म्यं प्राप्ताः (एकरूपाः इव) भवन्ति ।

अस्मिन् पाठे प्रस्तुतेषु नवधा भक्तिप्रकारेषु केचन शिक्षणस्य सिद्धान्तत्वेन अपि स्वीकृताः सन्ति । यथा शिक्षणे प्रथमं श्रवणम्, भक्तौ अपि तथा । कथनं पठनं वा कीर्तनभक्तौ समाविश्यते । स्मरणस्य अपि भक्तिशिक्षणयोः (उभयत्र) समन्वयः। पादसेवने संस्कृतस्य वाङ्मये सूत्राणां कारिकाणां श्लोकस्य पादानां पदानां वा सम्यक् व्युत्पत्तेः ज्ञानम् एव सेवनम् (अर्थात् अभ्यासः) अपि शिक्षणेन सङ्गतम् एव । इत्थम् भक्तेः वर्णनं रुचिकरं प्रासङ्गिकं च अत्र सरलतया प्रस्तुतम् अस्ति । यावत् कार्यस्य महत्त्वं न ज्ञायते तावत् तत्र प्रवृत्तिः न भवति । अतः किञ्चिद् भक्तेः महत्त्वम् अपि अत्र पाठे वर्णितम्।

---

श्रीमद्भागवते महापुराणे पितुः हिरण्यकशिपोः ''वत्स ! किम् अधीतम् ?'' इति प्रश्नस्य उत्तररूपेण प्रह्लादेन उच्चारितः प्रसिद्धः भक्तेः प्रकाराणां निरूपकः श्लोकः यत् –

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ ( श्रीमद्भागवतम् – 7.5.23 )**

अस्य श्लोकस्य क्रमानुसारम् उदाहरणेन सहितं कश्चित् कविः भक्तिप्रकारान् तत्सम्बद्धान् भक्तान् च शार्दूलविक्रीडितम् नामके वृत्ते रचितेन श्लोकेन वर्णयति –

**विष्णोस्तु श्रवणे परीक्षिदभवद् वैयासकिः कीर्तने**
**प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।**
**अक्रूरस्त्वभिवन्दनेऽथ हनुमान् दास्येऽथ सख्येऽर्जुनः**
**सर्वस्वात्मनिवेदने बलिरभूत् सद्भक्तिरेषां फलम् ॥**

**पदच्छेदः** विष्णोः (6.1), तु (अ.), श्रवणे (7.1), परीक्षित् (1.1), अभवत् (लोट् 1.1), वैयासकिः (1.1), कीर्तने (7.1), प्रह्लादः (1.1), स्मरणे (7.1), तदङ्घ्रिभजने (7.1), लक्ष्मीः (1.1), पृथुः (1.1), पूजने । (7.1), अक्रूरः (1.1), तु (अ.), अभिवन्दने (1.1), अथ (अ.), हनुमान् (1.1), दास्ये (7.1), अथ (अ.) सख्ये (7.1), अर्जुनः (1.1), सर्वस्वात्मनिवेदने (7.1), बलिः (1.1), अभूत् (लुङ् 1.1), सद्भक्तिः (1.1) एषाम् (7.1), फलम् (1.1) ॥

**अन्वयः** तु विष्णोः श्रवणे परीक्षित् कीर्तने वैयासकिः स्मरणे प्रह्लादः तदङ्घ्रिभजने लक्ष्मीः पूजने पृथुः अभिवन्दने तु अक्रूरः अथ हनुमान् दास्ये अथ अर्जुनः सख्ये सर्वस्वात्मनिवेदने बलिः अभवत् । एषां फलं सद्भक्तिः ।

**पदार्थः** विष्णोः – (अत्र) परमात्मनः, तु – खलु, श्रवणे – आकर्णने, परीक्षित् – अभिमन्युपुत्रः/अर्जुनपौत्रः, अभवत् – अजायत, वैयासकिः – शुकदेवः (व्यासस्य अपत्यं पुमान्), कीर्तने – नामयशोगाने/चरितगाने (नामजपे वा), प्रह्लादः – हिरण्यकशिपोः पुत्रः, स्मरणे – स्मृतौ, तदङ्घ्रिभजने तस्य (विष्णोः) पादसेवने, लक्ष्मीः

– विष्णुपत्नी, पृथुः – पृथ्वीपतिः (यस्य ओषधीनां दोहनकर्मणा भूमेः पृथ्वी इति नाम ख्यातम्), पूजने – अर्चने, अक्रूरः – कृष्णपितृव्यः (वसुदेवस्य भ्राता), तु – निश्चितम्, अभिवन्दने – परिप्रणामे, अथ – तदनन्तरम् (ततः), हनुमान् – मारुतिः, दास्ये – सेवकमत्वे, अथ – तदनु, सख्ये – मैत्र्याम्, अर्जुनः – पार्थः/गाण्डीवी, सर्वस्वात्मनिवेदने – सम्पूर्णधननिजसमर्पणे (निःशेषेण समस्तायाः सम्पत्तेः आत्मनः च निवेदने), बलिः – विरोचनपुत्रः/प्रह्लादपौत्रः, अभूत् – अजनिष्ट/बभूव, सद्भक्तिः – सत्प्रेम/सदैक्यम्, एषाम् – अमीषाम् (भक्तानाम् अथवा भक्तिमार्गाणाम् वा), फलम् – परिणामः/प्रयोजनम्/अर्थः ॥

**भावार्थः** परमात्मनः श्रवणभक्तौ अभिमन्योः पुत्रः अर्जुनस्य पौत्रः परीक्षित् श्रीमद्भागवतमहापुराणस्य श्रोता तथा च कृष्णद्वैपायनस्य व्यासस्य पुत्रः श्रीशुकदेवः कथाद्वारा कीर्तनभक्तेः उदाहरणरूपः अभवत् । सततं भगवन्नाम्नः अनुसन्धानकर्ता स्मरणभक्तौ नृसिंहभक्तः प्रह्लादः प्रसिद्धः । शेषशायिनः नारायणस्य सततं चरणसेवां कुर्वाणा पत्नी समुद्रसुता लक्ष्मीः अस्ति । यः धराम् अन्नम् ओषधिसत्त्वं च दुदोह तादृशः पृथुः परमेश्वरस्य अर्चनभक्तेः विषये पुराणप्रसिद्धः अस्ति । श्रीकृष्णस्य पितुः वसुदेवस्य अनुजः अक्रूरः प्रणामात्मिकां भक्तिं कृतवान् । ततः हनुमान् श्रीरामस्य अनन्यसेवकत्वं स्वीकृतवान् तथा च गाण्डीवधारी कुन्तीपुत्रः अर्जुनः श्रीकृष्णं सख्यभक्त्या आराधितवान् एवं पितामहस्य समर्पितवान् । अत्र वर्णितानां भक्तानां भक्तिमार्गाणां च प्रयोजनम् अपि सतः भक्तिः अर्थात् भगवतः सायुज्यं तद्रूपत्वं चैव अस्ति ।

**विशेष :** भजो आमर्दने इत्यस्मात् (लक्षणा इति एका शब्दशक्तिः अस्ति । तस्याः विषये अपि) भक्तिः इति शास्त्रीयग्रन्थेषु उपयुज्यते, मुख्यार्थस्य भङ्गो भक्तिः इति पृथक् बोध्यम् ।

नारदः स्वभक्तिसूत्रस्य आरम्भे अथातो भक्तिं व्याख्यास्यामः (नारदभक्तिसूत्रम् 1.1) । इत्यस्मिन् सन्दर्भे भक्तेः फलमपि भक्तिः एव अस्ति । कर्मयोगात् ज्ञानयोगात् साङ्ख्ययोगात् च अपि भक्तेः महत्त्वम् अधिकम् अस्ति । प्रीतिरूपायाः भक्तेः वर्णनं पूर्णतया कर्तुं न शक्यते इत्यादिकं प्रतिपादितवान् । सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा फलरूपत्वात् (तत्रैव 2.25, भक्तिज्ञः । 26) अनिर्वचनीयं प्रेमस्वरूपम् भक्तिः । (तत्रैव 4.1)

मध्यकालीनेषु आधुनिकेषु च ज्ञानेश्वरः, तुकारामः, नामदेवः, तिरुवल्लुवरः, जलारामः एवम् आदयः भक्ताः यशःशरीरेण वर्तन्ते । मीरां, नरसिंहमहेता, रैदासः, चण्डीदासः एवम् आदयो भक्तकवर्याः भारतभुवं भक्तिरसधाराभिषेकेण अभिषिच्य आप्लावयन्ति । श्रीमान् मधुसूदनसरस्वतीमहाशयः भक्तिरसायनम् नामके स्वग्रन्थे भक्तेः रसत्वं साधितवान् अस्ति यत्र भक्तहृदये जतु–(लाक्षा–) रसः इव द्रवते ।

भक्तिदेव्याः सुतौ ज्ञानवैराग्यनामकौ स्तः । अतः यावद् मानवेषु भक्तिः न जागर्ति तावद् ज्ञानं वैराग्योत्पत्तिः वा अशक्या ।

**भक्तिः**

- परा
  - शुद्धा
    - सात्त्विकी
    - राजसी
    - तामसी
  - गौणी
    - सात्त्विकी
    - राजसी
    - तामसी
- अपरा
  - शुद्धा
    - सात्त्विकी
    - राजसी
    - तामसी
  - गौणी
    - सात्त्विकी
    - राजसी
    - तामसी

– स्वयं प्रमाणरूपा शान्तिरूपा परमानन्दरूपा । कुमार (कार्तिकेय)-व्यास-शुक-शाण्डिल्य-गर्ग-विष्णु-कौण्डिन्य-शेषोद्वारुणि-बलि-हनुमद्विभीषणादयो भक्ताचार्या: (ना. भ. सू. 5.83) ।

शुद्धाद्वैतवादस्य प्रवर्तकेन जगद्गुरुणा श्रीमद्वल्लभाचार्येण प्रवर्तिते पुष्टिमार्गे सूरदासादय: अष्टसखा: प्रसिद्धा: सन्ति, तत्र च सेवाभक्ते: विषये विशिष्टं कथनम् अस्ति, तनुजा वित्तजा चैव मानसी सा परा मता इति – या सेवा शरीरद्वारा धनधान्यादिद्वारा वा भवति ताभ्याम् उत्तमा भावेन कल्पनया (शिवमानसपूजावत्) कृता सेवा भवति ।

भक्तप्रकारेषु श्रीमद्भगवद्गीतायाम् उक्तम् –

''आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ !'' इति ।

अत्र कृष्ण: कथयति, संसारस्य तापेन त्रस्त: (श्रान्त:) भयभीत: वा, ज्ञानं प्राप्तुम् इच्छुक:, धनधान्यस्य याचक: तथा च ज्ञानवान् इति चतुर्विधा: भक्ता: मम भजनं कुर्वन्ति । एतेषु ज्ञानवान् मह्यम् अतीव रोचते ।

तपस्विन: मुनय: योगिन: यं परमानन्दम् अतीव कष्टेन अनुभवन्ति तमेव गोपीजनादय: भक्ता: भक्त्या भजनानन्दम् अनुभवन्ति । तन्त्रमार्गे (दशमहाविद्यायाम्/श्रीविद्यायाम्) अपि भजनस्य श्रीमद्भगवद्गीतायाम् उक्तस्य श्रीकृष्णप्रियस्य जपयज्ञस्य एव अर्थात् कीर्तनभक्ते: एव महत्त्वं विद्यते ।

अत: सारभूतम् इदमेव श्रीमद्भागवतमहापुराणस्य वाक्यं यत् –

**अलं व्रतैरलं तीर्थैरलं योगैरलं मखै: । अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥**

हे मानवा: ! अद्यावधि बहुविधानि व्रतानि कृतानि, बहुषु तीर्थेषु भ्रमणानि स्नानानि च कृतानि, बहुनि योगासनानि प्राणायामादिकं च कृतम्, अनेके यज्ञा: कृता: बहु बहु प्रवचनानि भाषणानि कथा: च श्रुता: (तथापि किमपि न प्राप्तम्) अधुना पर्याप्तम् एका भक्ति: एव जीवन-मरणयो: चक्रात् मोचयितुं समर्था अस्ति ॥

## स्वाध्याय:

**1. बहुविकल्पप्रश्ना: ।**

(1) भक्तिशब्द: कस्माद् धातो: उत्पन्न: ?

(क) भुज (ख) भजो (ग) भज (घ) एतेषु नैकमपि

(2) भक्त इत्यस्य भोजनविषयक: अर्थ: क: ?

(क) सूप: (ख) ओदन: (ग) तण्डुलकणा: (घ) एतेषु नैकमपि

(3) नारदानुसारं भक्ते: फलं किम् ?

(क) भोजनम् (ख) भजनम् (ग) भक्तिरेव (घ) मोक्ष:

(4) भक्तिदेव्या: सुतौ कौ ?

(क) काममोक्षो (ख) प्रह्लादनारदौ (ग) भक्तभगवन्तौ (घ) एतेषु नैकमपि

(5) श्रीमद्वल्लभाचार्य: कस्य मार्गस्य प्रवर्तक: ?

(क) भक्ति- (ख) कीर्तन- (ग) स्मरण- (घ) पुष्टि-

(6) सेवनभक्तौ श्रीमद्वल्लभाचार्य: कां सेवाम् उत्तमां (परां) मन्यते ?

(क) तनुजाम् (ख) मानसीम् (ग) वित्तजाम् (घ) दम्भजाम्

(7) श्रवणभक्तौ को भक्त: पुराणप्रसिद्ध: ?

(क) ध्रुव: (ख) प्रह्लाद: (ग) शुक: (घ) एतेषु नैकमपि

(8) कीर्तनभक्तेः उदाहरणभूतो भक्तः कः ?

(क) ध्रुवः (ख) प्रह्लादः (ग) शुकः (घ) एतेषु नैकमपि

(9) दास्यभक्तौ कः प्रख्यातः ?

(क) ध्रुवः (ख) प्रह्लादः (ग) शुकः (घ) एतेषु नैकमपि

(10) अर्जुनः कां भक्तिं कृतवान् ?

(क) श्रवण- (ख) कीर्तन- (ग) सख्य- (घ) वन्दन-

(11) नवधा पदमस्ति-

(क) स्त्रीलिङ्गे 1.1 (ख) अ. (ग) 3.1 (घ) एतेषु नैकमपि

**2. परस्परं समन्वयः करणीयः ।**

| भक्तः | भक्तिः |
|---|---|
| (1) बलिः | (1) आत्मनिवेदनम् |
| (2) परीक्षित् | (2) श्रवणम् |
| (3) प्रह्लादः | (3) स्मरणम् |
| (4) लक्ष्मीः | (4) पादसेवनम् |
| (5) पृथुः | (5) पूजनम् (अर्चनम्) |
| (6) हनुमान् | (6) दास्यम् |
| (7) अक्रूरः | (7) अभिवन्दनम् |
| | (8) सख्यम् |

**3. एकैकवाक्यद्वारा उत्तराणि ( अतिलघूत्तराणि ) लेख्यानि ।**

(1) नारदभक्तिसूत्रे कति भक्तानां नामानि सन्ति ?

(२) प्रह्लादस्य पितुः किं नामधेयम् ?

(3) भक्तेः मुख्यप्रकारनामोल्लेखः कर्तव्यः ।

(4) शुकः कस्य पुत्रः ?

(5) सद्भक्तिरेषां फलम् इत्यत्र एषाम् पदन किं गृहन्ते ?

**4. सन्दर्भसहितं भावार्थो लेख्यः।**

(1) अथातो भक्तिं व्याख्यास्यामः ।

(2) भक्तिरसायनम्।

**5. सविस्तरम् उत्तरं लेख्यम्।**

(1) शिक्षणशास्त्रेण सह भक्तेः सम्बन्धो वर्णनीयः ।

(2) अस्मिन् पाठे श्रीमद्भगवद्गीताया उद्धरणानि ।

(3) योगानुष्ठानयज्ञापेक्षया भक्तेः मुक्तिदायकत्वम् ।

(4) मध्यकालीनाः अर्वाचीनाश्च प्रसिद्धा भक्ताः ।

6. **सूचनानुसारं लेख्यम् ।**

(1) सा तु कर्मज्ञानयोगेभ्योऽधिकतरा फलरूपत्वात् (सन्दर्भो लेख्यः) ।

(2) वैयासकिः (अर्थसहितं विग्रहो लेख्यः)

(3) लक्ष्मीः (विभक्तिपरिचयो लेख्यः)

(4) स्वपितरि (विभक्तिवचनपरिवर्तनं करणीयम्)

(5) सख्येऽर्जुनः (सन्धिः विच्छेद्यः)

**शिक्षकप्रवृत्तिः**

- शिक्षकाः प्रत्येकभक्तिविषये छात्रोत्कण्ठोत्पादनाय पौराणिकसन्दर्भयुताः विशेषतश्च प्रह्लादहनुमतोः कथाः कथयेयुः । यथा–
- वैश्विकदृष्टिकोणेन कबीर–मंसूरादीनां परिचयपूर्वकं भक्तिमहत्वं वर्णयेयुः ।
- एतादृशानि अन्यानि पद्यानि वर्णयेयुः लघुनाटकार्थं च प्रेरयेयुः ।

वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रमाणे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥
(श्रीमद्भागवतम् – 10.10.38) इत्यस्य प्रायोगिकं कर्म साधनीयम् ॥

**छात्रप्रवृत्तिः**

- श्रुताः कथाः पुनः स्वबालभाषया कथयेयुः ।
- प्रियभक्तं चित्वा तद्विषयकं लघुनाटकं कुर्युः ।
- विश्वस्मिन् प्रसिद्धानाम् अन्येषां भक्तानां नामचरितानि पृच्छेयुः पठेयुश्च ।

●

# 21. प्रश्नोत्तरपद्यानि

संस्कृतकाव्यस्य जगति हि अन्तरालापाः बहिरालापाः गूढचतुर्थपादः इति एतादृशीषु विविधासु काव्यस्य विधासु वाकोवाक्यम् इत्यपि एका अस्ति कर्णमनसोः तर्पणकारी उत्कण्ठोत्पादकः कश्चित् काव्यकलापः । यत्र समानपद्ये एव एकाधिकानां पात्राणां प्रश्नोत्तररूपस्य संवादस्य गुम्फनं क्रियते । कदाचित् तत्र सामान्यैः वार्तालापवाक्यैः कदाचित् श्लिष्टैः (एकाधिकार्थक-) वाक्यैः कटाक्षात्मकैः पदैः वा रोचकं सम्भाषणं निहितं भवति ।

अस्मिन् पाठे गिरिजासमुद्रसुतयोः (उमा-लक्ष्म्योः) क्वचित् कदाचित् मेलने जाते सति स्वस्य स्वस्य पति-(शिव-विष्णु)विषयकम् ईषत् श्लिष्टैः विशेषणैः कटाक्षात्मकं परिहासजनकं रोचकं प्रश्नोत्तरात्मकम् अपि च आशीर्वादात्मकेन पद्येन सम्भाषणं शार्दूलविक्रीडितवृत्ते समुपनिबद्धं नाटकीयं स्वरूपं दधत् प्रस्तुतिं नीतम् ।

---

पद्यम्

**भिक्षुः क्वास्ति? बलेर्मखे, पशुपतिः किं नास्त्यसौ गोकुले?**
**मुग्धे! पन्नगभूषणः सखि! सदा शेते च तस्योपरि ।**
**आर्ये! मुञ्च विषादमाशु, कमले! नाहं प्रकृत्या चल ।**
**चेत्थं वै गिरिजासमुद्रसुतयोः सम्भाषणं पातु वः ॥**

इदमेव नाटकीयसंवादस्वरूपेण सान्वयमिव यथा-

| **वक्त्री** | **- संवादे अन्वितानि वाक्यानि** | कथनस्य तात्पर्यम् |
|---|---|---|
| लक्ष्मीः | - मुग्धे! भिक्षुः कः अस्ति ? | उमे! तव/भवत्याः पतिः भिक्षुकः कुत्र अस्ति । |
| उमा | - सखि! बलेः मखम् (गतः) | बलिराजस्य मखे तव पतिः अपि वामनरूपेण पदत्रयभिक्षां याचितवान् । |
| लक्ष्मीः | - पशुपतिः (केदार-नेपालयोः) | तव/भवत्याः पतिः पशूनां पतिः महिषरूपधरो वास्ति । |
| उमा | - किं असौ (कृष्णः) गोकुले (तथा) न अस्ति? | किं तव/भवत्याः पतिः अपि गोकुले पशूनां गोवत्सपालनं न कृतवान्? |
| लक्ष्मीः | - मुग्धे! पन्नगभूषणः | तव/भवत्याः पतिः भुजगाङ्कारः अस्ति । |
| उमा | - सखि! सदा तस्य (पन्नगस्य) उपरि शेते च | किन्तु भवत्याः पतिः तु कालियसर्पस्य स्फटाटोपे नृत्यन् भवति । |
| लक्ष्मीः | - आर्ये! विषादम् मुञ्च | अयि संस्कारसम्पन्ने! गरलभक्षणकर्तारम् एतादृशं पतिं त्यज। |
| उमा | - कमले! अहं प्रकृत्या चला न (अस्मि) | अयि कमलासने! अहं (भवादृशी) स्वभावेन चञ्चला नास्मि । |

वै इत्थं गिरिजासमुद्रसुतयोः सम्भाषणं वः पातु । (इति अन्वयः)

अनेन प्रकारेण द्वयोः सख्योः मधुर-कलहरूपः वार्तालापः युष्मान् रक्षतु इति भावः ।

अस्मिन् पद्ये प्रयुक्तानां पदानां शिवविष्णु-(हरिहर-)परकतया इत्थं विभाजनं स्पष्टीकर्तुं शक्यते –

| **विशेषणपदानि** | **शिवपरकार्थः** | **विष्णुपरकार्थः** |
|---|---|---|
| भिक्षुः | साधुवेषत्वात् | वामनरूपत्वात् |
| पशुपतिः | महिषरूपत्वात् | गोपालकत्वात् |
| पन्नगभूषणः | सर्पालङ्कारत्वात् | शेषशायित्वात् |

**पदच्छेदः** – भिक्षुः (1.1), क्व (अ.), अस्ति (लट्. प्र. 1), बलेः (6.1), मखम् (2.1), पशुपतिः (1.1), किम् (अ.), न (अ.) अस्ति (लट् प्र. 1), असौ (1.1), गोकुले (7.1), मुग्धे (संबो.), पन्नगभूषणः (1.1), सखि ! (संबो.), सदा (अ.), शेते (लट् प्र. 1), च (अ.), तस्य (6.1), उपरि (अ.) । आर्ये! (संबो.), मुञ्च (लोट् म. 1), विषादम् (2.1), आशु (अ.), कमले ! (संबो.), न (अ.), अहम् (1.1), प्रकृत्या (3.1) चला (1.1), च (अ.), इत्थम् (अ.) वै (अ.), गिरिजासमुद्रसुतयोः (6.2), सम्भाषणम् (1.1) पातु (लोट् प्र. 1), वः (2.3) ॥

**पदार्थः** – भिक्षुः – साधु/याचकः, क्व – कुत्र, अस्ति – वर्तते, बलेः – बलिराजस्य (प्रह्लादस्य पौत्रस्य), मखम् – यज्ञम्/अध्वरम्, पशुपतिः – शिवः (अत्र महिषः), किम् – ननु, न – नो, अस्ति – वर्तते, असौ – एषः (अत्र कृष्णः), गोकुलं – नन्दग्रामे, मुग्धे! – अनभिज्ञे! (अल्पज्ञे ! मन्दे !), पन्नगभूषणः – भुजगाः, अलङ्काराः यस्य तादृशः भुजगालङ्कारः, सखि! – आलि! सदा – नित्यम्, शेते – निद्राति, च – तथा हि, तस्य – पन्नगस्य (शेषस्य) उपरि – अधि । आर्ये! – संस्कारसम्पन्ने! मुञ्च – त्यज/जहीहि, विषादम् – कालकूटस्य भक्षकम्, आशु – शीघ्रम्, कमले! – पद्मे! न – मा, अहम् – (अत्र) उमा/पार्वती, प्रकृत्या – स्वभावेन, चला – चञ्चला/चपला/अव्यवस्थितचित्ता, च – ननु, इत्थम् – अनया रीत्या, वै – निश्चप्रचम्, गिरिजासमुद्रसुतयोः – उमायाः लक्ष्म्याः च, सम्भाषणम् – संवादः/वार्तालापः, पातु – रक्षतु, वः – युष्मान्/भवतः ॥

## स्वाध्यायः

1. **बहुविकल्पप्रश्नाः**

(1) गिरिजा का अस्ति?
(क) रमा (ख) उमा (ग) कमला (घ) समुद्रसुता

(2) समुद्रसुता का अस्ति?
(क) पार्वती (ख) उमा (ग) कमला (घ) गिरिजा

(3) समुद्रसुतायाः पत्युः स्तुतौ प्रख्यातं नामधेयं किम्?
(क) भुजगशयनः (ख) पन्नगभूषणः (ग) पशुपतिः (घ) किमपि न

(4) विषादम् इत्यस्य अत्र पाठे कः अर्थः?
(क) विषण्णम् (ख) विषाक्तम् (ग) गरलभक्षकम् (घ) कालकूटजनकम्

(5) आर्ये! इति सम्बोधनं कस्य कृते?
(क) लक्ष्म्याः (ख) समुद्रतनयायाः (ग) गिरिजायाः (घ) एषु नैकमपि

(6) भिक्षुः कस्य मखं गतः?
(क) वामनस्य (ख) भिक्षोः (ग) प्रह्लादस्य (घ) एतेषु नैकमपि

(7) अस्मिन् पद्ये कमले इति शब्दरूपम् अस्ति,

(क) सप्तम्येकवचनम् (ख) द्वितीयाद्विचनम् (ग) प्रथमाद्विचनम् (घ) सम्बोधनम्

(8) पद्यमिदम् अस्ति

(क) नमस्कारात्मकम् (ख) वस्तुनिर्देशात्मकम् (ग) आशीर्वादात्मकम् (घ) एषु नैकमपि

**2. परस्परं समन्वयः करणीयः ।**

| क | | ख | |
|---|---|---|---|
| (1) | बहिरालापः | (1) | बलेः |
| (2) | पद्यमिदम् | (2) | गोकुले |
| (3) | आर्या | (3) | उमा |
| (4) | चला | (4) | लक्ष्मीः |
| (5) | अहम् | (5) | सम्बोधनम् |
| (6) | मुग्धे | (6) | शार्दूलविक्रीडिते |
| | | (7) | काव्यविधा |
| | | (8) | 1.1 |

**3. एकैकवाक्यद्वारा उत्तराणि ( अतिलघूत्तराणि ) लेख्यानि ।**

(1) पद्येऽस्मिन् कयोः सम्भाषणम् अस्ति?

(2) शिवः कुत्र पशुपतिः ?

(3) कृष्णः कुत्र पशुपतिः ?

(4) इदं सम्भाषणं किं करोतु?

(5) वः इत्यस्य विभक्तिपरिचयः कः ?

(6) मुञ्च इति पदस्य परिचयः कः ?

(7) अत्र श्लोके कर्तृपदं किम्?

**4. सन्दर्भसहितं भावार्थो लेख्य ।**

(1) शेते च तस्योपरि ।

(2) नाहं प्रकृत्या चला ।

**5. सविस्तरम् उत्तरं लेख्यम् ।**

(1) संस्कृतसाहित्ये काव्यविधाः ।

(2) पद्येऽस्मिन् परस्परसम्बोधनतात्पर्यम् ।

**6. सूचनानुसारं लेख्यम् ।**

(1) भुजगशयनः (अत्र समानं शिवविशेषणं स्थापनीयम्)

(2) इत्थम् (पदपरिचयो लेख्यः)

(3) युष्मान् (भवत् स्थापनीयम्)

(4) पशुपतिः (समासविग्रहः लेख्यः)

(5) मुञ्च (समानार्थकपदं लेख्यम्)

(6) प्रकृत्या (पदपरिचयो लेख्यः)

(7) नास्त्यसौ (सन्धिः विच्छेद्यः)

## शिक्षकप्रवृत्तिः

शिक्षकाः प्रत्येकविशेषविषये छात्रोत्साहोत्कण्ठोत्पादनाय पौराणिकसन्दर्भयुताः कथाः कथयेयुः । यथा महाभारतयुद्धानन्तरं पाण्डवेषु कैलासं गतेषु शिवद्वारा आत्मगोपनाय महिषयूथमध्ये तद्रूपेण धारणम्, भीमस्य पर्वते विस्तीर्णपदेन अवस्थानम् । शिवद्वारा भूमौ अन्तःपाताय प्रयतनम्, शिरसः नेपाले स्थितिः स्कन्धपृष्ठस्य च केदारे ......... एवमेव वामनावतार-वृत्तान्तः, लक्ष्म्याः चञ्चलत्वम्, कालियदमनम् इत्यादिकम् अनौपचारिकतया वर्णयेयुः ।

- एतादृशानि अन्यानि पद्यानि वर्णयेयुः ।

## छात्रप्रवृत्तिः

- पूर्वकक्षासु पठितेभ्यः एतद्वर्षीयेभ्यो वा पाठ्यपुस्तकेभ्यः समानसन्दर्भान् स्मृत्वा वर्गे प्रकटयेयुः ।
- अन्यानि प्रहेलिका-कर्तृगुप्तादिपद्यानि सुभाषितभाण्डागारात् चित्वा यूथचर्चां कुर्युः ।

●

# 22. गुरुकुलम्

कविकालिदासं संस्कृतजगति को न जानाति ? अस्य एतावती प्रसिद्धिः अस्ति तथापि अस्य महाकवेः कालिदासस्य जीवनविषये किमपि आधारभूतं प्रमाणं न प्राप्यते । अस्य कवेः विषये बह्व्यः लोककथाः प्रचलिताः सन्ति । परन्तु ते लोककल्पिता एवेति मत्वा विद्वांसः तासु न विश्वसति । तथापि अस्य कवित्वे न कोपि संशयं करोति । सर्वे एकमत्येन एनं कविकुलगुरुपदे स्थापयन्ति । पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितः कलिदासः । अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ॥ - इत्यादि-उद्गारैः अस्य महिमानं कुर्वन्ति सामाजिकाः ।

कालिदासस्य रचनाः पठित्वा ज्ञायते यत् तस्य रचनाशैली विशिष्टा वर्तते । कालिदासस्य उपमा अतीव प्रसिद्धा वर्तते। अस्य उपमालङ्कारस्य प्रयोगे तु इमं कविम् अद्यापि न हि कश्चित् अन्यः कविः अतिशेते । प्रकृतेः वर्णनम् अपि अस्य अत्यद्भुतम् अस्ति । तस्यापि कोऽपि विकल्पः संस्कृतसाहित्ये न दृश्यते । महाकविकालिदासस्य प्रत्येकं वचनं रसमयं भवति । अथ च तत् आदितः अन्तं यावत् रसेन परिपूर्णं सत् प्रत्येकं पाठकं रसेन तर्पयति ।

अयं कविः नाटककारः अपि वर्तते । तस्य नाटकत्रयम् प्रसिद्धम् अस्ति । तेषु अभिज्ञानशाकुन्तलं सुप्रसिद्धम् अस्ति। कालिदासेन द्वे महाकाव्ये अपि रचिते स्तः । ते च रघुवंशम् कुमारम्भवम् चेति नाम्ना विख्यातिं गते स्तः । अनेन कविना एतयोः काव्ययोः या शैली प्रयुक्ता सा वैदर्भी अस्ति । वयं जानीमः यत् वैदर्भी रीतिः प्रायः समासविहीना सरलपदावलियुक्ता च भवति । अत्र निरर्थकशब्दाः, भारयुक्तं वर्णनम् च अधिकं न दृश्यते । रसोपासकाः औचित्यादीन् काव्यगुणान् अपि कालिदासस्य रचनासु अनुभवन्ति । प्रस्तुतोऽयं पद्यांशः रघुवंशमहाकाव्यस्य पंचमसर्गात् नीतः अस्ति । स्वगुरोः वरतन्तोः सकाशात् कौत्सः विद्याग्रहणं कृत्वा यदा गुरुदक्षिणां दातुं प्रवृत्तो भवति, तदा एतदर्थं सः रघोः समीपम् आगच्छति । रघुः विश्वजित् नामकं यज्ञं कृत्वा अकिंचनः सन् वने वसति स्म । तदनन्तरं किं भवतीति एषु पद्येषु वर्णितम् अस्ति ।

---

**तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणित-कोशजातम् ।**
**उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥1॥**

**पदच्छेदः** तम् (2.1) अध्वरे (7.1) विश्वजिति (7.1) क्षितीशम् (2.1) निःशेष विश्राणितकोशजातम् (1.1) उपात्तविद्यः (1.1) गुरुदक्षिणार्थी (1.1) कौत्सः (1.1) प्रपेदे (प्र पद् लिट्लकार 1.1) वरतन्तुशिष्यः (1.1) ॥

**अन्वयः** विश्वजिति अध्वरे निःशेषविश्राणितकोशजातं तं क्षितिशम् उपात्तविद्यः वरतन्तुशिष्यः कौत्सः गुरुदक्षिणार्थी प्रपेदे ।

**पदार्थः** विश्वजिति अध्वरे (विश्वजित् नामके यज्ञे), निःशेषविश्राणितकोशजातम् (यस्म समस्तः धनराशिः निःशेषं जातः तादृशम्) तं क्षितीशम् (तं रघुनामानं राजानम्) उपात्तविद्यः (उपात्ता विद्या येन सः प्राप्तविद्यः) वरतन्तुशिष्यः (वरतन्तुगुरोः कौत्सनामकः शिष्यः) गुरुदक्षिणार्थी (गुरोः सकाशात् अध्ययनान्ते गुरवे दक्षिणादातुकामः सन्) प्रपेदे (समक्षम् उपस्थितः) ।

**भावार्थः** राजा रघु यज्ञानन्तरं सर्वधनराशिः धनार्थिभ्यः दतवान्, ततः तेन सह किमपि धनं न आसीत्, अस्यां स्थितौ कौत्सनामकः वरतन्तुशिष्यः स्वीयाय गुरवे दक्षिणां प्रदातुं धनार्थी सन् रघुसमक्षम् उपस्थितः ॥

**स मृण्मये वीतिहिरण्मयत्वात् पात्रे निधायार्घ्यमनर्घशीलः ।**
**श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥ 2 ॥**

**पदच्छेदः** सः (1.1) मृण्मये (7.1) वीतिहिरण्मयत्वात् (5.1) पात्रे (7.1) निधाय (अ.) अनर्घशीलः (1.1) श्रुतप्रकाशम् (2.1) यशसा (3.1) प्रकाशः (1.1) प्रत्युज्जगाम (प्रति उप गम् – लिट् प्र.ए.) अतिथिम् (2.1) आतिथेयः (1.1) ॥

**अन्वयः** अनर्घशीलः यशसा प्रकाशः आतिथेयः सः वीतिहिरण्मयत्वात् मृण्मये पात्रे अर्घ्यं निधाय श्रुतप्रकाशम् अतिथिं प्रत्युज्जगाम ॥

**पदार्थः** अनर्घशीलः (विशिष्टस्वभाववान्), यशसा (कीर्त्या) प्रकाशः (तेजः) आतिथेयः (यजमानः अतिथेः स्वागतकर्ता वा) सः रघुः (एतन्नामकः राजा) वीतिहिरण्मयत्वात् (अपगतसुवर्णपात्रत्वात्) मृण्मये (मृन्निर्मिते पात्रे) अर्घ्यम् (अर्घ्यार्थम् इदम् अर्घ्यम्, पूजार्थम् द्रव्यम्) निधाय (स्थापयित्वा) श्रुतप्रकाशम् (शास्त्रप्रसिद्धम्) अतिथिम् (अभ्यागतम्) कौत्सम् प्रत्युज्जगाम (समक्षम् उपस्थितः जातः) ॥

**भावार्थः** सूर्यवंशीयः यशस्वी रघुः स्वीयं सर्वं धनं सर्वेभ्यः धनार्थिभ्यः दत्तवान् आसीत् अतः तस्य पार्श्वे किञ्चिदपि धनं नासीत्, तदा मृत्तिकापात्रम् आदाय तत्र अर्घ्यनिर्माणं कृत्वा सः कौत्ससम्मुखम् उपस्थितः जातः ॥

**अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।**
**कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥ 3 ॥**

**पदच्छेदः** अपि (अ.) प्रसन्नेन (3.1) महर्षिणा (3.1) त्वम् (1.1) सम्यक् (अ.) विनीय (अ.) अनुमतः (1.1) गृहाय कालः (1.1) हि (अ.) अयम् (1.1) संक्रमितुम् (अ.) द्वितीयं (2.1) सर्वोपकारक्षमम् (2.1) आश्रमम् (2.1) ते ॥

**अन्वयः** अपि प्रसन्नेन महर्षिणा त्वं सम्यक् विनीय गृहाय अनुमतः । ते हि सर्वोपकारक्षमं द्वितीयम् आश्रमं संक्रमितुम् अयं कालः अस्ति ॥

**पदार्थः** त्वं प्रसन्नेन (आनन्देन) सतां (सज्जनानां) सम्यक् (सम्यक् प्रकारेण) विनीय (विनयपूर्वकं प्रणामं कृत्वा) गृहाय (गृहस्थाश्रमाय) अनुमतः (अनुमतिं प्राप्तः) अपि (हि) ते (तव) सर्वोपकारक्षमम् (सर्वोपकारं कर्तुं क्षमता यस्य तादृशम्) द्वितीयम् आश्रमम् (चतुर्षु आश्रमेषु द्वितीयं गृहस्थाश्रमम्) संक्रमितुम् (संक्रमणं कर्तुम् अर्थात् द्वितीयाश्रमे प्रवेष्टुम्) अयं (असौ) कालः (समयः) अस्ति (वर्तते) ॥

**भावार्थः** अस्मिन् श्लोके कौत्सं राजा रघुः पृच्छति यत् अध्ययनस्य पूर्तिं कर्तारं भवन्तं गृहस्थाश्रमाय प्रवेशाय गुरुणा आज्ञा दत्ता अस्ति किम् ? इति ।

**इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।**
**स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ॥ 4 ॥**

**पदच्छेदः** इति (अ.) अर्घपात्रानुमितव्ययस्य (6.1) रघोः (6.1) उदारम् (2.1) अपि (अ.) गाम् (2.1) निशम्य (अ.) स्वार्थोपपत्तिम् (2.1) प्रति (अ.) दुर्बलाशः (1.1) तम् (2.1) इति (अ.) अवोचत् (वच्/ब्रू लङ्ल 1.1) वरतन्तुशिष्यः (1.1) ॥

**अन्वयः** अर्घपात्रानुमितव्ययस्य रघोः उदारम् अपि गां निशम्य वरतन्तुशिष्यः स्वार्थोपपत्तिं प्रति दुर्बलाशः सन् इति अवोचत् ।

**पदार्थः** अर्घपात्रानुमितव्ययस्य (मृतिकार्घपात्रम् अवलोक्य) रघोः (सूर्यवंशीयस्य रघुराज्ञः) उदारम् (उदारतायुक्ताम्) अपि गां (वाचं) निशम्य (श्रुत्वा) वरतन्तुशिष्यः (कौत्सनामा गुरोः वरतन्तोः शिष्यः) स्वार्थोपपत्तिम् (गुरुदक्षिणारुपं स्वीयं स्वार्थं) प्रति दुर्बलाशः (दुर्बला आशा यस्य सः, शिथिलाशः) सन् (भूत्वा) अवोचत् (उवाच, कथयामास) ॥

**भावार्थः** कौत्सः वरतन्तुशिष्यः मृत्तिकापात्रं दृष्ट्वा मनसि विचारितवान् विश्वजित् यज्ञे अनेन राज्ञा रघुणा संपूर्णं धनं अर्थिसात् कृतम् अस्ति । अतः सः स्वगुरुं दक्षिणाप्राप्तिं प्रति दुर्बलाशः भूत्वा रघुम् उक्तवान् ॥

**भक्तिः प्रतीक्ष्येषु कुलाचिता ते पूर्वान्महाभागतयातिशेषे ।**
**व्यतीतकालस्त्वहमभ्युपेतस्त्वदर्थिभावादिति मे विषादः ॥5॥**

**पदच्छेदः** भक्तिः (1.1) प्रतीक्ष्येषु (7.3) कुलोचिता (1.1) ते (6.1) पूर्वान् (2.3) महाभागतया (3.1) अतिशेषे (7.1) व्यतीतकालः (1.1) सन् (1.1) अर्थिभावात् (5.1) मे(6.1) विषादः (1.1) ॥

**अन्वयः** प्रतीक्ष्येषु भक्तिः ते कुलोचिता महाभाग तया पूर्वान् अतिशेषं तु अहं व्यतीतकालः सन् अर्थिभावात् त्वाम् अभ्युपेतः इति मे विषादः ।

**पदार्थः** प्रतीक्ष्येषु (पूज्येषु) भक्तिः (सद्भावना भक्तिः) ते (तव) कुलोचिता (स्वकुलानुगुणम्) महाभागतया (महाशयतया) भक्त्या पूर्वान् (स्वकुलोत्पन्नान् पूर्वजान्) अतिशेषम् (विशेषभक्तिभावयुक्तम्) अहं (कौत्सः) व्यतीतकालः (समयः यापितः) अर्थिभावात् (स्वस्वार्थभावात्) त्वाम् (भवन्तम्) अभ्युपेतः (समुपस्थाय) इति मे (मम) विषादः (दुःखम्) ॥

**भावार्थः** हे भाग्यवन् तव पूज्येषु भक्तिः कुलक्रमगता स्वपूर्वजानां दिलीपादीनां मध्ये त्वमतीव भक्तः किन्तु स्वकार्यपूरणकरणार्थम् अहमेव सर्वं दत्तवतः तव पार्श्वे विलम्बेन याचको भूत्वा आगतः इति मम विषादः॥

**स्थाने भवानेकनराधिपः सन् अकिञ्चनत्वं मखजं व्यनक्ति ।**
**पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्ल्याघ्यतरो हि वृद्धेः ॥6॥**

**पदच्छेदः** स्थाने (7.1) भवान् (1.1) एकनराधिपः (1.1) सन् (1.1) अकिञ्चनत्वम् (1.1) मखजम् (1.1) व्यनक्ति (वि अञ्जू लट् अ.पु.ए.व.) पर्यायपीतस्य (6.1) सुरैः (3.3) हिमांशोः (6.1) कलाक्षयः (1.1) श्लाघ्यतरः (1.1) हि वृद्धेः (6.1) ॥

**अन्वयः** भवान् एकनराधिपः सन् मखजम् अकिञ्चनत्वं यत् व्यनक्ति तत् स्थाने हि सुरैः पर्यायपीतस्य हिमांशोः कलाक्षयः वृद्धेः श्लाघ्यतरः भवति ॥

**पदार्थः** भवान् (राजा रघुः) एकनराधिपः (एकः चासौ नराधिपः, अर्थात् सार्वभौमिकः) सन् मखजम् (मखजन्यम्, यज्ञजन्यम् वा) अकिञ्चनत्वम् (निर्धनत्वम्) व्यनक्ति (प्रकटयति) तत् स्थाने (युक्तम् हि (परन्तु) सुरैः (देवैः) पर्यायपीतस्य (क्रमेण कृतपानस्य) हिमांशोः (चन्द्रमसः) कलाक्षयः (चन्द्रमसः कलायाः क्षयः) श्लाघ्यतरः (प्रशंसनीयः) भवति (अस्ति) ॥

**भावार्थः** – राजन् यज्ञे याचकेभ्यः सर्वस्वं दत्वा चक्रवर्ती अपि धनहीनः भवान् तथा एव शोभते यथा शुक्लपक्षीय-वृद्ध्यपेक्षया क्रमशः देवैः पीतामृतस्य चन्द्रमसः कृष्णपक्षीयः कलाक्षयः शोभनतरः भवति ॥

**तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ।**
**स्वस्त्यस्तु ते निर्गलिताम्बुगर्भम् शरद्घनं नार्दति चातकोऽपि ॥ 7॥**

**पदच्छेदः** – तद् (1.1) अन्यतः (अ.) तावत् (अ.) अनन्यकार्यः (1.1) गुर्वर्थम् (1.1) आहर्तुम् (अ.) यतिष्ये (यत् आ. लृट् 1.1) स्वस्ति (अ.) अस्तु (अस् लोट् 1.1) ते (6.1) निर्गलिताम्बुगर्भम् (2.1) शरद्घनं (2.1) अर्दति (अर्द् लट् 1.1) चातकः (1.1) अपि (अ.) ॥

**अन्वयः** तत् तावत् अनन्यकार्यः अहम् अन्यतः गुर्वर्थम् आहर्तुं यतिष्ये ते स्वस्ति अस्तु, चातकः अपि निर्गलिताम्बुगर्भं शरद्घनं न अर्दति ।

**पदार्थः** तत् (तस्मात्) तावत् अनन्यकार्यः (वदान्यान्तराद्) गुखे गुरोःकृते (गुरुधनम्) आहर्तुम् (अर्जयितुम्, आनेतुं वा) यतिष्ये (प्रयत्नं करिष्ये) ते (तुभ्यम्) स्वस्ति (शुभमस्तु) चातकः (चातकनामकः पक्षी) अपि (अ.) निर्गलिताम्बुगर्भम् (2.1) शरद्घनं (शारदीयं मेघम्) न अर्दति (न याचते) ॥

**भावार्थः** – गुरुदक्षिणा-अतिरिक्तम् नान्यत् मम प्रयोजनम् । अहम् तु अन्यतः गुरुदक्षिणां प्राप्तुं यत्नं करिष्यामि । किन्तु चातकः मेघरहितजलस्य याचनां न करोति ।

## स्वाध्यायः

1. **अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) वरतन्तुशिष्यः कः आसीत्?
(क) उपमन्युः (ख) रघुः (ग) कौत्सः (घ) दिलीपः

(2) रघुणा किं नाम यज्ञः कृतः?
(क) अश्वमेघः (ख) पर्जन्यः (ग) विश्वजित् (घ) पुत्रेष्टिः

(3) रघुणा कीदृशे पात्रे अर्घनिर्माणं कृतम्?
(क) सुवर्णपात्रे (ख) ताम्रपात्रे (ग) कांस्यपात्रे (घ) मृत्पात्रे

(4) गुरुणा महर्षिणा कौत्साय कुत्र प्रवेशार्थम् अनुमतिः प्रदत्ता?
(क) आश्रमे (ख) स्वगृहे (ग) गृहस्थाश्रमे (घ) गुरुकुले

(5) कौत्सः किमर्थं दुर्बलाशः भूत्वा रघुम् उवाच?
(क) अध्ययनार्थम् (ख) सहायतार्थम् (ग) सेवार्थम् (घ) दक्षिणाप्राप्त्यर्थम्

(6) कस्य भक्तिः कुलोचिता श्रेष्ठा च वर्तते?
(क) वरतन्तुगुरोः (ख) कौत्सस्य (ग) रघोः (घ) अर्चकस्य

(7) रघोः निर्धनत्वं केनेव श्लाघ्यतरं भवति?
(क) सूर्यस्य (ख) कौत्सस्य (ग) चन्द्रमसः (घ) वरतन्तुगुरोः

(8) कौत्सस्य अनन्यकार्यं किमासीत्?
(क) रघुणा सह मेलनम् (ख) स्वगुरोः सेवा
(ग) गृहाश्रमप्रवेशः (घ) गुरुदक्षिणार्थं धनप्राप्तिः

(9) क्षितीशम् इति शब्दस्य कः अर्थः?
(क) पृथ्वीम् (ख) राजानम् (ग) कौत्सम् (घ) रघुम्

(10) प्रस्तुतः पाठः कस्य ग्रन्थस्य अंशः वर्तते?
(क) रघुवंशस्य (ख) मेघदूतस्य (ग) कुमारसम्भवस्य (घ) शाकुन्तलस्य

**2. एकवाक्येन उत्तरं लिखत ।**

(1) गुरुदक्षिणार्थी कौत्सः कं समक्षम् उपस्थितवान्?

(2) केन गृहाय संक्रमितुम् आज्ञा दत्ता?

(3) एकनराधिपः कः आसीत्?

(4) चातकपक्षी कस्मात् जलं न याचते?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) कौत्सः दुर्बलाशः सन् किम् अवोचत्?

(2) कौत्समनसि विषादः किमर्थं जातः?

(3) रघोः पार्श्वे कौत्सः किमर्थं गतवान्?

(4) कविना हिमांशोः कलाक्षयः श्लाघ्यतरः कथं वर्णितः?

(5) अन्तिमस्य (तदन्यतस्तावद्) पद्यस्यस्य भावार्थं लिखत ।

**4. सामासिकपदानां परिचयं कारयत ।**

(1) उपात्तविद्यः

(2) सर्वोपकारक्षमम्

(3) अर्घपात्रानुमितव्ययस्य

(4) व्यतीतकालः

(5) एकनराधिपः

(6) निर्गलिताम्बुगर्भम्

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) गुरुदक्षिणा

(2) विश्वजित् अध्वरः

(3) अर्घ्यम्

(4) विषादः

(5) कलाक्षयः

**6. क्रियापदानां परिचयं कारयत ।**

(1) प्रपेदे

(2) प्रत्युज्जगाम

(3) व्यनक्ति

(4) अयाचत्

(5) यतिष्ये

●

# 23. हतो वृद्धः

हितोपदेशः पञ्चतन्त्रम् चेति द्वे कृती संस्कृतसाहित्यस्य रत्ने स्तः । कः नाम संस्कृतज्ञः इमे न जानाति । न केवलं संस्कृतज्ञाः जनाः प्रायः ये खलु नीतिशास्त्रं नीतिशास्त्रीयं वा वस्तु जानन्ति अथवा एतस्य विषयस्य जिज्ञासवः सन्ति ते सर्वेऽपि न्यूनाधिकरूपेण एतयोः संपर्कं कुर्वन्त्येव । एवमपि कथयितुं शक्यते यत् अस्मिन् निखिले जगति नीतिशास्त्रीयः विचारविमर्शः हितोपदेशं विना पञ्चतन्त्रम् विना अपूर्णो भवतीति । नेयम् अतिशयोक्तिः एषा तु स्वभावोक्तिः ।

अत्र कारणं किम् इति प्रश्ने तस्य उत्तरमस्ति नीतिशास्त्रीयं निखिलमपि विचारजातं एते द्वे ग्रन्थे कथामाध्यमेन प्रस्तुवतः । शैली रुचिकरा कौतुहलमयी सरला चेति । तेन बालाः कठिनात् कठिनमपि नीतिबोधं सारल्येन ज्ञातुमर्हन्ति । अथ च कस्यापि नीतिविचारस्य केवलं स्थापना एव अत्र न कृता अपितु तस्य पूर्वपक्षः अपि प्रस्थापितः । तदनन्तरं तस्य पूर्वपक्षस्य उत्तरपक्षत्वेन समाधानम् अपि प्रदत्तमस्ति । अनेन कारणेन कस्यचिदपि नीतिबोधस्य गाम्भीर्यं विस्तारश्च पाठकाय सुस्पष्टं भवति ।

अस्मिन् पाठे एकस्य हतस्य वृद्धस्य कथा अस्ति । वृद्धत्वात् प्राप्तसम्मानः प्राप्तनिवासश्च अयं वृद्धः स्वीयेन हिंसाकर्मणा मृत्योः शरणं भवति । अत्रेदं विचार्यते यत् – गृहागतस्य कस्यचित् वृद्धजनस्य सेवा कर्तव्या न वेति । किं सर्वोऽपि वृद्धः परिचितः अपरिचितः वा सेव्यो भवति न वा । यः वृद्धः यौवने हिंसकत्वेन जीवन्नासीत्, सः अपि वृद्धावस्थायां किमहिंसकः भवितुमर्हति । इत्यादिकस्य विचारस्य पक्षे विपक्षे च विविधानि वचनानि प्रदाय प्रान्ते सत्कृतः वृद्धः यदि हिंसकः अस्ति चेत् सः वृद्धः हतः एव भवतीति कथासारः ।

(सन्दर्भः – हितोपदेशः, कथामुखम्, तृतीया कथा)

---

मृगो ब्रूते – मित्र ! अकस्मादागन्तुना सह मैत्री न युक्ता । तन्न भद्रम् आचरितम् । तथा चोक्तम् –

**अज्ञात-कुल-शीलस्य वासो देयो न कस्यचित् ।**
**मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ 1॥**

तौ आहतुः – कथम् एतत्?

काकः कथयति–

(कथा 3)

अस्ति भागीरथी-तीरे गृध्रकूट-नाम्नि पर्वते महान्पर्कटी-वृक्षः । तस्य कोटरे दैव-दुर्विपाकात्गलित-नख-नयनो जरद्गव-नामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्ष-वासिनः पक्षिणः स्वाहारात्किञ्चित् किञ्चदुद्धृत्य तस्मै ददति । तेनासौ जीवति । तेषां शावकरक्षां च करोति ।

अथ कदाचित्दीर्घकर्णनामा मार्जारः पक्षि-शावकान्भक्षयितुं तत्रागतः । ततस्तम् आयान्तं दृष्ट्वा पक्षि-शावकैर्भयार्त्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेन उक्तम् – कोऽयम् आयाति ? दीर्घकर्णो गृध्रम् अवलोक्य सभयम् आह – हा हतोऽस्मि । यतोऽयं मां व्यापादयिष्यति । अथवा –

**तावद्भयस्य भेतव्यं यावद्भयम् अनागतम् ।**
**आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम् ॥ 2॥**

अधुनातिसन्निधाने पलायितुम् अक्षमः । तद्यथा भवितव्यं तथा भवतु । तावत्विश्वासम् उत्पाद्यास्य समीपम् उपगच्छामीत्यालोच्य तम् उपसृत्याब्रवीत् – आर्य ! त्वाम् अभिवन्दे ।

गृध्रोऽवदत् कस्त्वम् ? सोऽवदत् – मार्जारोऽहम् ।

गृध्रो ब्रूते – दूरम् अपसर नो चेद्हन्तव्योऽसि मया ।

मार्जारोऽवदत् – श्रूयतां तावन्मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः । यतः –

**जाति-मात्रेण किं कश्चिद्वध्यते पूज्यते क्वचित् ।**

**व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥3॥**

गृध्रो ब्रूते – ब्रूहि किमर्थं आगतोऽसि ?

सोऽवदत् – अहम् अत्र गङ्गा-तीरे नित्य-स्नायी निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतम् आचरन् तिष्ठामि । युष्मान् धर्म-ज्ञान-रताः प्रेम-विश्वास-भूमयः इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति, अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुम् इहागतः । भवन्तः चैतादृशाः धर्मज्ञाः यन्माम् अतिथिं हन्तुम् उद्यताः ? गृहस्थधर्मश्च एषः –

**अरावप्युचितं कार्यम् आतिथ्यं गृहमागते ।**

**छेत्तुम् अप्यागते छायां नोपसंहरते द्रुमः ॥4॥**

किं च – यदि अन्नं नास्ति, तदा सुप्रीतेनापि वचसा तावदतिथिः पूज्य एव ।

**तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।**

**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥5॥**

अन्यच्च –

**बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।**

**तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥6॥**

अन्यच्च –

**अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।**

**स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥7॥**

गृध्रोऽवदत् – मार्जारो हि मांस-रुचिः । पक्षि-शावकाश्चात्र निवसन्ति । तेनाहम् एवं ब्रवीमि ।

तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च – मया धर्मशास्त्रं श्रुत्वा वीतरागेनेदं दुष्करं व्रतं चान्द्रायणम् अध्यवसितम् । यतः परस्परं विवदमानानाम् अपि धर्मशास्त्राणाम् अहिंसा परमो धर्मः इत्यत्रैकमत्यम् । यतः –

**सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।**

**सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥8॥**

किं च –

**योऽत्ति यस्य सदा मांसम् उभयोः पश्यतान्तरम् ।**

**एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥9॥**

एवं विश्वास्य स मार्जारः तरु-कोटरे स्थितः ततो दिनेषु गच्छत्सु असौ पक्षिशावकान् आक्रम्य स्वकोटरम् आनीय प्रत्यहं खादति । अथ येषाम् अपत्यानि खादितानि, तैः शोकार्तैः विलपद्भिः इतस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः । पश्चात्पक्षिभिः इतस्ततो निरूपयद्भिस्तत्र तरु-कोटरे शावकाः खादिता इति सर्वैः पक्षिभिर्निश्चित्य च गृध्रो व्यापादितः । अतोऽहं ब्रवीमि – अज्ञात-कुल-शीलस्य इत्यादि ॥

## टिप्पणी

**शब्दार्थाः** – भद्रम् – कल्याणम्, दैवदुर्विपाकात् – दुर्भाग्यवशात्, उद्धृत्य – स्वीकृत्य, शावकैः – शिशुभिः, व्यापादयिष्यति – मारयिष्यति, निरामिषाशी – अमांसभक्षी (Vegeterian), भग्नाशः – निराशायुक्तः, वीक्ष्य – अवलोकय, परिज्ञाय – विज्ञाय/ सम्यक् ज्ञात्वा, नोपसंहरते – सङ्कोचयति, प्रीतिवचसा – मधुरवाक्येन, वीतरागेण – उत्पन्नवैराग्येण, विवदमानानाम् – कलहायमानानाम्, पातकम् – दुष्कृतम्, कोटरात् – निष्कुहात् ॥

**सन्धिः** – यथोचितम् – यथा + उचितम् । – अरावप्युचितम् – अरौ + अपि + उचितम् । – भवन्तश्चैतादृशाः – भवन्तः + च + एतादृशाः । – नोपसंहरते – न + उपसंहरते । – सर्वस्याश्रयभूताश्च – सर्वस्य + आश्रयभूताः + च । – तच्छ्रुत्वा – तत् + श्रुत्वा ।

**समासः** – दैवदुर्विपाकात् – दैवस्य दुर्विपाकः इति दैवदुर्विपाकः, तस्मात् (पञ्चमीतत्पुरुषः) ।

– अज्ञातकुलशीलस्य – न ज्ञातम् इति अज्ञातम्, कुलं च शीलं च इति कुलशीले, अज्ञाते कुलशीले यस्य सः अज्ञातकुलशीलः, तस्य अज्ञातकुलशीलस्य (बहुव्रीहिः) ।

## स्वाध्यायः

**1. अधोलिखितानां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।**

(1) कस्य दोषेण गृध्रः हतः?

(क) मार्जारस्य (ख) शुनकस्य (ग) काकस्य (घ) शुकस्य

(2) भागीरथीतीरे कः पर्वतः आसीत्?

(क) हिमालयः (ख) रैवतकः (ग) गृध्रकूटः (घ) त्रिकूटः

(3) जरद्गवः अभिधानं कस्य?

(क) बिडालस्य (ख) पर्वतस्य (ग) गृध्रस्य (घ) शुनकस्य

(4) आगतं भयं वीक्ष्य नरः किं कुर्यात्?

(क) यथोचितम् (ख) अयोग्यम् (ग) यताश्रुतम् (घ) यथाधीतम्

(5) किं परिज्ञाय वध्यः पूज्यः वा भवेत्?

(क) कुलम् (ख) व्यवहारम् (ग) आचारम् (घ) धर्मम्

(6) निर्गुणेषु अपि सत्वेषु साधवः किं कुर्वन्ति?

(क) दयाम् (ख) स्नेहम् (ग) सौख्यम् (घ) सुखम्

(7) सर्वदेवमयः कः?

(क) गृध्रः (ख) बिडालः (ग) अतिथिः (घ) काकः

(8) निधनेऽपि कः अनुयाति?

(क) कर्म (ख) आचारः (ग) धर्मः (घ) स्वभावः

**2. एकवाक्येन उत्तरं लिखत ।**

(1) हितोपदेशस्य कर्ता कः?

(2) कस्य दुःखम् अनुमानेन ज्ञातुं न शक्यते?

(3) मांसरुचिः कः?

(4) यदि धनं नास्ति तदा केन अतिथिः पूज्यः ?

(5) कीदृशस्य वासो न देयः ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) आगतं भयं वीक्ष्य.......... प्रपूर्य अर्थं लिखत ।

(2) गद्योक्तरीत्या गृहस्थधर्मः प्रतिपाद्यताम् ।

(3) सतां गेहे किं नोच्छिद्यन्ते ?

(4) भग्नाशः अतिथिः कीदृक् कर्म आचरति ?

(5) एतस्याः कथायाः शीर्षकं साधयत/सार्थकं कुरुत ।

**4. टिप्पणी कार्या ।**

(1) पार्श्वगतां छायां नोपसंहरते द्रुमः ।

(2) प्रीतिवचसाऽपि अतिथिः पूज्य एव ।

(3) एकस्य क्षणिका प्रीतिः अन्यः प्राणैः विमुच्यते ।

**5. सविस्तरम् उत्तरं लेख्यम् ।**

(1) अस्मिन् पाठे दानविषये यः उपदेशः सः विस्तारपूर्वक लेख्यः ।

(2) अस्मिन् पाठे श्रीमद्भगवद्गीताया उद्धरणस्य निर्देशः कुत्र ? इति लेख्यम् ।

## शिक्षकप्रवृत्तिः

- पक्षिपशुवर्गशब्दानाम् अभ्यासं कारयेत् ।
- एतत्सम्बद्धाः अन्याः कथाः श्रावयेत् ।
- सज्जन-सङ्गतिविषयकाणि सुभाषितानि स्पर्धात्मकरीत्या गापयेत् ।
- कथायाः गृहीतस्य बोधपाठस्य आचरणे स्थापनं कर्तुं प्रेरयेत् ।

## छात्रप्रवृत्तिः

- पक्षिस्वभावविषये सहजां जिज्ञासां कुर्युः ।
- गृहीतस्य बोधपाठस्य विषये प्रश्नान् पृच्छेयुः ।
- पाठे समागतानि वाक्यानि आत्मसात् कृत्वा व्यवहारे तेषाम् उपयोगं कुर्युः ।

●

# 24. वृत्तनियमाः

षट्सु अङ्गेषु छन्दः अपि वेदस्य चरणत्वेन विराजते । आचार्यः पिङ्गलः छन्दःसूत्राणि रचितवान् । तत्र वैदिकच्छन्दांसि लौकिकच्छन्दांसि इति मुख्यत्वेन प्रकारद्वयं भवति । ततः वार्णिकवृत्तानि मात्रिकवृत्तानि इति भेदद्वयम् । पुनश्च समवृतानि अर्धसमवृतानि विषमवृतानि इत्यादयः अनेके भेदाः भवन्ति । अस्मिन् पाठे केवलं कानिचित् वार्णिकवृत्तानि वर्णितानि सन्ति ।

वैदिकसाहित्ये छन्दसां कृते उपयोगिनां मूलतत्वानाम् उल्लेखः तैतिरीयोपनिषदि शीक्षाध्याये कृतः अस्ति वर्णः, स्वरः मात्रा, बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः । शिक्ष्यते वर्णादीनाम् उच्चारणलक्षणम् अनया इति शिक्षा । शिक्ष्यन्ते वर्णादयः इति शिक्षा । अत्र शीक्षा दीर्घप्रयोगः वैदिकः अस्ति । तत्र वर्णः अकारादिः भवति । स्वरः उदात्तादिः (उदातः अनुदातः स्वरितः च) भवति । मात्राः ह्रस्वदीर्घप्लुताः भवन्ति । बलं प्रयत्नविशेषः । साम इति स्वराणां मध्यमवृत्या (बाह्याभ्यन्तरौ विहाय संवृतादिः विशेषप्रकारः) उच्चारणं समता भवति । सन्तानः – सन्ततिः संहिता वर्णानां सन्धिः इत्यर्थः ।

लौकिकानां छन्दसां प्रकाराणां कृते वृत्तानि इति व्यवहारः । श्रीमान् केदारभट्टः ''वृत्तरत्नाकरः'' इति ग्रन्थं रचितवान् अस्ति । पूर्वकक्षासु पठितानां वृत्तानाम् अनुसन्धाने अत्र सामान्यानां मौलिकानां नियमानां पुनः अनुसन्धानपूर्वकम् अत्यावश्यकानि कानिचन वृत्तानि अत्र प्रस्तुतानि सन्ति ।

---

स्वरवर्णानाम् उच्चारणकालस्य निर्णयः ।

**एकमात्रो भवेद् ह्रस्वः द्विमात्रो दीर्घ उच्यते ।**
**त्रिमात्रस्तु प्लुतो ज्ञेयः व्यञ्जनं चार्धमात्रिकम् ॥**

**अर्थः** – एकया मात्रया युक्तः स्वरः ह्रस्वः भवति । यथा – अ इ, उ ऋ ।

द्वाभ्यां मात्राभ्यां युक्तः स्वरः दीर्घः भवति । यथा – आ, ई, ऊ, ॠ, ए, ओ, ऐ, औ, अं, अः इत्यादयः ।

त्रिभिः मात्राभिः युक्तः स्वरः प्लुतः भवति । प्लुतस्वरस्य उपरि ($0^3$) इति त्रिमात्राचिह्नम् अपि स्थाप्यते ।

व्यञ्जनस्य अर्धमात्रा भवति । किन्तु वृत्तानाम् अक्षरगणनायां व्यञ्जनानां (अर्धाक्षराणाम्) गणना न भवति ।

**लघुगुरुनियमः**

**(1) सानुस्वारो (2) विसर्गान्तो (3) दीर्घो (4-5) युक्तपरश्च यः ।**
**(6-8) वा पादान्ते त्वसौ (9-10) वक्रो ज्ञेयो (11) ऽन्यो (12) मात्रिको (13) लृजुः ॥**

**अर्थः** – अस्यां कारिकायां दीर्घवर्णाः (गुरुवर्णाः) के कथ्यन्ते, इति सरलतया कथितम् अस्ति ।

यस्य वर्णस्य यः वर्णः

(1) उपरि अनुस्वारः (ं) भवति

(2) अन्ते/पार्श्वे (दक्षिणतः) विसर्गः (ः) भवति

(3) दीर्घः भवति अर्थात् ई (ी) ऊ (ू) ॠ (ॄ) तथा च ए, ओ, ऐ, औ इत्येते स्वरवर्णाः दीर्घाः सन्ति ।

(4-5) यस्मात् वर्णात् अनन्तरः वर्णः संयुक्तः अस्ति सः (संयुक्तात् पूर्वः) वर्णः लघुः सन् अपि गुरुः भवति ।

(6-8) लौकिकवृत्तेषु प्रायः पद्यमय्यां रचनायां चत्वारः पादाः भवन्तिः तत्र यः अन्तिमः वर्णः सः लघुः सन् अपि विकल्पेन (आवश्यकतानुसारम्) गुरुः भवति ।

(यथा ''विघ्नेश्वराय वरदाय सुरप्रियाय'' इत्यत्र अन्तिमवर्णे यकारोत्तरवर्ती अकारः लघुः सन् अपि वसन्ततिलकावृत्तस्य लक्षणानुसारं गुरुवर्णत्वेन आवश्यकः 'प्रियाय' इति अन्तिमः अकारः गुरुः भवति ।)

(9-10) ग् - गुरुःस्वरवर्णः, वक्रः - तिर्यक् (ऽ) एतादृशः वक्रेण चिन्हेन युक्तः, ज्ञेयः - बोध्यः ।

(11-12) अन्यः - गुरुवर्णात् अपरः, मात्रिकः - एकमात्रायुक्तः

(13) ल् - लघुः स्वरवर्णः ऋजुः - सरलः (1) एतादृशः समरेखेण चिन्हेन युक्तः ज्ञेयः - बोध्यः ।

**गणपरिचयः**

**आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ॥**

एकगुरवः गणाः (अत्र केवलं गुरुचिन्हस्य (ऽ) स्थितौ लक्ष्यं देयम्)

| आदौ | मध्ये | अन्ते |
|---|---|---|
| भ | ज | स |
| ऽ।। | ।ऽ। | ॥ ऽ |
| (आदिगुरुः भगणः) | (मध्यगुरुः जगणः) | (अन्त्यगुरुः सगणः) |

एकलघवः गणाः (अत्र केवलं लघुचिन्हस्य (।) स्थितौ लक्ष्यं देयम्)

| आदौ | मध्ये | अन्ते |
|---|---|---|
| य | र | त |
| । ऽऽ | ऽ। ऽ | ऽऽ। |
| (आदिलघुः यगणः) | (मध्यलघुः रगणः) | (अन्त्यलघुः तगणः) |

मगणः आदिमध्यावसानेषु (ऽऽऽ) गौरवं याति । सर्वगुरुः मगणः)

नगणः आदिमध्यावसानेषु (॥।) लाघवं याति । (सर्वलघुः नगणः)

यतिस्थानम् - विरामस्थानम् । अत्र वृत्तलक्षणेषु कुत्र मध्ये स्वल्पः विरामः स्थापनीयः इति निर्देशः प्रसिद्धसङ्ख्यानां पदार्थान् उल्लेखेन क्रियते । यथा वेदाः 4, बाणाः (कामदेवस्य) 5. भूतानि 5, रसाः 6 इत्यादयः शब्दाः तेषां पर्यायशब्दाः वा निर्दिष्टाः भवन्ति ।

* अथ एतेषां प्रायोगिकेण रूपेण कानिचित् अधिकं प्रख्यातानि उपयुक्तानि च वृत्तानि अत्र प्रस्तुतानि सन्ति ।

(1) छन्दःप्रकारः - जगती
वृत्तनाम - वंशस्थम्
वृत्ताक्षराणि - 12
वृत्तलक्षणम् - **जतौ तु वंशस्थमुदीरितं जरौ ।**
वृत्तोदाहरणम् - **भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥**

| वृत्तविवरणम् - | भवन्ति | नम्रास्त | रवःफ | लोद्गमैः |
|---|---|---|---|---|
| | । ऽ। | ऽऽ। | । ऽ। | ऽ। ऽ |
| | ज | त | ज | र |

| | |
|---|---|
| वृत्तस्पष्टीकरणम् | यस्मिन् वृत्ते क्रमशः जगणः तगणः, जगणः तथा रगणः इत्येतत् सर्वं भवति तदा वंशस्थनामकं वृत्तं भवति । |
| (2) छन्दःप्रकारः – | शक्वरी |
| वृत्तनाम – | वसन्ततिलका |
| वृत्ताक्षराणि – | 14 |
| वृत्तलक्षणम् – | **उक्ता वसन्ततिलका तभजा जगौ गः।** |
| वृत्तोदाहरणम् – | **विघ्नेश्वराय वरदाय सुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय ।<br>नागाननाय श्रुतियज्ञविभूषिताय, गौरीसुताय गणनाथ ! नमो नमस्ते ॥** |
| वृत्तविवरणम् – | विघ्नेश्व  रायव  रदाय  सुरप्रि  याय<br>ऽ ऽ ।  ऽ । ।  । ऽ ।  । ऽ ।  ऽ ऽ<br>त  भ  ज  ज  गु गु |
| वृत्तस्पष्टीकरणम् | यस्मिन् वृत्ते क्रमशः, तगणः, भगणः, जगणौ अन्ते च गुरुवर्णौ इति एतत्सर्वम् आगच्छति तदा वसन्ततिलका वृत्तं भवति । |
| वृत्ते विशेषः | अस्मिन् श्लोके त्रिषु चरणेषु अन्तिमे वर्णे यकारे यः अकारः इति लघुः अपि वा पादान्ते त्वसौ... इति नियमेन गुरुवर्णत्वेन गृहीतः अस्ति । |
| (3) छन्दःप्रकारः – | अत्यष्टिः |
| वृत्तनाम – | पृथ्वी |
| वृत्ताक्षराणि – | 17 |
| वृत्तलक्षणम् – | **जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः।** |
| वृतोदाहरणम् – | **प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात् समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम् ।<br>भुजङ्गमपि कोपितं शिरसि पुष्पवद् धारयेद् न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥** |
| वृत्तविवरणम् – | प्रसह्य  मणिमु  द्धरेन्म  करव  क्त्रदंष्ट्रा  न्तरात्<br>। ऽ ।  । । ऽ  । ऽ ।  । । ऽ  । ऽ ऽ  । ऽ<br>ज  स  ज  स  य  ल गु |
| वृत्तस्पष्टीकरणम् – | यस्मिन् वृत्ते क्रमशः, जगणः, सगणः, जगणः, सगणः, यगणः, अन्ते च एकः लघुवर्णः एकः गुरुवर्णः च इति एतत्सर्वम् आगच्छति तदा पृथ्वीवृत्तं भवति । |
| वृत्ते विशेषः | यतिः – विरामस्थानम् । वसु – 8 वसवः । ग्रह – 9 ग्रहाः । अर्थात् अस्मिन् वृत्ते अष्टमाक्षरे, नवमाक्षरे (पादान्ते) च यतिः भवति ।<br>अनया रीत्या अन्येषां वृत्तानां प्रारूपानुसारं वृत्तविवरणादिकं कर्तुं शक्यते । |
| (4) छन्दःप्रकारः – | जगती |
| वृत्तनाम – | स्त्रग्विणी |
| वृत्ताक्षराणि – | 12 |

(5) वृत्तलक्षणम् - **रैश्चतुर्भिर्युता स्त्रग्विणी सम्मता ।**

वृत्तोदाहरणम् - अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे ॥

छन्द:प्रकार: - अतिशक्वरी

वृत्तनाम - मालिनी

वृत्ताक्षराणि - 15

वृत्तलक्षणम् - **ननमयययुतेयं मालिनी भोगिलोकैः ।**

वृत्तोदाहरणम् - **असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी ।**
**लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति ॥**

वृत्ते विशेषः - भोगी - सर्पः 8 (सर्पकुलानि - 8 अनन्तः, वासुकिः, तक्षकः, कर्कोटकः, पद्मः, महापद्मः, शङ्ख, कुलिकः) । लोकाः 7 (भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम्)

## स्वाध्यायः

**1. बहुविकल्पप्रश्नाः ।**

(1) छन्दः वेदस्य अङ्गम् अस्तिः

(क) मुखम् (ख) नेत्रम् (ग) हस्तौ (घ) चरणम्

(2) छन्दःसूत्राणि केन रचितानि?

(क) पाणिनिना (ख) केदारभट्टेन (ग) पिङ्गलाचार्येण (घ) एषु नैकमपि

(3) छन्दसां मुख्यप्रकारसङ्ख्याः

(क) 2 (ख) 8 (ग) 10 (घ) एषु नैकमपि

(4) वृत्तरत्नाकरस्य रचयिता अस्ति,

(क) पाणिनिः (ख) केदारभट्टः (ग) पिङ्गलाचार्यः (घ) एषु नैकमपि

(5) व्यञ्जनं ............. मात्रायुतं भवति,

(क) अर्ध (ख) एक (ग) द्वि (घ) त्रि

(6) कन्दुकः अत्र दु अस्ति–

(क) दीर्घः (ख) प्लुतः (ग) गुरुः (घ) लघुः

(7) जगणः भवति–

(क) ऽ । ऽ (ख) । ऽ । (ग) । । ऽ ऽ (घ) एषु नैकमपि

(8) वंशस्थवृत्ते अक्षराणि भवन्ति–

(क) 14 (ख) 15 (ग) 12 (घ) 11

(9) पृथिवी इति प्रकारः अस्ति–

(क) अनुष्टुप् - छन्दसः (ख) जगतीच्छन्दसः (ग) शक्वरीच्छदसः (घ) एषु नैकमपि

**2. परस्परं समन्वयः करणीयः ।**

| गणः | स्वरूपम् |
|---|---|
| (1) यगणः | (1) । ऽ ऽ |
| (2) मगणः | (2) ऽ ऽ ऽ |
| (3) सगणः | (3) । । ऽ |
| (4) तगणः | (4) ऽ ऽ । |
| (5) रगणः | (5) ऽ । ऽ |
| | (6) । । । |
| | (7) । ऽ । |

**3. एकैकवाक्यद्वारा उत्तराणि (अतिलघूत्तराणि) लेख्यानि ।**

(1) ह्रस्वस्य कति मात्राः ?

(2) गुरुवर्णस्य कृते छन्दःशास्त्रे कीदृशं चिह्नम् ?

(3) लृजुः इत्यस्य अर्थः कः ?

(4) अतिशक्वरी-छन्दसि कति अक्षराणि भवन्ति ?

(5) चत्वारः रगणाः कस्मिन् वृत्ते ?

**4. सन्दर्भसहितं भावार्थो लेख्यः**

(1) वा पादान्ते त्वसौ वक्रो............ ।

(2) युक्तपरश्च यः

**5. सविस्तरम् उत्तरं लेख्यम् ।**

(1) वसन्ततिलकावृत्तस्य लक्षणस्य उदाहरणेन सह समन्वयः प्रदर्शनीयः ।

(2) अच्युतं केशवं रामनारायणम् अस्य चरणस्य गणनिर्देशेन सह वृत्तविवरणं लेख्यम् ।

(3) गुरुवर्णाः के भवन्ति इति विवेचनीयम् ।

(4) नवाम्बुभिर्दूरविलम्बिनो घनाः - अस्य चरणस्य गणनिर्देशेन सह वृत्तविवरणं लेख्यम् ।

**6. सूचनानुसारं लेख्यम् ।**

(1) नमस्ते (लघुगुरुनिर्देशः करणीयः) ।

(2) ऽ ऽ । (अन्तिमं लघुं प्रथमाक्षरे उभयोः गणयोः नामनिर्देशः करणीयः)

(3) भोगिलोकैः (विवरणं लेख्यम्)

(4) समवृत्तानि .................. ............. (अवशिष्टं द्वयं लेख्यम्)

**शिक्षकप्रवृत्तिः**

- सन्दर्भसाहित्यानुसारम् अन्यस्तोत्रेषु पाठ्यपुस्तकादिषु स्थितानि सम्बद्धवृत्तपद्यानि निर्दिशेयुः ।
- गेयरागानुसारं कतमद् इदं वृत्तम् ? इति कुतूहलात्मकम् अभिगमम् उत्पादयेयुः ।
- पूर्वकक्षासु पठितानां वृत्तानां लक्षणपारायणं कारयेयुः ।

**छात्रप्रवृत्तिः**

- परस्परं नाम्नां लघुगुरुप्रक्रियां कृत्वा स्व-परनाम्नां गणपरिचयं कर्तुं क्रीडात्मकाभिगमम् उत्पादयेयुः ।
- नित्यकर्मादिषु उच्चार्यमाणानां गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि इत्यस्मिन् विषये जिज्ञासां कुर्युः । (यथा-गायत्री-6 इति क्रमात्, 6, 7, 8, 9, 10, 11)

●

# 25. शास्त्रपरिचयः

संस्कृते सन्ति अनेकानि शास्त्राणि ज्ञानराशिपरिपूर्णानि चतुर्वर्गफलप्रदानि च । तत्र साहित्यशास्त्रम् अलङ्कारशास्त्रम् इति व्यवहारः भवति । साहित्यं वस्तुतः द्विविधं वैदिकं लौकिकञ्च । वैदिकं संहिता ब्राह्मणारण्यकोपनिषद्भिः विपुलं वर्तते । लौकिकं रामायण-महाभारत-पुराणादिभिः युक्तम्, अनेककविप्रवरविरचितैः काव्यनाटकादिभिश्च अनवरतं वर्द्धितं च । लौकिके साहित्ये रूढतया साहित्यशब्दप्रयोगः काव्यनाटकादिषु लक्षणग्रन्थेषु च प्रायः प्रयुज्यते ।

शब्दार्थयोः सहितत्वम् अस्मिन् अस्ति अतः इदं साहित्यम् उच्यते । अस्मिन् अलङ्काराणां प्राचुर्यत्वात्, केषाञ्चन मतानुसारम् अलङ्कार आत्मा काव्यस्य इत्यस्मात्, ग्रन्थानां शीर्षकेषु च अलङ्कारशब्दप्रयुक्तत्वात् इदम् अलङ्कारशास्त्रम् इति उच्यते । इदं हि शास्त्रं काव्येन सह सम्बद्धम् अतः काव्यशास्त्रम् इति नामधेयम् ।

अस्मिन् शास्त्रे षट् सम्प्रदायाः प्रसिद्धाः सन्ति । एतेषु सम्प्रदायेषु आचार्याणां महती परम्परा वर्तते । काव्यस्य शरीरं शब्दार्थौ, तर्हि कः आत्मा ? इति प्रश्ने अन्धगजन्यायेन काव्यात्मतत्त्वं व्याख्यातुं प्रवृत्ताः आचार्याः । रसं काव्यात्मानं मन्वानः रससम्प्रदायः, अलङ्कारं काव्यात्मानं मन्वानः अलङ्कारसम्प्रदायः, रीतिं काव्यात्मानं मन्वानः रीतिसम्प्रदायः, तथैव वक्रोक्ति-ध्वनि-औचित्येषु यथामति काव्यात्मानं मन्वानाः इमे वक्रोक्ति-ध्वनि-औचित्यसम्प्रदायाः च क्रमेण समभवन् । एतेषु सम्प्रदायेषु रसालङ्कारध्वनिसम्प्रदायाः अतीव ख्यातिं प्राप्ताः वर्तन्ते । क्रमेण षण्णाम् अपि सम्प्रदायानां परिचयः अत्र प्रदीयते ।

| क्रम | सम्प्रदायः | प्रवर्तकाचार्यः | ग्रन्थः |
|---|---|---|---|
| 1 | रससम्प्रदायः | भरतमुनिः | नाट्यशास्त्रम् |
| 2 | अलङ्कारसम्प्रदायः | भामहः | काव्यालङ्कारः |
| 3 | रीतिसम्प्रदायः | वामनः | काव्यालङ्कारसूत्रवृत्तिः |
| 4 | वक्रोक्तिसम्प्रदायः | कुन्तकः | वक्रोक्तिजीवितम् |
| 5 | ध्वनिसम्प्रदायः | आनन्दवर्धनः | ध्वन्यालोकः |
| 6 | औचित्यसम्प्रदायः | क्षेमेन्द्रः | औचित्यविचारचर्चा |

**1. रससम्प्रदायः**

काव्यशास्त्रे सर्वेषु सम्प्रदायेषु अयं सम्प्रदायः प्राचीनः गण्यते । अस्य सम्प्रदायस्य प्रवर्तकाचार्यः भरतमुनिः तेन रचितः ग्रन्थः नाट्यशास्त्रम् । काव्यमीमांसायां राजशेखरः रससम्प्रदायस्य प्रवर्तकं नन्दिकेश्वरं मनुते किन्तु तस्य कोऽपि ग्रन्थः नोपलभ्यते । अतः भरतमुनि एव अस्य सम्प्रदायस्य प्रवर्तकः स्वीक्रियते । रसशब्दस्योल्लेखः ऋग्वेदे दधानः कलशे रसम्, तैतिरीयोपनिषदि च रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवति इति लिखितं वर्तते । काव्यसम्बन्धे रसस्य स्वरूपं प्रप्रथमं भरतमुनिः एव निरूपितवान् । भरतमुनेः प्रसिद्धं रससूत्रमस्ति विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति । अर्थात् नायकनायिकादिभिः आलम्बनविभावैः चन्द्रचन्दनानुलेपनादिभिः उद्दीपनविभावैः परस्परं प्रेक्षणालिङ्गनादिभिः अनुभावैः हर्षादिभिः व्यभिचारिभिः सहृदयानां मनसि स्थितः रत्यादिः स्थायी आस्वाद्यते सः शृङ्गारादिको रसः उच्यते । रस्यते आस्वाद्यते इति रसः इति व्युत्पत्या आस्वादयोग्यः स्थायिभावः एव रसः कथ्यते ।

रससूत्रे प्रयुक्तं निष्पत्तिः इति पदं स्वीकृत्य रसविषयकानि चत्वारि मतानि प्रसिद्धानि अभवन् । तत्र भट्टलोल्लटस्य उत्पत्तिवादः, आचार्यशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य च अभिव्यक्तिवादः इति चत्वारि मतानि सन्ति ।

विभावः द्विविधः – आलम्बनम् उद्दीपनञ्च । आलम्बन-विभावः अर्थात् नायकनायिकादयः । उद्दीपनविभावः अर्थात् चन्द्रोदयानादयः । अनुभावः प्रेक्षणालिङ्गनादिक्रियारूपः । व्यभिचारिभावाः त्रयस्त्रिंशत् सन्ति निर्वेदादयः । एभिः मिलित्वा पानकरसन्यायेन सहृदयमनःस्थितः रत्यादिः स्थायी चर्वणायोग्यो भवति सः रसः । स्थायिभावाः नव सन्ति अतः रसाः अपि नव भवन्ति । तद्यथा –

| क्रम | स्थायिभावः | रसः |
|---|---|---|
| 1 | रतिः | शृङ्गारः |
| 2 | हासः | हास्यः |
| 3 | शोकः | करुणः |
| 4 | क्रोधः | रौद्रः |
| 5 | उत्साहः | वीरः |
| 6 | भयम् | भयानकः |
| 7 | जुगुप्सा | बीभत्सः |
| 8 | विस्मयः | अद्भुतः |
| 9 | निर्वेदः (शमः) | शान्तः |

वस्तुतः भरतमुनिस्तु अष्टौ एव रसान् निरूपतवान् । मम्मटाचार्यः निर्वेदं स्थायिभावं मत्वा नवमं शान्तरसं स्वीचकार । ततः कैश्चित् वात्सल्यरसः भक्तिरसश्चेत्यादयो रसाः परिगणिताः । रससम्प्रदायस्य अनुयायिनः आचार्याः अभिनवगुप्तः विश्वनाथः, जगन्नाथः, अन्येऽपि सन्ति, ये रसस्य सत्तां स्वीकुर्वन्ति इति ।

### 2. अलङ्कारसम्प्रदायः

अस्य सम्प्रदायस्य प्रवर्तकः आचार्यभामहः अस्ति । तन्मतानुसारं काव्ये अलङ्कारस्यैव आत्मत्वम् अस्ति । अलङ्काराः एव काव्यशोभां वर्धयन्ति । भामहानुसारं युवत्याः सुन्दरम् अपि मुखं यथा अलङ्कारं विना न शोभते तथैव काव्यमपि अलङ्काररहितं न शोभते । अलङ्कारविरहे सरस्वती विधवा इव प्रतीयते । अतः काव्यम् अलङ्कारैः अलङ्कृतं स्यादिति भामहस्य मतम् ।

काव्ये अलङ्कारस्य स्थानं प्रायः सर्वैः अपि आचार्यैः स्वीक्रियते । मम्मटस्य अनलङ्कृती पुनः क्वापि इति मतस्य टीकां कुर्वन् जयदेवः लिखति यत्

**अङ्गीकरोति यः काव्यं शब्दार्थावनलकृती ।**
**असौ न मन्यते कस्मादनुष्णमनलं कृती ॥ (चन्द्रालोकः)**

अस्य सम्प्रदायस्य अनुयायिनः दण्डी, उद्भटः, रुद्रटः, प्रतिहारेन्दुराजः, रुय्यकः जयदेवः अप्पयदीक्षितः च वर्तन्ते । अन्यैरपि आचार्यैः काव्ये अलङ्कारस्य महत्त्वं स्वीकृतमस्ति ।

### 3. रीतिसम्प्रदायः

अस्य सम्प्रदायस्य प्रवर्तकः आचार्यवामनः अस्ति । तेन विरचितः ग्रन्थः काव्यालङ्कारसूत्रवृत्तिः । सः स्वग्रन्थे रीतिरात्मा काव्यस्य इति लिखित्वा रीतिं काव्यात्मरुपेण अङ्गीचकार । रीतेः व्याख्यां कुर्वन् सः लिखति विशिष्टपदरचना रीतिः इति ।

विशेषो गुणात्मा इत्यनेन विशेषं व्याख्यातवान् । गुणाः काव्यस्य नित्यधर्माः सन्ति, तैः गुणैः युक्ता पदरचना रीतिः कथ्यते । भोजः तु रीङ्धातुना निष्पन्नः अयं रीतिशब्दः इति मन्यते–

रीङ्गताविति धातोः सा व्युत्पत्या रीतिरुच्यते ।

वामनः वैदर्भी गौडी पाञ्चाली इति तिस्रः रीतीः निरूपितवान् । तत्र समग्रगुणा वैदर्भी अर्थात् सर्वैः गुणैः युक्ता वैदर्भी । अन्ये आचार्याः अवयवसंस्थानविशेषवत् रीतिगणनां कृतवन्तः । तेषां मतानुसारं रीतिः केवलं अवयवसम्बन्धिनी अस्ति, न तु काव्यस्य आत्मा इति ।

### 4. वक्रोक्तिसम्प्रदायः

अस्य सम्प्रदायस्य प्रवर्तकाचार्यः कुन्तकः अस्ति । सः वक्रोक्तिजीवितम् इति ग्रन्थं निर्मितवान् । तत्र ''वक्रोक्तिः काव्यजीवितम्'' इति विलिख्य वक्रोक्तिं काव्यात्मरुपेण स्वीकृतवान् । का इयं वक्रोक्तिः ? सः लिखति –

वक्रोक्तिरेव वैदग्ध्य–भङ्गीभणितिरुच्यते ।

अर्थात् चमत्कारयुक्ता चातुर्यपूर्णा विदग्धानां विदुषाम् उक्तिः वक्रोक्तिः कथ्यते । इयमेव वक्रोक्तिः काव्यात्मरूपेण कुन्तकेन स्वीकृता । वक्रोक्तिः षड्विधा अस्ति –

1. वर्णविन्यासवक्रता ।
2. पदविन्यासवक्रता ।
3. वाक्यविन्यासवक्रता ।
4. अर्थवक्रता ।
5. प्रकरणवक्रता ।
6. प्रबन्धवक्रता ।

आचार्यः कुन्तकः गुणालङ्काररीतीनां सर्वेषाम् अन्तर्भावं वक्रोक्तौ एव प्रदर्शितवान् । ''शब्दार्थयोः सहितयोः भावः साहित्यम्'' इति अनेन आचार्येण उक्तम् । रीतिशब्दस्य स्थाने सः मार्गशब्दं प्रयुङ्क्ते । ते त्रयः मार्गाः सुकुमारः विचित्र मध्यमः च । अस्य आचार्यस्य अनुयायिनः नोपलभ्यन्ते । अन्ये आचार्याः वक्रोक्तेः निरूपणम् अलङ्कारेषु कुर्वन्ति । तेषां मतानुसारं वक्रोक्तिः केवलम् अलङ्कारः।

### 5. ध्वनिसम्प्रदायः

रसालङ्कारसम्प्रदायानन्तरम् एष– सम्प्रदायः प्रबलः दृश्यते । अस्य प्रवर्तकः आनन्दवर्धनः अस्ति । सः ''काव्यस्यात्मा ध्वनिः'' इति विलिख्य ध्वनेः काव्यात्मत्व स्वीकरोति । ध्वनिः त्रिविधः – वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिः च । तेषु रसध्वनिः एव काव्यस्यात्मा । ध्वनेः लक्षणं प्रतिपादयन् आनन्दवर्धनः आह

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥**

अर्थात् – यत्र अर्थः शब्दश्च स्वार्थं गौणं कृत्वा अन्यं प्रतीयमानार्थं, व्यञ्जनया बोधयतः सः काव्यविशेषः ध्वनिः । एषः प्रतीयमानार्थः प्रसिद्धेभ्यः अवयवेभ्यः अतिरिक्तः अङ्गनासु लावण्यम् इव विभाति । उक्तं च ध्वन्यालोके–

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**

**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥**

महिमभट्ट: ध्वने: खण्डनं कृतवान् । स: ध्वने: अन्तर्भावम् अनुमाने करोति । आचार्यमम्मट: ध्वनिप्रतिष्ठापक: परमाचार्य: उच्यते ।

आनन्दवर्धन: ध्वने: सङ्कल्पनां वैयाकरणेभ्य: स्वीकृतवान् । वैयाकरणानां प्रतीतपदार्थको लोके ध्वनि: शब्द: इति मतं स्वीकृत्य, ध्वने: अर्थत्वं प्रतिपादितवान् । अर्थात् वैयाकरणानां शब्द: ध्वनि: काव्यशास्त्रिणाम् अर्थ: ध्वनि: इति । अयं सम्प्रदाय: अतिविस्तृत: प्रामाणिक: च वर्तते ।

## 6. औचित्यसम्प्रदाय:

अस्य सम्प्रदायस्य प्रवर्तक: आचार्य: क्षेमेन्द्र अस्ति । औचित्यविचारचर्चा इति ग्रन्थे तेन काव्यात्मरूपेण औचित्यम् इति उक्तम् । काव्ये सर्वत्र गुणालङ्काररसादीनां निरुपणे औचित्यम् आवश्यकम् इति तस्य मतम् । आनन्दवर्धनोऽपि रसपुष्ट्यर्थम् औचित्यम् आवश्यकम् इति आह –

**अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।**

**औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥**

अयं सिद्धान्त: स्वतन्त्र: तथापि न तावत् प्रसिद्धिं गत: नास्य अनुयायिन: च उपलभ्यन्ते । एवम् अलङ्कारशास्त्रस्य साहित्यशास्त्रस्य वा षट् सम्प्रदाया: अत्र यथायोगं निरुपिता: । एतेषां प्रवर्तका: सम्प्रदायं संस्थापितवन्त: अनुयायिनश्च खण्डनमण्डनादिकं कृत्वा तं सम्प्रदायं बलवत्तरं कर्तुं प्रयत्नं कृतवन्त: ॥

## स्वाध्याय:

1. **बहुवैकल्पिकप्रश्ना: ।**

(1) साहित्यशास्त्रे कति सम्प्रदाया: सन्ति?

(क) 4 (ख) 5 (ग) 6 (घ) 8

(2) रीतिसम्प्रदायस्य प्रवर्तक: आचार्य: क: ?

(क) वामन: (ख) कुन्तक: (ग) भरत: (घ) भामह:

(3) अलङ्कारसम्प्रदायस्य प्रवर्तक: आचार्य: क: ?

(क) भरत: (ख) भामह: (ग) वामन: (घ) क्षेमेन्द्र:

(4) औचित्यविचारचर्चा ग्रन्थ: कस्य ?

(क) भरतमुने: (ख) कुन्तकस्य (ऌ) आनन्दवर्धनस्य (घ) क्षेमेन्द्रस्य

(5) आनन्दवर्धन: कस्य सम्प्रदायस्य प्रवर्तक: आचार्य: ?

(क) रससम्प्रदायस्य (ख) ध्वनिसम्प्रदायस्य (ग) वक्रोक्तिसम्प्रदायस्य (घ) औचित्यसम्प्रदायस्य

(6) (रसो वै स:) इत्यत्र स: क: ?

(क) रस: (ख) परमात्मा (ग) अलङ्कार: (घ) भरतमुनि:

(7) प्रतीयमानार्थ: क: ?

(क) व्यङ्ग्य: (ख) लाक्षणिक: (ग) लक्ष्यार्थ: (घ) मुख्यार्थ:

(8) वक्रोक्तिजीवितम् ग्रन्थस्य कर्ता कः ?

(क) वामनः (ख) आनन्दवर्धनः (ग) भामहः (घ) कुन्तकः

(9) राजशेखरस्य ग्रन्थः कः ?

(क) काव्यमीमांसा (ख) ध्वन्यालोकः (ग) काव्यादर्शः (घ) काव्यालङ्कारः

(10) विभावः कतिविधः ?

(क) द्विविधः (ख) त्रिविधः (ग) पञ्चविधः (घ) सप्तविधः

**2. लघूत्तरीयाः प्रश्नाः ।**

(1) रसाः कति ? के च ते ?

(2) वीर-रसस्य स्थायिभावः कः ?

(3) रीतयः कति ? नामानि लिखत ?

(4) साहित्यं कतिविधम् ? नामानि लिखत ?

(5) ध्वनिलक्षणं किम् ?

(6) वक्रोक्तिप्रकाराः कति ? नामानि लिखत ।

**3. विवरणात्मकप्रश्नाः ।**

(1) यथाधीतं रससूत्रं वर्णयत ।

(2) अलङ्कारसम्प्रदायं विवृणुत ।

(3) ध्वनिसम्प्रदायस्य महत्त्वं लिखत ।

(4) रीतिसम्प्रदायस्य परिचयं कारयत ।

**4. योग्यं सङ्गमयत ।**

| **अ** | **आ** |
|---|---|
| शृङ्गारः | उत्साहः |
| अद्भुतः | जुगुप्सा |
| करुणः | शोकः |
| वीरः | रतिः |
| बीभत्सः | विस्मयः |

• • •